

# श्री सिद्ध-हेम-शब्दानुशासन-ल...घु...वृ...त्तिः

द्वितीयो विभागः



नमः श्रीजिनशासनाय

# सिद्धहेम-शब्दानुशासन-लघुवृत्तिः

[ षट्सहस्त्रीत्यपराभिधा ]

## [ द्वितीयो विभागः ]

[ द्वितीयाध्याय-तृतीयपादतः पञ्चमाध्यायपर्यन्तः ]

व्याकरणं हि भाषाशुद्धिदोषज्ञापकं,
तमन्तरा नह्यानवद्यवचनप्रयोग-
सम्भवोऽतः ज्ञानाचारमर्यादया
ज्ञानिगुरुनिश्रया तदध्ययनं हितावहं ॥

— प्रकाशकाः —

श्री जेशिंगभाइ कालीदास ट्रस्ट अमदावाद-
कार्यवाहकाः

| द्वितीयावृत्तिः १००० | परिवर्द्धित संस्करणं | विक्रम सं. २०३१ |
|---|---|---|
| वीर नि. सं. २५०१ | द्वितीयावृत्तिः 卐 | सिद्धहेम सं. ८३८ |

पुस्तक प्राप्तिस्थान :
शेठ साराभाई जेशिंगभाई
कलेक्टर ओफीस सामे,
नगरशेठना वंडा पासे,
अमदावाद ३८०००१

व्याकरणाध्येतॄणामुपयोगि किंचित्-

* प्रतिदिनं मूलपाठः सम्यक् घोषणीयः ।
* पुनरावर्तनं च प्रत्यहं विधेयम् ।
* व्याकरणादन्यत् साहित्यशास्त्रादिकं पञ्चाध्यायी-पाठादर्वाग् न किमपि पठनीयम् ।
* ज्ञानाचार-मर्यादा सम्यक् परिरक्षणीया ।
* व्याकरणं हि शब्दशास्त्रं, तत्र नह्यर्थ-प्राधान्यमतः मूलपाठः सम्यक् परिचिन्तनीयः ।

मुद्रक—
भानुचन्द्र नानचन्द महेता
श्री बहादुरसिंहजी प्रिन्टींग प्रेस
पालीताणा * सौराष्ट्र

श्री वर्धमानस्वामिने नमः

# प्रास्ताविकं निवेदनम्

समुपादीयतां भोः! शेमुषीधनगौरवफलाधायकसदाज्ञानुगतगीतार्थनिश्राशालिसंयमसुशोभिताः संयमधुराधुरीणाः, विविधकर्मजालजम्बालव्यालोडनक्षमश्रुतज्ञानपारावारपारीणाः निर्जराप्रयोजकश्रुतज्ञानरहस्यसम्पत्तये शब्दार्थ – वाक्यार्थ – महावाक्यार्थानुस्यूतिसनाथैदम्पर्यार्थविबोधनाय भाषाज्ञानसौष्ठवापादकव्याकरण-न्यायशास्त्रसदधिगमचक्रद्वयाधारेण सम्यग्ज्ञानरथं समारुह्याभिमोक्षं प्रयाणशीलाः सुसाधुजनोत्तंसाः।

कलिकालसर्वज्ञ – सर्वविद्यारहस्यस्वामि-सार्धत्रिकोटिमिताभिनवश्लोकप्रणेतृ – जिनशासनगगनदिनमणिकल्पाचार्यवर्य –श्रीहेमचन्द्रसूरीश्वरपादैः

विशालातिव्यापकार्थसमृद्धश्रीसिद्धहेमबृहद्वृत्तिमध्ये – तुमशक्नुवानानां हिताय परमार्हतराजर्षिश्री-कुमारपालमहाराज–वैदुष्यपरिकर्मणायै च संक्षिप्ती-कृतरचनायाः श्रीसिद्धहेमलघुवृत्तेः शब्दव्युत्पत्तिज्ञाने-ऽत्यंतोपयोगिनो व्याकरणस्याध्येतृसौकर्यार्थमर्थावबो-धजनक–पदच्छेदादिविशिष्टमुद्रणपद्धत्या मुद्र्यमाणस्य द्वितीयो ह्ययं भागः सौकर्यकलितमतिपरिकल्पितः।

प्रथमे हि सार्धाध्यायद्वयरूपे दशपादात्मके विभागे संज्ञा–सन्धि–षड्लिंगरूपनिष्पत्तिकारक-समास–तदाश्रयसमवबोधकानि च प्रयोगसमु-पयोगीनि सूत्राणि संगृहीतानि, तदाधारेण चाध्येतु-रेकांगं हि व्याकरणस्य नाम्नां व्युत्पत्त्यार्थादिसमव-बोधरूपं ज्ञानं जायते, परं आख्यातसिद्धिज्ञानं तद्धित–कृदन्तविज्ञानं च विना व्याकरणं नहि सम्पूर्णशाब्दबोधे प्रत्यलं भवति।

व्याकरणं हि चतुरङ्गम् तथाहि–

- सन्धिज्ञानसहितं नाम्नां षड्लिङ्गप्रयोगनिष्पत्ति-रूपं हि ज्ञानम्।

- कारक-समासपरिज्ञानम् ।
- आख्यातपद्धतिपरिज्ञानम् ।
- तद्धित-कृदन्तनिष्पत्तिपरिज्ञानम् ।

नह्यन्यतरक्षतिवता व्याकरणपरिपठनेनाऽपि शास्त्रीयपदार्थविचारक्षमा बुद्धिस्तात्पर्यार्थं निश्चेतुं प्रत्यला भवति ।

प्रथमे हि भागे व्याकरणाध्ययनचतुरंगीयां-गद्वयसमावेशः सञ्जातः, द्वितीये चास्मिन् विभागे-ऽत्यन्तमहत्वपूर्णस्य आख्यातप्रकरणस्य समावेशोऽस्ति, तृतीये च विभागे तद्धित-कृदन्त प्रकरणं हि वैयाकरणीयानां लज्जासंरक्षकं विविधार्थ-व्युत्पत्तिसनाथशब्दप्रयोगाक्षयपात्रतुल्यं वर्यमहत्वशालि समुपन्यस्तुमीह्यते ॥

व्याकरणस्य हि पठनं केवलं शब्दव्युत्पत्तिज्ञान-मूलमेव साम्प्रते हि कालेऽभिमन्यते कैश्चिद्, न तत् सुचारु, श्रीअनुयोगद्वारसूत्रगतजिनप्रवचनानु-योगकरणाभिजात्ययोग्यतासम्पत्तये उपक्रमादिभेद-चतुष्टयावान्तरप्रकारपरिज्ञानपूर्वकगीतार्थगुरुजनोत्तंस-वर्यचरणसेवापरिलभ्यप्रवचनानुयोगस्य सदावश्यकत्वाद् ।

निरूपितं चानुयोगद्वारसूत्रे हि उपक्रमस्य प्रकारान्तरीयभेदषट्के [सू० ७०] द्वितीयभेदरूपनाम-भेदावान्तरभेदगतत्रिनाम [सू० १२४] चतुर्णाम [सू०१२५] पञ्चनाम [सू०१२६] दशनाम [सू०१३१] विवरणप्रसंगे व्याकरणगतभाषापरिमार्जनसंस्कारितापादनोपयोगि-नानापदार्थानामवबोधस्य परमावश्यकता सम्यगज्ञानमूलानुयोगयथार्थभूमिकासम्पत्तये ।

दशनामावान्तरभेदभावप्रमाणगत-सामासिकतद्धित धातु-नैरुक्तिकभेदप्ररूपणावसरे [सू० १३१] चाऽनुयोगद्वारसूत्रकारैर्व्याकरणाध्ययनस्य नितरामुपयोगिता, प्रवचनानुयोगकरणक्षमतालब्धये सूचिता वर्तते ।

*विवेचितं चैतत्सूत्राणां व्याख्याप्रसंगे मलधारि-*श्रीहेमचन्द्रसूरिपादैः सम्यग् गुरुगमेन निर्जरांगभूत-सम्यगज्ञानस्य संवरमूलकत्वापादनायार्हद्वाणीसदनुयोगपरिकर्मणया सद्गुरुचरणोपासनासमुपलभ्यया हितावहनिरूपणादिद्वारा ।

*श्रीजिनशासनहर्म्यप्रवेशद्वारवेत्रिसमेऽनुयोग-*द्वारसूत्ररत्ने प्रतिपादितपद्धत्या भाषाकीय-

ज्ञानान्यथासिद्धिनिरूपणाध्वन्या सह संवरनिर्जरांग-
भूतत्वं व्याकरणज्ञानस्यानुयोगकरणक्षमतोपलब्धये
पारम्परिकहेतुत्वेन निर्देश्यमानं सज्ज्ञानिगीतार्थगुरु-
चरणेन्दिवरोपासनया सम्यगवबुध्य समे हि व्याक-
रणं पिपठिषवः पुण्यवन्तो हि मुमुक्षवो जिनशासन-
समाराधनालक्ष्यकेन्द्रीभूतमनोवृत्तयो "जे आसवा
ते परिसवा" - इत्याचाराङ्गसूत्रप्रघोषितटङ्कशालि-
वाक्याधारेण प्रायशो मिथ्याज्ञानपरिवर्धनं हि
व्याकरणादिसाधनग्रन्थानां ज्ञानं रसवैद्योपदिष्ट-
परिकर्मितविषसंपृक्तरसायनादिसेवनं शरीरान्तरशक्ति-
क्षीणताविनाशकमपि यथा शरीरोपष्टम्भकं भवति,
तथा जिनप्रवचनानुयोगसदर्हक्षमतासम्पत्तिद्वाराऽ-
वान्तरसाधनसम्पादनरूपेण ज्ञानाचारादिमर्यादा-
नुगुण्येन नितरां गीतार्थमुनिपुङ्गवनिरीक्षणसम्प्रेक्ष-
णापुरस्सरं सम्यग्ज्ञानभूमिकासम्पादकं भवेदित्यतः
मुनिजनानां व्याकरण-न्याय-काव्यालङ्कार-शास्त्रादि-
ज्ञानं मिथ्याश्रुतान्तर्गतमपि साधनग्रन्थरूपेण ज्ञानि-
जनपरिगृहीतसापेक्षबुद्धिसनाथं सदध्यवसायनैर्म-
ल्यापादकप्रवचनानुयोगक्षमतासम्पादकं भवतीत्यतः

समाद्रियतेऽपि व्यक्ति-प्रसङ्ग-कालविशेषादिपुरस्सरं व्याकरणादि-साधनग्रन्थपरिज्ञानम् ।

इत्येवं साधुजीवनाधारस्तम्भरूपागमज्ञानान्यथासिद्धानुयोगक्षमतासम्पत्तयेऽवान्तरसाधनरूपेण गीतार्थनिश्रया यथोचितज्ञानाचारमर्यादाष्टक-सम्यक्परिपालनया च व्याकरणादिज्ञानं श्रामण्यफलावहं भवतीत्यतः समावश्यकाध्ययनव्याकरणस्याऽध्येतॄणामध्ययनादिसौकर्याय मुद्र्यमाणमिमं हि ग्रन्थरत्नं समेऽपि पिपठिषवः विद्वद् गुरुजनाभ्यासे विनयविवेक-संयम-सामाचारीपरिपालनापुरः प्रपठेयुः ॥

नहि गृहस्थपण्डिताभ्यर्णे जिनशासनमर्यादाभंगरूपेण संयमिसाधुवर्यकक्षालाघवापादनेन स्वैरं शब्दज्ञान-भाषाज्ञान-वैदुष्यसम्प्राप्तये संयम-ज्ञानाचारमर्यादाविशकलनारूपपद्धत्येति सुतरां भावदयासम्पृक्तान्तरमनःस्थितेन जिनशासनोपज्ञोत्तमसंयममर्यादारक्षणाभिप्रायेण निवेद्यते सप्रश्रयं विनीततरभंग्याऽञ्जलिबन्धादिपुरस्सरया समुचितं च समवधारणीयं श्रीमद्भिरऽनवद्यवर्यसंयमश्रीराजितसद्गुरुचरणपङ्कज--भ्रमरायमाणैः सज्ज्ञानार्थिभिः मुमुक्षुभिः श्रमणोत्तंसैः ॥

प्रान्ते चास्मिन् पुस्तके छाद्मस्थ्यसुलभा याः क्षतयो भवेयुस्तासां शुद्धिपत्रकाधारेण परिमार्जनपूर्वं सम्यग्गुरुनिश्रयोहापोहसनाथं तत्वज्ञदृष्ट्याऽध्ययन-परिशीलनादिकं कृत्वा श्रामण्यं चर्याध्ययनद्वारा ज्ञान-ध्याने सत्प्रवृत्तिं विधाय गुरुनिश्रया संयमिजीवन-परिकर्मणया सफलयेयुरिति निवेदयति श्रमण-सङ्घसेवकः- पूज्योपाध्याय श्रीधर्मसागरगणिवर्यचर-णान्तिषद्-पं. अभयसागरसंज्ञसाधूत्तंसकृपाभिलाषुकः ॥

लिखितं च महाव्रतभावनामितशताङ्के (२५००) श्रीवीरनिर्वाणाब्दे मोहनीयस्थानाधिकसमाधि स्थानमितशतप्रमिते २०३१ वैक्रमेऽब्दे आश्विनमासे शुक्लपक्षे षष्ठयां तिथौ सोमवासरे श्री भगवाननगर ( टेकरो ) सत्कजैनोपाश्रये पालडीसंज्ञशाखापुरे राजनगरीये ।

॥ शुभं भवतु श्रीसकलसङ्घस्य ॥

卐

## પ્રકાશક તરફથી....

શાસનના સ્તંભ-સમા, વિશિષ્ટ ક્ષયોપશમવાળા, શાસનાનુરાગી શ્રમણ-શ્રમણીઓના ભાષાકીય જ્ઞાનની નક્કરતા લાવનાર વ્યાકરણના જ્ઞાનને સરળતાથી મેળવવા માટે બાલ સુગમ શૈલિથી પૂ૦ કલિકાલ સર્વજ્ઞ આ૦ શ્રી હેમચંદ્રસૂરીશ્વર ભગવંતે વિરચેલ શ્રી સિદ્ધહેમશબ્દાનુશાસનની ૧૧ લાખ શ્લોક પ્રમાણ રચના વિ. સં. ૧૧૯૩ માં કરેલ.

એક પ્રસંગે પરમાર્હત કુમારપાળ મહારાજા સભામાં ચાલતી જ્ઞાનગોષ્ટીમાં વ્યાકરણનું જ્ઞાન ન હોઈ ભાષાકીય અશુદ્ધિથી પ્રભાવિત બન્યા. એટલે તેઓની વિનંતીથી તેઓના હિતાર્થે ૭ હજાર શ્લોક પ્રમાણ લઘુવૃત્તિની રચના પૂ૦ કલિકાલસર્વજ્ઞ આચાર્યશ્રીએ ૧૮૦૦૦ શ્લોક પ્રમાણ બૃહદ્દવૃત્તિના આધારે કરી.

જેનું કે ઉમંગ પૂર્વક અધ્યયન પાકીવયે પહોંચેલ પરમાર્હત કુમારપાલ મહારાજ રાજકાજમાં બીજો સમય ઓછો મળતાં પાલખીમાં જતાં-આવતાં ચાલુ

મુસાફરીએ પણ કરતા. જેનો કે નિર્દેશ મુખપૃષ્ઠપર અંકિત છે.

આવું મહાભાગ્યશાલી લઘુવૃત્તિ (છ હજારી નામે પ્રસિદ્ધ થયેલ) વ્યાકરણ વર્ત્તમાનકાળે દીક્ષા ગ્રહણ કરનારા શક્તિ સંપન્ન શ્રમણ-શ્રમણીઓને સંયમોપયોગી જીવન-ઘડતરની ભૂમિકા તૈયાર કર્યા પછી ભણવા માટે ખૂબજ જરૂરી ઉપયોગી હોઇ આ ગ્રંથનુ પ્રકાશન અવસરોચિત લાગવાથી અમારા ટ્રસ્ટ તરફથી પ્રથમ પ્રકાશિત થયેલ આવૃત્તિની નકલો ખપી જવાથી પુનઃ પ્રકાશનની વિચારણા અમોને છેલ્લા ૪-૫ વર્ષથી થયેલી, પણ યોગ્ય સંપાદન કરી આપનારના અભાવે કામ વિલંબમાં પડેલ.

અમારા સદ્‌ભાગ્યે આગમ સમ્રાટ, આગમોના તલસ્પર્શીવ્યાખ્યાતા પ્રૌઢ-પ્રવચન પ્રભાવક, આગમોદ્ધારક ધ્યાનસ્થ સ્વર્ગત પૂ૦ આચાર્યશ્રી આનંદસાગર સૂરીશ્વરજી ભગવંતના પટ્ટધર, વાત્સલ્યસિંધુ પૂ૦ ગચ્છાધિપતિ આ૦ શ્રી માણિક્યસાગરસૂરીશ્વરજી મહારાજ સામ્રાજયવર્ત્તી પૂ૦ આગમોદ્ધારક આચાર્ય દેવના શિષ્યરત્ન શ્રી સિદ્ધચક્રારાધન તીર્થોદ્ધારક સ્વ૦ પૂ૦ આ૦ શ્રી ચંદ્રસાગરસૂરિ ભગવંતના શિષ્યરત્ન પરમ તપસ્વી શાસન સંરક્ષક પૂ૦ ઉપાધ્યાય ગુરૂદેવશ્રી ધર્મસાગરજી મહારાજના શિષ્યરત્ન પૂ૦

પંન્યાસમુનિ શ્રી અભયસાગરજી મહારાજ ગણી સાથે વિ. સં. ૨૦૨૮ ના પોષ મહિને પ્રસંગોપાત વાત નિકળતાં પૂ૦ ગણિવર્યશ્રીના પોતાના આઠ બાલમુનિઓને લઘુવૃત્તિ ભણાવતી વખતે, પુસ્તકની દુર્લભતા અને ભણનારને ઉપયોગી થાય તેવા વ્યવસ્થિત સંપાદનવાળા પુસ્તકની ખામીનો સ્વાનુભવ સાંભળી અમોએ ટ્રસ્ટ તરફથી પ્રકાશન કરવા ધારેલ લઘુવૃત્તિ વ્યાકરણના પુનઃમુદ્રણની વાત રજુ કરી.

પૂ૦ પંન્યાસશ્રીએ સંપાદનની જવાબદારી સ્વીકારી જેથી અમોને ખૂબ આનંદ થયો.

પૂ૦ પંન્યાસશ્રીના સ્વાનુભવ પ્રમાણે ભણનારા બાલમુનિ કે તરૂણ શ્રમણ–શ્રમણીઓના મનોવૈજ્ઞાનિક દૃષ્ટિકોણથી ઓછા પ્રયત્ને, નક્કર શૈલિથી, ઉમંગ-ઉત્સાહપૂર્વક વ્યાકરણ જેવા ગોખણપટ્ટીપ્રધાન વિષયમાં આગળ ધપી શકે, તે આશયથી સંપાદનની આગવી શૈલિથી પૂ૦ ગણિવર્યશ્રીએ પ્રયત્નપૂર્વક આ મુદ્રણમાં ધ્યાન આપ્યું છે, જે બદલ અમો તેઓના આભારી છીએ.

અમારા સ્વ૦ પિતાજી જેશિંગભાઇ કાલીદાસ શાહે શાસન સમ્રાટ પ્રૌઢ પુણ્ય પ્રતાપી સ્વ૦ પૂ૦ આ૦ શ્રી વિજય નેમિસૂરીશ્વરજી મહારાજની દોરવણી પ્રમાણે ઘણા ધર્મકાર્યો કર્યાં છે, અને પુસ્તક ફંડ પણ આવા મહત્વના ગ્રંથોના પ્રકાશન આદિમાં વપરાયા છે.

આ પ્રસંગે પૂ૦ સ્વ૦ આ૦ શ્રી વિજય નેમિસૂરીશ્વરજી મહારાજની મંગલપ્રેરણા અને પૂજ્ય પિતાશ્રીની ઉદાત્ત ધર્મ ભાવનાની અનુમોદના કરીએ છીએ. અમારા ટ્રસ્ટના મુખ્ય કાર્યવાહક તરીકે સેવા આપનાર શ્રી મનુભાઇની પણ અપૂર્વ લાગણીની ભાવપૂર્વક અભિનંદના કરીયે છીએ કેમ કે તેઓએ જ પૂ૦ પંન્યાસજી મહારાજને વિનવીને સંપાદનકાર્ય સોંપેલું.

તેમજ દુઃખાતા દિલે અમારે નોંધ લેવાની ફરજ પડી છે કે—

તેમનો ઉમંગ ત્રણે ભાગ તુર્ત પ્રકાશિત કરવા માટે હતો પણ સંજોગોની વિષમતાએ આ બીજો ભાગ પ્રકાશિત થવા પૂર્વે તેઓ વિ. સં. ૨૦૨૯ ના ભા. સુ. ૨ ના રોજ અચાનક હાર્ટફેલ થવાથી સ્વર્ગસ્થ થયા.

તેઓની આ લઘુવૃત્તિ વ્યાકરણને વ્યવસ્થિત પ્રકાશિત કરવાની ભાવનાને અભિનંદીયે છીએ.

પૂ૦ સંપાદક મહારાજશ્રીનો સંકલ્પ હતો કે-પાઠ્ય પુસ્તક તરીકે આવા વ્યાકરણ ગ્રંથમાં એકપણ અશુદ્ધિ ન રહે, પણ દિલગીરી સાથે કબૂલવું પડે છે કે પૂ૦ મહારાજશ્રી અનેક કામોમાં વ્યસ્ત હોઇ, તેમજ દાઇપોના આકસ્મિક પરિવર્તનોના કારણે ધાર્યા કરતાં

પણ વધુ અશુદ્ધિઓ આ બીજા ભાગમાં પણ રહી જવા પામી છે.

પૂ૦ મહારાજશ્રીનું તથા પ્રેસવાળાનું આ તરફ ધ્યાન ખેંચ્યું છે. હવે પછીના ભાગમાં આવું ન બને તે માટે કાળજી રાખવા અનુરોધ કર્યો છે, દુઃખાતા દિલે શુદ્ધિપત્રક ગ્રંથની પાછળ આપેલ છે.

છેવટે દેવગુરૂ કૃપાએ આવા પરમોપયોગી પાયાના ગ્રંથ સમા વ્યાકરણના પ્રકાશનનો લાભ અમોને મળ્યો છે. તે બદલ હર્ષ વ્યક્ત કરવા સાથે અનેક પ્રવૃત્તિઓ, સતત વિહાર આદિ પ્રતિરોધ વચ્ચે પણ ઝડપી આ બીજા વિભાગનું સંપાદન કરી આપવા બદલ પૂ૦ ગણિવર્યશ્રીનો તથા આની પ્રેસકોપી આદિ કરવામાં યોગ્ય સહકાર આપનાર પૂ૦ મુનિશ્રી નરદેવસાગરજી મ૦ પૂ૦ મુનિશ્રી રવીન્દ્રસાગરજી મહારાજ, તથા છેલ્લા ૧૫ થી ૨૦ ફર્માનું પ્રૂફવાંચન, તેમજ પ્રેસકોપી, વગેરે નિઃસ્વાર્થભાવે મૂક સેવા આપનાર પં. શ્રી રતિલાલ ચી. દોશી (અધ્યાપક હેમચંન્દ્રાચાર્ય પાઠશાળા અમદાવાદ) તથા સુંદર સ્વચ્છ મુદ્રણ કરી આપનાર શ્રી બહાદુરસિંહજી પ્રિન્ટીંગ પ્રેસ-પાલીતાણાના કાર્યવાહકોનો તેમજ પૂજ્ય મહારાજશ્રીની દેખરેખ તલે વ્યાવહારિક રીતે પ્રેસ-છપાઈ આદિની સઘળી

જવાબદારી ઉઠાવનાર ચાણસ્મા નિવાસી શેઠ બાબુલાલ કેશવલાલ શાહ (હાલ ૧૧ નગરશેઠ મારકીટ રતનપોળ અમદાવાદ), મુખપૃષ્ઠનું ચિત્ર દોરી આપનાર આર્ટીસ્ટ શ્રી દલસુખભાઇ શાહ આદિના ધર્મપ્રેમની સાદર અનુમોદના કરીએ છીએ.

લી૦

વીર નિ. સં. ૨૫૦૧
વિ. સં. ૨૦૩૧
માગશર સુદ ૧

સારાભાઈ જેશિંગભાઇ
શારદાબેન મનુભાઇ જેશિંગભાઇ
ચિનુભાઈ વાડીલાલ
બકુભાઇ ભગુભાઈ
બુદ્ધિધન સારાભાઇ
કાર્યવાહકો
શેઠશ્રી જે. કા. ટ્રસ્ટ અમદાવાદ

"ज्ञानं मोहापसर्पक" मित्याभाणकमविस्मृतिमद्भिः
श्रमणैः ज्ञानाचार मर्यादया व्याकरणं पठनीयम् ॥

# ભા વ ભ રી

# વં...દ...નાં...જ...લિ

પરમ પૂજ્ય પ્રૌઢપ્રતાપી શાસન-
પ્રભાવક અનેક તીર્થોદ્ધારક
બાળ બ્રહ્મચારી શાસનસમ્રાટ્
સ્વ. પૂ૦ શ્રી ૧૦૦૮ શ્રીયુત

આચાર્યદેવશ્રી વિજય નેમિસૂરીશ્વરજી
મહારાજના
પવિત્ર ચરણુ કમલોમાં
ભાવભરી
વંદનાંજલિ.

: નિવેદક :

શારદાબેન મનુભાઇ જેશિંગભાઈ શાહ

## શાસનસમ્રાટ્ સૂરિચક્રચક્રવર્તી



કદંબગિરિતીર્થોદ્ધારક

**સ્વ. આ. મહારાજ શ્રી વિજયનેમિસૂરીશ્વરજી મહારાજ**

જન્મ વિ. સં. ૧૯૨૯ કા શુદ ૧ શનિ **મહુવા**

દીક્ષા વિ સં. ૧૯૪૫ જેઠ શુદ ૭, ભાવનગર

આચાર્ય પદ વિ સં. ૧૯૬૪ જેઠ શુદ ૫, ભાવનગર

સ્વર્ગવાસ વિ. સં. ૨૦૦૫ આસો વદ ૦)) દીવાળી શુક્ર **મહુવા**

સાહિત્ય અને સંસ્કારના અનુરાગી
સ્વ. શેઠશ્રી જેશિંગલાલ કાળીદાસ
શેર દલાલની

* જીવન ઝરમર *

સંવત ૨૦૦૨ની વાત છે. સ્વર્ગસ્થ શેઠશ્રી જેશિંગભાઇ પોતાના બે લાડકવાયા સંતાનોને લઇ પૂજ્ય શાસન સમ્રાટ્ શ્રી વિજયનેમિસૂરિશ્વરજી મહારાજ સાહેબને વંદન કરવા માટે ગયા હતા ત્યાં વાતમાં ને વાતમાં તેઓશ્રીએ આચાર્ય મહારાજને પોતાનો શુભ સંકલ્પ જણાવતાં કહ્યું-

હું મારી મિલ્કતના અમુક ભાગની રકમના વ્યાજમાંથી જે રકમ ભેગી થાય તે રકમ સાતક્ષેત્રોમ વાપરવા ઇચ્છું છું.

પૂજ્ય આચાર્ય મહારાજશ્રીએ આ શુભ સંકલ્પને આશીર્વાદ આપ્યા અને આ સખી ઉદારમના શેઠ-શ્રીએ તરત જ પોતાની અમુક મિલ્કતનું ટ્રસ્ટ કરી નાખ્યું.

આજે તો તેઓશ્રી દિવંગત થયા છે. પરંતુ તેમના એ પુણ્યકાર્યની દિવ્ય જ્યોત આજે પણ ઝગમગી રહી છે.

શાસન સમ્રાટ વિજય નેમિસૂરિજી મહારાજ સાહેબના તેઓ અનન્ય ભક્ત અને આજ્ઞાંકિત વિનેય, ગૃહસ્થ શિષ્ય હતા. તેઓશ્રીની શુભ પ્રેરણાથી તેમણે અનેક જિનમંદિરોમાં ઘણા જિનબિંબો ભરાવવામાં તેમજ પ્રતિષ્ઠા વગેરે શુભ કાર્યોમાં લક્ષ્મીના મમત્વનો ત્યાગ કરીને ઘણાં પુણ્ય કાર્યો કર્યા છે.

આ સિવાય તેઓશ્રીએ મહામંગલકારી પાપ નિવારક ને શાંતિદાયક નવકાર મહામંત્રનો વિધિપૂર્વક નવલાખનો જાપ પૂર્ણ કર્યો હતો અને તેની પૂર્ણા-હુતિના સંદર્ભમાં ભારે દબદબા પૂર્વક અને અદ્દકેરા ઉત્સાહથી શ્રી સિદ્ધચક્રનું પૂજન કરાવ્યું હતું.

શેઠશ્રી તો આજે ચાલ્યા ગયા છે. પરંતુ કેટલાક માનવી ફૂલ જેવા હોય છે. ફુલ ખરી જાય છે, પણ પાછળ પમરાટ છોડી જાય છે. તેની પાંખડી ખતમ

કળા-સાહિત્ય અને સંસ્કારના અનુરાગી



સ્વ. શેઠશ્રી જેશીંગભાઈ કાળીદાસ શેરદલાલ

| જન્મ : | સ્વર્ગવાસ : |
| --- | --- |
| સં. ૧૯૨૯ ચૈત્ર વદ ૮ | સં. ૨૦૧૦ આસો વદ ૩ |
| અમદાવાદ. | અમદાવાદ. |


થઇ જાય છે. પરંતુ તેની દરેક પાંખડી તેની મધુર સુવાસ મુકી જાય છે.

શેઠશ્રી પણ એક એવું પુણ્ય પુષ્પ હતા. આજે તેઓશ્રી નથી પણ તેમની સુવાસ આજે પણ મ્હેંક મ્હેંક થાય છે અને એ સુવાસ કાયમ રહે તે માટે તેમના સુપુત્રો શ્રી મનુભાઇ અને શ્રી સારાભાઇ તેમના પૂજ્ય પિતાશ્રી શેઠશ્રી જેશિંગભાઇ કાલીદાસ ટ્રસ્ટમાંથી પુણ્ય કાર્યોમાં પોતાના પિતાશ્રીના જેવાજ ઉત્સાહ અને ઉમંગથી ઉછળતા હૈયે સાથ અને સહકાર આપે છે.

પૂ૦ સાધુ-સાધ્વી ભગવંતોને અભ્યાસમાં ઉપ-યોગી પાઠ્ય પુસ્તકરૂપ લઘુવૃત્તિના આ પ્રકાશનના કાર્ય પ્રસંગે શેઠશ્રીની પુનિત ધર્મ ભાવનાને ગુણાનુ-રાગ પૂર્વક શ્રદ્ધાંજલિ.

લી૦


જે. કા. ટ્રસ્ટના કાર્યવાહકો



## ❀ सम्यक् समीक्षणीयम् ❀

व्याकरणस्य ज्ञानं हि शब्दबोध-जनकत्वेन भाषाकीयसौष्टवापादकं सदपि जिनाज्ञानुगतश्रामण्यपालनोद्यतानां साधु-वर्याणां तु जीवन शुद्धिकारकागमस्वाध्यायादि ज्ञानाचारमर्यादाप्रोज्जीवकं हि तत् परिणतिं निर्मलयेत् ॥

## સ્વ. શેઠશ્રી મનુભાઇ જેસિંગભાઇ શાહ



જન્મ સંવત : ૧૯૭૮
કારતક વદી ૯

સ્વર્ગવાસ સંવત :
૨૦૨૯
ભાદરવા સુદ ૧

## સ્વ. શ્રેષ્ઠિવર્ય
## શ્રી મનુભાઈ જેસિંગભાઈની
# સંક્ષિપ્ત-જીવનરેખા

ઉદાર ચરિત શેઠશ્રી મનુભાઈનો જન્મ સંવત ૧૯૬૮ના કારતક વદ ૯ના શુભ દિને થયેલ હતો, માતા-પિતાના વારસામાં મળેલા સુસંસ્કારને લીધે તેઓશ્રીનું જીવન બાલ્ય-વયથી જ ધર્માનુરાગિતા, દાનપ્રિયતા વિ. ગુણોથી સભર બન્યું હતું.

વિકટ સંયોગોમાં પણ જરા પણ મુંઝાયા સિવાય તેઓ પોતાના કાર્યમાં કુનેહભરી રીતે સફળતા મેળવતા, સાથોસાથ કષાયોથી પરાધીન ન બનતા અને વાદવિવાદમાં પણ કદાપિ ભાષાનો સંયમ ન ખોતાં વિચારપૂર્ણ અને હિતકારી જવાબ આપી સામી વ્યકિતનું દિલ જીતવામાં તેઓશ્રીએ નિપુણતા પ્રાપ્ત કરી હતી.

ધર્મ પ્રત્યેની અખૂટ શ્રદ્ધા તથા ધર્મક્રિયાનું યથાયોગ્ય આચરણ દ્વારા તેઓનું જીવન આરાધનાથી સભર બન્યું હતું. કોઈપણ પ્રકારની નામના-કીર્તિના મોહ સિવાય ગુપ્તદાન વિ. માં તેઓશ્રીની પ્રવૃત્તિ અનુમોદનીય હતી.

પ. પૂ. શાસનપ્રભાવક પ્રૌઢપ્રતિભાસંપન્ન, વૈયાકરણ-કેસરી સ્વ. પૂ. આચાર્યદેવશ્રી ચન્દ્રસાગર સૂરીશ્વરજી મ.શ્રીના પરમ વિનેય વિદ્વદ્વર્ય-પ્રવચનદક્ષ મુનિવર્યશ્રી અભ્યુદયસાગરજી મ. તથા તપસ્વી રત્ન મુનિરાજશ્રી નવરત્નસાગરજી મ. શ્રી આદિથા૦રનું ચાતુર્માસ સં. ૨૦૨૯ની સાલમાં અમદાવાદ જૈન-સોસાયટીમાં થયું. ત્યારે તેઓશ્રીની સત્પ્રેરણાથી શ્રી મનુભાઈએ

શ્રાવકોચિત—બારવ્રતો તથા નિયમો ગ્રહણ કર્યા હતા અને સુંદર રીતે પાલન કરી રહ્યાં હતા.

શ્રી નાગેશ્વરતીર્થના વહીવટમાં સારો ભાગ લીધો હતો, અને તીર્થના ટ્રસ્ટી તરીકે સારી સેવા કરી હતી અન્યતીર્થોમાં પણ યથાશક્તિ દ્રવ્યનો વ્યય કરી જીવન ધન્ય બનાવ્યું હતું.

વિ. સં. ૨૦૨૯ના શ્રી પર્યુષણપર્વના પવિત્ર દિવસોમાં ભા. સુ. ૧ના રોજ પૂ. ગુરૂદેવ મુનિરાજશ્રી અભ્યુદયસાગરજી મહારાજના શ્રીમુખથી પવિત્ર શ્રી ગણધરવાદનું શ્રવણ કરી સાંજે નિશાપોળ (ઝવેરીવાડ)માં આવેલ શ્રી જગવલ્લભ પાર્શ્વનાથ ભગવંતના ભાવપૂર્વક દર્શન કર્યા ત્યારે કયાંથી ખબર હોય કે આ અંતિમ દર્શન હશે ? દર્શન કરી...પોળના નાકે આવતાં જ ઢળી પડયા ? નવકાર મહામંત્રનું સ્મરણ કરતાં તેમનો અમર આત્મા પરલોકના પંથે પ્રયાણ કરી ગયો. જગતના ચોકમાં જે જન્મે છે. તે અવશ્ય મૃત્યુને વરે છે. પણ તેનું જ જીવન સાર્થક ગણાય છે કે જે જીવનમાં ધર્મનું આચરણ કરી જીવનને પવિત્ર બનાવે છે.

શેઠ શ્રી મનુભાઈ પણ આવા પ્રકારનું ઉચ્ચજીવન જીવી જીવનને સફળ બનાવીગયા.પ્રસ્તુત પુસ્તક પ્રકાશનની હાર્દિકપ્રેરણા આપી અપૂર્વ શ્રુતભક્તિનો લાભ ઉઠાવનાર આ પુણ્યવાનને હાર્દિક શ્રદ્ધાંજલિ અર્પી કૃતાર્થતા અનુભવીએ છીએ.

આ પુસ્તિકા સિદ્ધ હેમ વ્યાકરણ સાધુપુરૂષોને ભણવામાં અતિ ઉપયોગી અને સરળ બની રહે, તે માટે પ્રથમ ભાગ તથા બીજો ભાગ છપાવી શકાયો છે તે આજ પુણ્યાત્માના પુરૂષાર્થનું પરિણામ છે. તન–મન–ધનથી તેઓશ્રીની પ્રેરણાથી ટ્રસ્ટમાંથી આ પુસ્તક છપાવવાનો ખર્ચ તેમના શુભ પરિણામનું ફળ છે.

—સંપાદક

॥ श्री वर्धमानस्वामिने नमः ॥

तृतीयाध्यायस्य–

# तृतीयः पादः

## आख्यात–प्रकरणम्

## वृद्धिराऽऽरैदौत् । ३ । ३ । १ ।

आ आर् ऐ औ

एते प्रत्येकं वृद्धिः स्युः ।

मार्ष्टि, कार्यम्, नायकः औपगवः ॥१॥

## गुणोऽरेदोत् । ३ । ३ । २ ।

अर् एत् ओत्

एते प्रत्येकं गुणः स्युः ।

कर्त्ता, चेता, स्तोता ॥२॥

क्रियाऽर्थो धातुः । ३ । ३ । ३ ।

कृतिः=

क्रिया पूर्वापरीभूता,
सा अर्थो यस्य स
धातुः स्यात् ।
भवति, अत्ति, गोपायति,
जुगुप्सते, पापच्यते,
पुत्रकाम्यति, मुण्डयति, जवनः ॥ ३ ॥

न प्रादिर–प्रत्ययः । ३ । ३ । ४ ।

प्रादिः
धातोरवयवो
न स्यात्,
ततः पर एव धातुरित्यर्थः,
न चेत ततः परः प्रत्ययः ।
अभ्यमनायत, प्रासादीयत् ।
प्रादिरिति किम् ?
अमहापुत्रीयत् ।
अ–प्रत्यय इति किम् ?
औत्सुकायत ॥ ४ ॥

## अ-वौ दा-धौ दा । ३ । ३ । ५ ।

दा-धारूपौ धातू
अ-वितौ
'दा' स्यातम् ।

दाम्—
प्रणिदाता ।

देङ्—
प्रणिदयते ।

डुदांग्—
प्रणिददाति ।

दों—
प्रणिद्यति ।

ट्धें—
प्रणिधयति ।

डुधांग्—
प्रणिदधाति ।

अवौ इति किम् ?

<u>दांव्-</u>

दातं बर्हिः ।

<u>दैव्-</u>

अवदातं मुखम् ॥ ५ ॥

**वर्तमाना=**

तिव्-तस्-अन्ति,

सिव्-थस्-थ,

मिव्-वस्-मस् ।

ते-आते-अन्ते,

से-आथे-ध्वे,

ए-वहे-महे । ३ । ३ । ६ ।

इमानि वचनानि वर्त्तमाना स्युः ॥ ६ ॥

**सप्तमी=**

यात्-याताम्-युस्,

यास्-यातम्-यात,

याम्-याव-याम ।

ईत-ईयाताम्-ईरन्,
ईथास्-ईयाथाम्-ईध्वम्,
ईय-ईवहि-ईमहि ।३।३।७।

इमानि वचनानि सप्तमी स्युः ॥ ७ ॥

पञ्चमी=

तुव्-ताम्-अन्तु,
हि-तम्-त,
आनिव्-आवव्-आमव् ।
ताम्-आताम्-अन्ताम्,
स्व-आथाम्-ध्वम्,
ऐव्-आवहैव्-आमहैव् ।३।३।८।

इमानि वचनानि पञ्चमी स्युः ॥ ८ ॥

ह्यस्तनी=

दिव्-ताम्-अन्,
सिव्-तम्-त,
अमृव्-व-म ।

त-आताम्-अन्त,

थास्-आथाम्-ध्वम्,

इ-वहि-महि ।३।३।९।

इमानि वचनानि ह्यस्तनी स्युः ॥९॥

एताः शितः। ३ । ३ । १० ।

एताः चतस्रः शितो ज्ञेयाः ।

भवति, भवेत्, भवतु, अभवत् ॥१०॥

अद्यतनी=

दि-ताम्-अन्,

सि-तम्-त,

अम्-व-म ।

त-आताम्-अन्त,

थास्-आथाम्-ध्वम्,

इ-वहि-महि ।३।३।११।

इमानि वचनानि अद्यतनी स्युः ॥११॥

परोक्षा=

णव्-अतुस्-उस्,
थव्-अथुस्-अ,
णव्-व-म ।

ए-आते-इरे,
से-आथे-ध्वे,
ए-वहे-महे । ३ । ३ । १२ ।

इमानि वचनानि परोक्षा स्युः ॥ १२ ॥

आशीः=

क्यात्-क्यास्ताम्-क्यासुस्,
क्यास्-क्यास्तम्-क्यास्त,
क्यासम्-क्यास्व-क्यास्म ।

सीष्ट-सीयास्ताम्-सीरन्,
सीष्ठास्-सीयास्थाम्-सीध्वम्,
सीय-सीवहि-सीमहि ।३।३।१३।

इमानि वचनानि आशीः स्युः ॥ १३ ॥

श्वस्तनी=

ता-तारौ-तारस्,

तासि-तास्थस्-तास्थ,

तास्मि-तास्वस्-तास्मस् ।

ता-तारौ-तारस्,

तासे-तासाथे-ताध्वे,

ताहे-तास्वहे-तास्महे ।३।३।१४।

इमानि वचनानि श्वस्तनी स्युः ॥ १४ ॥

भविष्यन्ती=

स्यति-स्यतस्-स्यन्ति,

स्यसि-स्यथस्-स्यथ,

स्यामि-स्यावस-स्यामस् ।

स्यते-स्येते-स्यन्ते,

स्यसे-स्येथे-स्यध्वे,

स्ये-स्यावहे-स्यामहे । ३ । ३ । १५ ।

इमानि वचनानि भविष्यन्ती स्युः ॥ १५ ॥

क्रियातिपत्तिः=

स्यत्-स्याताम्-स्यन्,

स्यस्-स्यतम्-स्यत,

स्यम्-स्याव-स्याम ।

स्यत-स्येताम्-स्यन्त,

स्यथास-स्येथाम्-स्यध्वम्,

स्ये-स्यावहि-स्यामहि ।३।३।१६।

इमानि वचनानि क्रियातिपत्तिः स्युः ॥१६॥

त्रीणि त्रीणि

अन्य-युष्मद-स्मदि । ३ । ३ । १७ ।

सर्वासां विभक्तीनां

त्रीणि त्रीणि वचनानि

अन्यस्मिन्नर्थे

युष्मदर्थे

अस्मदर्थे च

वाच्ये

यथाक्रमं स्युः ।

स पचति, तौ पचतः, ते पचन्ति ।

पचते, पचेते, पचन्ते ।

त्वं पचसि, युवां पचथः, यूयं पचथ ।

पचसे, पचेथे, पचध्वे ।

अहं पचामि, आवां पचावः, वयं पचामः ।

पचे, पचावहे, पचामहे ।

एवं सर्वासु

द्वययोगे त्रययोगे च

पराश्रयमेव वचनम् ।

स च त्वं च=पचथः,

स च त्वं च अहं च=पचामः ॥१७॥

## एक-द्वि-बहुषु । ३ । ३ । १८ ।

अन्याऽऽदिषु

यानि त्रीणि त्रीणि उक्तानि

तानि एक-द्वि-बहुषु अर्थेषु

यथासङ्ख्यं स्युः ।

स पचति, तौ पचतः,

ते पचन्तीत्यादि ॥ १८ ॥

**नवाऽऽद्यानि शतृ-क्वसू च परस्मैपदम् । ३ । ३ । १९ ।**

सर्वविभक्तीनां
आद्यानि नव नव वचनानि
शतृ-क्वसू च
परस्मैपदानि स्युः ।
तिव्, तस्, अन्ति ।
सिव्, थस्, थ ।
मिव्, वस्, मस् ।
एवं सर्वासु ॥ १९ ॥

**पराणि कानाऽऽनशौ चाऽऽत्मनेपदम् । ३ । ३ । २० ।**

सर्व-विभक्तीनां
पराणि नव नव वचनानि
कानाऽऽनशौ च
आत्मनेपदानि स्युः ।
ते, आते, अन्ते ।
से, आथे, ध्वे ।

ए वहे, महे ।

एवं सर्वासु ॥ २० ॥

## तत् साप्याऽनाप्यात् कर्म-भावे कृत्य-क्त-खलर्थाश्च ।३।३।२१।

तत्=आत्मनेपदं

कृत्य-क्त-खलर्थाश्च प्रत्ययाः

सकर्मकाद् धातोः

कर्म्मणि,

अकर्मकाद् अविवक्षितकर्मकाच्च

भावे स्युः ।

क्रियते कटश्चैत्रेण,

चक्राणः, क्रियमाणः,

भूयते त्वया, भूयमानम्,

क्रियते, मृदु पच्यते,

कार्यः,

कर्त्तव्यः,

करणीयः,

देयः,

कृत्यः कटः त्वया,

शयितव्यम्, शयनीयम्, शेयम्,

कार्यम्, कर्त्तव्यम्, करणीयम्,

देयम्, कृत्यम्,

त्वया कृतः कटः,

शयितम्,

कृतं त्वया,

सुकरः कटः त्वया,

सुशयं-सुकरं त्वया,

सुकटंकराणि वीरणानि,

ईषदाढ्यम्भवं भवता,

सुज्ञानं तत्त्वं मुनिना,

सुग्लानं दीनेन,

मास आस्यते-मासमास्यते ॥ २१ ॥

इ-ङितः कर्त्तरि । ३ । ३ । २२ ।

इदितो ङितश्च धातोः
कर्त्तरि
आत्मनेपदं स्यात् ।
एधते, एधमानः,
शेते, शयानः ॥ २२ ॥

## क्रियाव्यतिहारेऽगति--हिंसा--शब्दार्थ-हसो-हृ-वह-श्चाऽनन्योऽन्यार्थे ।३।३।२३।

अन्यचिकीर्षितायाः
क्रियाया अन्येन
हरणं=करणं=
क्रियाव्यतिहारः-
तदर्थाद् गति-हिंसा-
शब्दार्थ-हस्वर्जाद् धातोः
हृ-वहिभ्यां च
कर्त्तरि
आत्मनेपदं स्यात् ।

न तु अन्योऽन्य-इतरेतर-
परस्परशब्दयोगे ।
व्यतिलुनते-
व्यतिहरन्ते-
व्यतिवहन्ते
भारम् ।
क्रियेति किम् ?
द्रव्य-व्यतिहारे मा भूत्,
चैत्रस्य धान्यं व्यतिलुनन्ति ।
गत्यर्थादिवर्जनं किम् ?
व्यतिसर्प्पन्ति, व्यतिहिंसन्ति,
व्यतिजल्पन्ति, व्यतिहसन्ति ।
अनन्योऽन्यार्थ इति किम् ?
परस्परस्य व्यतिलुनन्ति ।
कर्त्तरीत्येव ?
तेन भाव-कर्मणोः
पूर्वेणैव गत्यर्थादिभ्योऽपि स्यात्,
व्यतिगम्यन्ते ग्रामाः ॥२३॥

## नि-विशः । ३ । ३ । २४ ।

नेर्विशः
कर्त्तरि
आत्मनेपदं स्यात् ।
निविशते ॥ २४ ॥

## उपसर्गाद् अस्योहो वा । ३ । ३ । २५ ।

उपसर्गात् पराभ्यां
अस्यति-ऊहिभ्यां
कर्त्तरि
आत्मनेपदं वा स्यात् ।
विपर्यस्यते-विपर्यस्यति ।
समूहते-समूहति ॥ २५ ॥

## उत्-स्वराद् युजेर-यज्ञतत्पात्रे । ३ । ३ । २६ ।

उदः स्वरान्ताच्च
उपसर्गात् पराद्
युनक्तेः
कर्त्तरि
आत्मनेपदं स्यात्,

न चेद् यज्ञे यत् तत्पात्रं
तद्विषयो युज्यर्थः स्यात् ।
उद्युङ्क्ते, उपयुङ्क्ते ।
उत्–स्वरादिति किम् ?
संयुनक्ति ।
अ–यज्ञ–तत्पात्र इति किम् ?
द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति ॥ २६ ॥

## परि–व्यवात् क्रियः । ३ । ३ । २७ ।

एभ्यः उपसर्गेभ्यः परात्
क्रीणातेः
कर्त्तरि
आत्मनेपदं स्यात् ।
परिक्रीणीते, विक्रीणीते, अवक्रीणीते ।
उपसर्गादित्येव ?
उपरिक्रीणाति ॥ २७ ॥

## परा–वेर्जेः । ३ । ३ । २८ ।

आभ्यां परात्
जयतेः
कर्त्तरि
आत्मनेपदं स्यात् ।
पराजयते, विजयते ।
उपसर्गाभ्यामित्येव ?
बहु-वि जयति वनम् ॥ २८ ॥

**समः क्ष्णोः । ३ । ३ । २९ ।**

समः परात्
क्ष्णौतेः
कर्त्तरि
आत्मनेपदं स्यात् ।
संक्ष्णुते शस्त्रम् ।
सम इति किम् ?
क्ष्णौति ।
उपसर्गादित्येव ?
आयसं क्ष्णौति ॥ २९ ॥

**अप-स्किरः । ३ । ३ । ३० ।**

अपात्

किरतेः स–स्सट्कात्

कर्त्तरि

आत्मनेपदं स्यात् ।

अपस्किरते वृषभो हृष्टः ।

स–स्सट्निर्देशः किम् ?

अप किरति ।

अपेति किम् ?

उपस्किरति ॥ ३० ॥

## उदश्चरः साऽऽप्यात् । ३ । ३ । ३१ ।

उत्पूर्वात्

चरेः

सकर्म्मकात्

कर्त्तरि

आत्मनेपदं स्यात् ।

मार्गमुच्चरते ।

साऽऽप्यादिति किम् ?

धूम उच्चरति ॥ ३१ ॥

## समस्तृतीयया । ३ । ३ । ३२ ।

सम्-पूर्वात् चरेः
तृतीयान्तेन योगे
कर्त्तरि
आत्मनेपदं स्यात् ।
अश्वेन सञ्चरते ।
तृतीययेति किम् ?
उभौ लोकौ सञ्चरसि ॥ ३२ ॥

## क्रीडोऽकूजने । ३ । ३ । ३३ ।

कूजनं=अव्यक्तः शब्दः,
ततोऽन्यार्थात्
स-पूर्वात् क्रीडतेः
कर्त्तरि
आत्मनेपदं स्यात् ।
संक्रीडते ।
सम इत्येव ?
क्रीडति ।

अ-कूजन इति किम् ?

संक्रीडन्ति अनांसि ॥ ३३ ॥

**अन्वा-ङ्-परेः । ३ । ३ । ३४ ।**

एभ्यः परात्

क्रीडतेः

कर्त्तरि

आत्मनेपदं स्यात् ।

अनुक्रीडते,

आक्रीडते,

परिक्रीडते ॥ ३४ ॥

**शप उपलम्भने । ३ । ३ । ३५ ।**

उपलम्भनं=प्रकाशनं शपथो वा,

तदर्थात्

शपतेः

कर्त्तरि

आत्मनेपदं स्यात् ।

मैत्राय शपते ।

उपलम्भन इति किम् ?
मैत्रं शपति ॥ ३५ ॥

## आशिषि नाथः । ३ । ३ । ३६ ।

आशीरर्थादेव नाथेः
कर्त्तरि
आत्मनेपदं स्यात् ।
सर्प्पिषो नाथते ।
आशि षीति किम् ?
मधु नाथति ॥ ३६ ॥

## भुनजोऽत्राणे । ३ । ३ । ३७ ।

पालनादन्यार्थाद्
भुनक्तेः
कर्त्तरि
आत्मनेपदं स्यात् ।
ओदनं भुङ्क्ते ।
भुनज इति किम् ?
ओष्ठौ निर्भुजति ।

अ-त्राण इति किम् ?

पृथ्वीं भुनक्ति ॥ ३७ ॥

## हृगो गत-ताच्छील्ये । ३ । ३ । ३८ ।

गतं-सादृश्यं,

हृगो गत-ताच्छील्यार्थात्

कर्त्तरि

आत्मनेपदं स्यात् ।

पैतृकमश्वा अनुहरन्ते, पितुरनुहरन्ते ।

गत इति किम् ?

पितुर्हरति=चोरयतीत्यर्थः ।

ताच्छील्यादिति किम् ?

नटा राममनुहरति ॥ ३८ ॥

## पूजा-ऽऽचार्यक-भृत्यु-त्क्षेप-ज्ञान-विगणन-व्यये नियः । ३ । ३ । ३९ ।

पूजादिषु गम्येषु

नियः कर्त्तरि

आत्मनेपदं स्यात् ।

नयते विद्वान् स्याद्वादे,
माणवकमुपनयते,
कर्मकरानुपनयते,
शिशुमुदानयते,
नयते तत्त्वार्थे,
मद्राः कारं विनयन्ते,
शतं विनयते ।
एषु इति किम् ?
अजां नयति ग्रामम् ॥ ३९ ॥

## कर्त्तृस्थामूर्त्ताऽऽप्यात् । ३ । ३ । ४० ।

कर्त्तृस्थं अमूर्त्तं कर्म्म यस्य—
—तस्मात्
नियः कर्तरि
आत्मनेपदं स्यात् ।
श्रमं विनयते ।
कर्तृस्थेति किम् ?
चैत्रो मैत्रस्य मन्युं विनयति ।

अ—मूर्त्तेति किम् ?

गडुं विनयति ।

आप्येति किम् ?

बुद्ध्या विनयति ॥ ४० ॥

## शदेः शिति । ३ । ३ । ४१ ।

शिद्विषयात्

शदेः

कर्त्तरि

आत्मनेपदं स्यात् ।

शीयते ।

शितीति किम् ?

शत्स्यति ॥ ४१ ॥

## म्रियतेरद्यतन्याशिषि च । ३ । ३ । ४२ ।

अद्यतन्याशीर्विषयात्

शिद्विषयात् च

म्रियतेः कर्त्तरि

आत्मनेपदं स्यात् ।

अमृत, मृषीष्ट, म्रियते ।

अद्यतन्याऽऽशिषि च इति किम् ?

ममार ॥ ४२ ॥

**क्यङ्‌षा नवा । ३ । ३ । ४३ ।**

क्यङ्षन्तात्

कर्त्तरि

आत्मनेपदं वा स्यात् ।

निद्रायति—निद्रायते ॥ ४३ ॥

**द्युद्भ्योऽद्यतन्याम् । ३ । ३ । ४४ ।**

द्युतादिभ्यः

अद्यतनीविषये

कर्त्तरि

आत्मनेपदं वा स्यात् ।

व्यद्युतत्, व्यद्योतिष्ट ।

अरुचत्, अरोचिष्ट ।

अद्यतन्यामिति किम् ?

द्योतते ॥ ४४ ॥

**वृद्भ्यः स्य-सनोः । ३ । ३ । ४५ ।**

वृदादेः पञ्चतः
स्यादौ प्रत्यये सनि च विषये
कर्त्तरि
आत्मनेपदं वा स्यात् ।
वर्त्स्यति–वर्त्तिष्यते ।
विवृत्सति–विवर्त्तिषते ।
स्य–सनोरिति किम् ?
वर्त्तते ॥ ४५ ॥

## कृपः श्वस्तन्याम् । ३ । ३ । ४६ ।

कृपः
श्वस्तनीविषये
कर्त्तरि
आत्मनेपदं वा स्यात् ।
कल्प्तासि–कल्पितासे ॥ ४६ ॥

## क्रमोऽनु–पसर्गात् । ३ ३ । ४७ ।

अ–विद्यमानोपसर्गात्
क्रमतेः
कर्त्तरि

आत्मनेपदं वा स्यात् ।

क्रमते, क्रामति ।

अनुपसर्गादिति किम् ?

अनुक्रामति ॥ ४७ ॥

## वृत्ति-सर्ग-तायने । ३ । ३ । ४८ ।

वृत्तिः=अप्रतिबन्धः,

सर्गः=उत्साहः,

तायनं=स्फीतता,

एतद्वृत्तेः क्रमेः

कर्त्तरि

आत्मनेपदं स्यात् ।

शास्त्रेऽस्य क्रमते बुद्धिः,

सूत्राय क्रमन्तेऽस्मिन् योगाः ॥४८॥

## परो-पात् । ३ । ३ । ४९ ।

आभ्यामेव परात् क्रमेः

वृत्त्याद्यर्थात्

कर्त्तरि

आत्मनेपदं स्यात् ।

पराक्रमते, उपक्रमते, ।

परो-पादिति किम् ?

अनुक्रामति

वृत्त्यादौ इत्येव ?

पराक्रामति ॥ ४९ ॥

## वेः स्वार्थे । ३ । ३ । ५० ।

स्वार्थः=पादविक्षेपः,

तदर्थाद् विपूर्वात्

क्रमेः

कर्त्तरि

आत्मनेपदं स्यात् ।

साधु विक्रमते गजः ।

स्वाऽर्थ इति किम् ?

गजेन विक्रामति ॥ ५० ॥

## प्रो-पाद् आरम्भे । ३ । ३ । ५१ ।

आरम्भार्थात्

प्रो-पाभ्यां परात्

क्रमेः

कर्त्तरि

आत्मनेपदं स्यात् ।

प्रक्रमते–उपक्रमते भोक्तुम् ।

आरम्भ इति किम् ?

प्रक्रामति=यातीत्यर्थः ॥ ५१ ॥

## आङो ज्योतिरुद्गमे । ३ । ३ । ५२ ।

आङः परात्

क्रमेः

चन्द्राद्युद्गमाऽर्थात्

कर्त्तरि

आत्मनेपदं स्यात् ।

आक्रमते चन्द्रः–सूर्यो वा ।

ज्योतिरुद्गम इति किम् ?

आक्रामति बटुः कुतुपम्,

धूम आक्रामति ॥ ५२ ॥

## दागोऽ–स्वाऽऽस्यप्रसार–विकाशे । ३ । ३ । ५३ ।

स्वाऽऽस्यप्रसार-विकाशाभ्यामन्यार्थाद्
आङ्पूर्वाद् दागः
कर्त्तरि
आत्मनेपदं स्यात् ।
विद्यामादत्ते ।
स्वाऽऽस्यादिवर्जनं किम् ?
उष्टो मुखं व्याददाति,
कूलं व्याददाति ॥ ५३ ॥

**नु-प्रच्छः । ३ । ३ । ५४ ।**

आङ्पूर्वाद्
नुतेः प्रच्छेश्च
कर्त्तरि
आत्मनेपदं स्यात् ।
आनुते शृगालाः
आपृच्छते गुरून् ॥ ५४ ॥

**गमेः क्षान्तौ । ३ । ३ । ५५ ।**

कालहरणार्थाद् गमयतेः
आङ्पूर्वात्

कर्त्तरि

आत्मनेपदं स्यात् ।

आगमयते गुरुम् ?

कञ्चित् कालं प्रतीक्षते ।

क्षान्तौ इति किम् ?

विद्यामागमयति ॥ ५५ ॥

ह्वः स्पर्द्धे । ३ । ३ । ५६ ।

आङ्पूर्वाद्

ह्वयतेः

स्पर्द्धे गम्ये

कर्त्तरि

आत्मनेपदं स्यात् ।

मल्लो मल्लमाह्वयते ।

स्पर्द्ध इति किम् ?

गामाह्वयति ॥ ५६ ॥

संनिवेः । ३ । ३ । ५७ ।

एभ्यो ह्वयतेः कर्त्तरि आत्मनेपदं स्यात् । संह्वयते, निह्वयते, विह्वयते ॥ ५७ ॥

**उपात् । ३ । ३ । ५८ ।**

उपात् ह्वयतेः कर्त्तरि आत्मनेपदं स्यात् उपह्वयते ॥ ५८ ॥

**यमः स्वीकारे । ३ । ३ । ५९ ।**

उपाद् यमेः स्वीकारार्थात् कर्त्तरि आत्मनेपदं स्यात् ।

कन्यम् उपयच्छते,

उपायंस्त महास्त्राणि ।

च्वि-निर्देश इति किम् ?

शाटकान् उपयच्छति ॥ ५९ ॥

**देवाऽर्चा-मैत्री-सङ्गम-पथिकर्तृक-मन्त्रकरणे स्थः ।३।३।६०।**

एतदर्थात्

उपपूर्वात् तिष्ठतेः

कर्त्तरि

आत्मनेपदं स्यात् ।

देवार्चा=जिनेन्द्रमुपतिष्ठते ।

मत्री=रथिकानुपतिष्ठते ।

सङ्गमः=यमुना गङ्गामुपतिष्ठते ।

पन्थाः कर्त्ता यस्य तत्र=श्रुघ्नमुपतिष्ठते पन्थाः ।

मन्त्रः करणं यस्य=ऐन्द्रया-

गार्हपत्यमुपतिष्ठते ॥ ६० ॥

वा लिप्सायाम् । ३ । ३ । ६१ ।

उपात् स्थो

लिप्सायां गम्यमानायां

कर्त्तरि

आत्मनेपदं वा स्यात् ।

भिक्षुः दातृकुलं उपतिष्ठते—उपतिष्ठति वा ॥६१॥

उदोऽनूर्ध्वेहे । ३ । ३ । ६२ ।

अनूर्ध्वा या ईहा=चेष्टा तदर्थाद्

उत्पूर्वात् स्थः

कर्त्तरि

आत्मनेपदं स्यात् ।

मुक्तावुत्तिष्ठते ।

अनूर्ध्वेति किम् ?

आसनादुत्तिष्ठति ।

ईहेति किम् ?

ग्रामात् शतमुत्तिष्ठति ॥ ६२ ॥

सं-वि-प्रा-ऽवात् । ३ । ३ । ६३ ।

एभ्यः परात्

स्थः कर्त्तरि
आत्मनेपदं स्यात् ।
संतिष्ठते, वितिष्ठते,
प्रतिष्ठते, अवतिष्ठते ॥ ६३ ॥

**ज्ञीप्सा-स्थेये । ३ । ३ । ६४ ।**

ज्ञीप्सा=आत्मप्रकाशनम् ।
स्थेयः=सभ्यः ।
ज्ञीप्सायां स्थेयविषयार्थे च
वर्त्तमानात्
स्थः
कर्त्तरि
आत्मनेपदं स्यात् ।
तिष्ठते कन्या छात्रेभ्यः
त्वयि तिष्ठते विवादः ॥ ६४ ॥

**प्रतिज्ञायाम् । ३ । ३ । ६५ ।**

अभ्युपगमार्थात्
स्थः

कर्त्तरि

आत्मनेपदं स्यात् ।

नित्यं शब्दमातिष्ठते ॥ ६५ ॥

**समो गिरः । ३ । ३ । ६६ ।**

संपूर्वाद् गिरः

प्रतिज्ञार्थात्

कर्त्तरि

आत्मनेपदं स्यात् ।

स्याद्वादं सङ्गिरते ॥ ६६ ॥

**अवात् । ३ । ३ । ६७ ।**

अवाद् गिरः

कर्त्तरि

आत्मनेपदं स्यात् ।

अवगिरते ॥ ६७ ॥

**निह्नवे ज्ञः । ३ । ३ । ६८ ।**

निह्नवः=अपलापः,

तद्वृत्तेर्ज्ञः

कर्त्तरि
आत्मनेपदं स्यात् ।
शतमपजानीते ॥ ६८ ॥

**सं-प्रतेर-स्मृतौ । ३ । ३ । ६९ ।**

स्मृतेरन्यार्थात्
सं–प्रतिभ्यां पराद्
ज्ञः
कर्त्तरि
आत्मनेपदं स्यात् ।
शतं संजानीते–प्रतिजानीते ।
अ-स्मृताविति किम् ?
मातुः संजानाति ॥ ६९ ॥

**अन–नोः सनः । ३ । ३ । ७० ।**

सन्नन्ताद् ज्ञः
कर्त्तरि
आत्मनेपदं स्यात् ।
न तु अनोः परात् ।
धर्म्मं जिज्ञासते ।

अन-नोरिति किम् ?

धर्म्मं अनु-जिज्ञासति ॥ ७० ॥

श्रुवोऽनाङ्-प्रतेः । ३ । ३ । ७१ ।

सन्नन्तात् शृणोतेः

कर्त्तरि

आत्मनेपदं स्यात् ।

न तु

आङ्-प्रतिभ्यां परात् ।

शुश्रूषते गुरून् ।

अनाङ्-प्रतेरिति किम् ?

आशुश्रूषति, प्रतिशुश्रूषति ॥ ७१ ॥

स्मृ-दृशः । ३ । ३ । ७२ ।

आभ्यां सन्नन्ताभ्यां

कर्त्तरि

आत्मनेपदं स्यात् ।

सुस्मूर्षते, दिदृक्षते ॥ ७२ ॥

शको जिज्ञासायाम् । ३ । ३ । ७३ ।

शको ज्ञानानुसंहितार्थात्

सन्नन्तात्

कर्त्तरि

आत्मनेपदं स्यात् ।

विद्यां शिक्षते ।

जिज्ञासायामिति किम् ?

शिक्षति ॥ ७३ ॥

**प्राग्वत् । ३ । ३ । ७४ ।**

सनः पूर्वो यो धातुः

तस्मादिव सन्नन्तात्

कर्त्तरि

आत्मनेपदं स्यात् ।

शिशयिषते, अश्वेन संचिचरिषते ॥७४॥

**आमः कृगः । ३ । ३ । ७५ ।**

आमः परात् अनुप्रयुक्तात् कृगः

आम एव प्राग् यो धातुः

तस्मादिव

कर्त्तरि

आत्मनेपदं स्यात् ।

भवति, न भवति च
इति विधि-निषेधौ अतिदिश्येते ।
ईहाञ्चक्रे, बिभराञ्चकार ।
कृग इति किम् ?
ईक्षामास ॥ ७५ ॥

गन्धना-ऽवक्षेप-सेवा-
साहस-प्रतियत्न-
प्रकथनो-पयोगे
। ३ । ३ । ७६ ।

एतदर्थात् कृगः
कर्त्तरि
आत्मनेपदं स्यात्,
गन्धनं=द्रोहेण परदोषोद्घाटनम्=उत्कुरुते ।
अवक्षेपः=कुत्सनम्-दुर्वृत्तान् अवकुरुते ।
सेवा=महामात्रानुपकुरुते ।
साहसं=अविमृश्य प्रवृत्तिः-
परदारान् प्रकुरुते ।

प्रतियत्नः=गुणान्तराऽऽधानम्-
एधोदकस्य उपस्कुरुते ।
प्रकथनम्=जनापवादान् प्रकुरुते ।
उपयोगः=धर्मादौ विनियोगः-
शतं प्रकुरुते ॥ ७६ ॥

अधेः प्रसहने । ३ । ३ । ७७ ।

अधेः परात् कृगः
प्रसहनार्थात्
कर्त्तरि
आत्मनेपदं स्यात् ।
प्रसहनं=पराभिभवः,
परेण पराजयो वा,
तं ह्यधिचक्रे ।
प्रसहन इति किम् ?
तमधिकरोति ॥ ७७ ॥

दीप्ति-ज्ञान-यत्न-विमति-
उपसंभाषा-उपमन्त्रणे वदः
। ३ । ३ । ७८ ।

एष्वर्थेषु गम्येषु

वदः
कर्त्तरि
आत्मनेपदं स्यात् ।
दीप्तिः=भासनम्—वदते विद्वान् स्याद्वादे ।
ज्ञाने=वदते धीमान् तत्त्वार्थे ।
यत्ने=तपसि वदते ।
नानामतिः=विमतिः—धर्म्मे विवदन्ते ।
उपसंभाषा=उपसान्त्वनम्—
कर्म्मकरानुपवदते ।
उपमन्त्रणं=रहस्युपच्छन्दनम्—
कुलभार्यामुपवदते ॥ ७८ ॥

**व्यक्तवाचां सहोक्तौ । ३ । ३ । ७९ ।**

व्यक्तवाचो=रूढ्या मनुष्यादयः
तेषां
संभूयोच्चारणार्थाद् वदः
कर्त्तरि
आत्मनेपदं स्यात् ।
संप्रवदन्ते ग्राम्याः ।

व्यक्तवाचां इति किम् ?
संप्रवदन्ति शुकाः ।
सहोक्तौ इति किम् ?
(चैत्रेणोक्ते) मैत्रो वदति ॥७९॥

**विवादे वा । ३ । ३ । ८० ।**

विरुद्धार्थो वादो=विवादः,
व्यक्तवाचां
विवादरूपसहोक्त्यर्थाद् वदः
कर्त्तरि
आत्मनेपदं वा स्यात् ।
विप्रवदन्ते—विप्रवदन्ति वा मौहूर्त्ताः ।
विवाद इति किम् ?
संप्रवदन्ते वैयाकरणाः ।
सहोक्तौ इत्येव ?
मौहूर्त्तो मौहूर्त्तेन क्रमाद् विप्रवदति ॥८०॥

**अनोः कर्म्मण्यसति । ३ । ३ । ८१ ।**

व्यक्तवाचां अर्थे वर्त्तमानात्
अनुपूर्वाद् वदः

कर्म्मणि असति
कर्त्तरि
आत्मनेपदं स्यात् ।
अनुवदते चैत्रो मैत्रस्य ।
कर्मण्यसतीति किम् ?
उक्तमनुवदति ।
व्यक्तवाचां इत्येव ? अनुवदति वीणा ॥८१॥

ज्ञः । ३ । ३ । ८२ ।

जानातेः कर्म्मणि असति
कर्त्तरि
आत्मनेपदं स्यात् ।
सर्प्पिषो जानीते ।
कर्म्मणि असतीत्येव ?
तैलं सर्प्पिषो जानाति ॥ ८२ ॥

उपात् स्थः । ३ । ३ । ८३ ।

अतः कर्म्मणि असति
कर्त्तरि

आत्मनेपदं स्यात् ।

योगे योगे उपतिष्ठते ।

कर्मणि असतीत्येव ?

राजानमुपतिष्ठति ॥ ८३ ॥

**समो गम्-ऋच्छि-**

**प्रच्छि-श्रु-विद्-स्वरति-**

**अर्त्ति-दृशः । ३ । ३ । ८४ ।**

संपूर्वेभ्यः एभ्यः

कर्म्मणि असति

कर्त्तरि

आत्मनेपदं स्यात् ।

सङ्गच्छते, समृच्छिष्यते,

संपृच्छते, संशृणुते,

संवित्ते, संस्वरते,

समृच्छते, समियृते,

संपश्यते ।

कर्मण्यसतीत्येव ?

सङ्गच्छति मैत्रम् ॥ ८४ ॥

**वेः कृगः शब्दे चाऽनाशे ।३।३।८५।**

अ-नाशार्थाद्
विपूर्वात् कृगः
कर्म्मणि असति,
शब्दे च कर्मणि
कर्त्तरि
आत्मनेपदं स्यात् ।
विर्वकुते सैन्धवाः ।
क्रोष्टा विकुरुते स्वरान् ।
शब्दे चेति किम् ?
विकरोति मृदम् ?
अ-नाश इति किम् ?
विकरोत्यध्यायम् ॥४५॥

**आङो यम-हनः, स्वेऽङ्गे च ।३।३।८६।**

आङः पराभ्यां
यम-हनभ्यां
कर्मणि असति

कर्त्तुः,

स्वेऽङ्गे च कर्मणि

कर्त्तरि

आत्मनेपदं स्यात् ।

आयच्छते-आहते वा ।

स्वेऽङ्गे,=आयच्छते-आहते वा पादम् ।

स्वेऽङ्गे चेति किम् ?

आयच्छति रज्जुम् ॥ ८६ ॥

**व्युदस्तपः । ३ । ३ । ८७ ।**

आभ्यां परात्

तपेः

कर्म्मणि असति

स्वेऽङ्गे च कर्म्मणि

कर्त्तरि

आत्मनेपदं स्यात् ।

वितपते-उत्तपते रविः ।

वितपते-उत्तपते पाणिम् ॥ ८७ ॥

**अ-णिकर्म-णिकर्तृकाद्**
**णिगो-ऽस्मृतौ । ३ । ३ । ८८ ।**

अ-णिगवस्थायां यत् कर्म
तदेव णिगवस्थायां कर्त्ता यस्य--
तस्माद्
णिगन्तात्
अस्मृत्यर्थात्
कर्त्तरि
आत्मनेपदं स्यात्।
आरोहयते हस्ती हस्तिपकान्।
अ-णिग् इति किम्?
आरोहयति हस्तिपकान् महामात्रः,
आरोहयन्ति महामात्रेण हस्तिपकाः।
गित् किम्?
गणयते गणो गोपालकम्।
कर्मेति किम्?
दर्शयति प्रदीपो भृत्यान्।
णिग् इति किम्?
लुनाति केदारं चैत्रः,
-लूयते केदारः स्वयमेव,
तं प्रयुङ्क्ते-

लावयति केदारं चैत्रः।

कर्त्तेति किम्?

आरोहन्ति हस्तिनं हस्तिपकाः

तान् एनं आरोहयति महामात्रः।

णिग इति किम्?

आरोहन्ति हस्तिनं हस्तिपकाः,

तान् आरोहयते हस्ती

इति अणिगि मा भूत्।

अ-स्मृतौ इति किम्?

स्मरयति वनगुल्मः कोकिलम् ॥ ८८ ॥

**प्रलम्भे गृधि-वञ्चेः। ३। ३। ८९।**

आभ्यां णिगन्ताभ्यां

प्रलम्भनार्थाभ्यां

कर्त्तरि आत्मनेपदं स्यात्।

बटुं गर्द्धयते—वञ्चयते वा।

प्रलम्भ इति किम्।

श्वानं गर्द्धयति ॥ ८९ ॥

## लीङ्-लिनोऽर्चाऽभिभवे चाऽऽत् चाऽकर्त्तर्यपि । ३ । ३ । १० ।

आभ्यां णिगन्ताभ्यां
अर्चा-ऽभिभ-वप्रलम्भार्थाभ्यां
कर्त्तरि
आत्मनेपदं स्याद्,
आत् अनयोःअकर्त्तरि अपि ।
अर्चा,-जटाभिरालापयते ।
अभिभवः,-श्येनो वर्तिकामपलापयते ।
प्रलम्भः,-कस्त्वामुल्लापयते ?,
अ-कर्त्तर्यपीति किम ?
जटाभिरालाप्यते जटिलेन ॥ १० ॥

## स्मिङः प्रयोक्तुः स्वार्थे । ३ । ३ । ११ ।

प्रयोक्तृतो यः स्वार्थः स्मयः
तदर्थात् णिगन्तात् स्मिङः
कर्त्तरि
आत्मनेपदं स्याद्,

आत् च अस्य अ-कर्त्तरि अपि ।
जटिलो विस्मापयते ।
प्रयोक्तुः स्वार्थ इति किम् ?
रूपेण विस्मापयति ।
अ-कर्त्तर्यपीत्येव ?
विस्मपनम् ॥ ९१ ॥

## बिभेतेर्भीष् च । ३ । ३ । ९२ ।

प्रयोक्तृतः स्वार्थवृत्तेः
ण्यन्ताद् भियः
कर्त्तरि
आत्मनेपदं स्याद्,
अस्य च भिष्,
पक्षे आत् च अ-कर्त्तरि अपि ।
मुण्डो भीषयते—भापयते वा ।
प्रयोक्तुः स्वार्थ इत्येव ?
कुञ्चिकया भापयति ।
अ-कर्त्तर्यपीत्येव ?
भीषा, भापनम् ॥ ९२ ॥

## मिथ्याकृगोऽभ्यासे । ३ । ३ । ९३ ।

मिथ्यायुक्तात् कृगो ण्यन्तात्
क्रियाऽभ्यासवृत्त्यर्थात्
कर्त्तरि
आत्मनेपदं स्यात् ।
पदं मिथ्या कारयते ।
मिथ्येति किम् ?
पदं साधु कारयति ?
अभ्यास इति किम् ।
सकृत् पदं मिथ्या कारयति ॥ ९३ ॥

## परिमुहा-ऽऽयमा-ऽऽयस-पा-ट्धे-वद-वस-दमा-ऽद-रुच-नृतः फलवति ।३। ३ । ९४ ।

प्रधानफलवति कर्त्तरि
एभ्यो विवक्षितेभ्यो
णिगन्तेभ्य
आत्मनेपदं स्यात् ।
परिमोहयते चैत्रम्,

आयामयते सर्पम्,
आयासयते मैत्रम्,
पाययते बटुम्,

धापयते शिशुम्,
वाध्यते बटुम्
वासयते पान्थम्,

दमयते अश्वम्,
आदयते चैत्रेण,
रोचयते मैत्रम्,
नर्त्तयते नटम् ॥ ९४ ॥

## ई-गितः । ३ । ३ । ९५ ।

ईदितो गितश्च धातोः
फलवति कर्त्तरि
आत्मनेपदं स्यात् ।

यजते, कुरुते ।
फलवतीत्येव ?
यजन्ति कुर्वन्ति ॥ ९५ ॥

## ज्ञोऽनुपसर्गात् । ३ । ३ । ९६ ।

अतः
फलवति कर्त्तरि
आत्मनेपदं स्यात् ।
गां जानीते ।
फलवतीत्येव ?
परस्य गां जानाति ॥ ९६ ॥

## वदोऽपात् । ३ । ३ । ९७ ।

अतः
फलवति कर्त्तरि
आत्मनेपदं स्यात् ।
एकान्तमपवदते,
फलवतीत्येव ?
अपवदति परं स्वभावात् ॥९७॥

## समुदाङो यमेरऽग्रन्थे । ३ । ३ । ९८ ।

एभ्यः पराद् यमेः
अग्रन्थविषये

फलवत्कर्त्तरि
आत्मनेपदं स्यात् ।
संयच्छते व्रीहीन्,
उद्यच्छते भारम्,
आयच्छते भारम्
अ-ग्रन्थ इति किम् ?
चिकित्सामुद्यच्छति ।
फलवतीत्येव ?
संयच्छति ॥ ९८ ॥

पदा-न्तरगम्ये वा । ३ । ३ । ९९ ।

प्रकान्तसूत्रपञ्चके
यत् आत्मनेपदं उक्तं
तत्
पदाऽन्तरगम्ये
फलवत्-कर्त्तरि
वा स्यात् ।
स्वं शत्रुं परिमोहयते-परिमोहयति वा ।
स्वं यज्ञं जयते-जयति वा ।

स्वां गां जानीते-जानाति वा।

स्वं शत्रुमपवदते-अपवदति वा।

स्वान् व्रीहीन् संयच्छते-संयच्छति वा ॥९९॥

## शेषात् परस्मै । ३ । ३ । १०० ।

येभ्यो धातुभ्यो

येन विशेषेण

आत्मनेपदमुक्तं

ततोऽन्यस्मात्

कर्त्तरि

परस्मैपदं स्यात्।

भवति, अत्ति ॥१००॥

## पराऽनोः कृगः । ३ । ३ । १०१ ।

पराऽनुपूर्वात् कृगः

कर्त्तरि

परस्मैपदं स्यात्।

पराकरोति, अनुकरोति ॥ १०१ ॥

**प्रत्य-भ्य-तेः क्षिपः । ३ । ३ । १०२ ।**

एभ्यः परात्
क्षिपः
कर्त्तरि
परस्मैपदं स्यात् ।
प्रतिक्षिपति,
अभिक्षिपति,
अतिक्षिपति ॥१०२॥

**प्राद् वहः । ३ । ३ । १०३ ।**

अतः
कर्त्तरि
परस्मैपदं स्यात् ।
प्रवहति ॥ १०३ ॥

**परेर्मृषश्च । ३ । ३ । १०४ ।**

परेः परात्
मृषेःवहेश्च
कर्त्तरि

परस्मैपदं स्यात् ।

परिमृष्यति, परिवहति ॥ १०४ ॥

**व्या-ङ-परे रमः । ३ । ३ । १०५ ।**

एभ्यः पराद् रमेः कर्त्तरि परस्मैपदं स्यात् ।

विरमति, आरमति, परिरमति ॥ १०५ ॥

**वोपात् । ३ । ३ । १०६ ।**

उपाद् रमेः कर्त्तरि परस्मैपदं वा स्यात् ।

भार्यामुपरमति–उपरमते वा ॥ १०६ ॥

**अ-णिगि प्राणिकर्तृकाऽनाप्यात् णिगः । ३ । ३ । १०७ ।**

अ-णिगवस्थायां यः

अप्राणिकर्तृकःअकर्मकश्च धातुः

तस्मात् णिगन्तात्

कर्त्तरि

परस्मैपदं स्यात् ।

आसयति चैत्रम् ।

अ-णिगीति किम् ?

स्वयमेवारोहयमाणं

गजं प्रयुङ्क्ते-

आरोहयते ।

अणिगइति गकारः किम् ?

चेतयमानं प्रयुङ्क्ते-चेतयते ।

प्राणिकर्तृकादिति किम् ?

शोषयते व्रीहीन् आतपः ।

अनाप्यात् इति किम् ?

कटं कारयते ॥ १०७ ॥

चल्या-हारार्थेङ्-बुध-युध-प्रु-द्रु-स्रु-नश-

जनः । ३ । ३ । १०८ ।

चल्याऽऽहारार्थेभ्यः
इङादिभ्यश्च
णिगन्तेभ्यः
कर्त्तरि
परस्मैपदं स्यात् ।
चलयति,
कम्पयति,
भोजयति,
आशयति चैत्रमन्नम्,
सूत्रमध्यापयति शिष्यम्,
बोधयति पद्मं रविः,
योधयति काष्ठानि,
प्रावयति राज्यम्,
द्रावयति अपः
स्रावयति तैलम्,
नाशयति पापम्,
जनयति पुण्यम् ॥ १०८ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ तृतीयस्वाध्यायस्य तृतीयः पादः समाप्तः ॥३॥३॥

॥ श्री वर्धमानस्वामिने नमः ॥

तृतीयाध्यायस्य–

# चतुर्थः पादः

## गुपौ-धूप-विच्छि-पणि-पनेरायः । ३ । ४ । १ ।

एभ्यो धातुभ्यः
स्वार्थे
आयः स्यात् ।
गोपायति, धूपायति विच्छायति,
पणायति, पनायति ॥ १ ॥

## कमेर्णिङ् । ३ । ४ । २ ।

कमेः
स्वार्थे
णिङ् स्यात् ।
कामयते ॥ २ ॥

**ऋतेर्ङीयः । ३ । ४ । ३ ।**

ऋतेः

स्वार्थे

ङीयः स्यात् ।

ऋतीयते ॥ ३ ॥

**अ-शवि ते वा । ३ । ४ । ४ ।**

गुपादिभ्यः

अ-शव्विषये

ते आयादयो

वा स्युः ।

गोपायिता-गोप्ता ।

कामयिता-कमिता ।

ऋतीयिता-अर्त्तिता ॥ ४ ॥

**गुप्-तिजो गर्हा-क्षान्तौ सन् ।३।४।५।**

गुपः

गर्हायां

तिजः

क्षान्तौ वर्त्तमानात्
स्वार्थे सन् स्यात्
जुगुप्सते, तितिक्षते ।
गर्हा-क्षान्तौ इति किम् ?
गोपनम्, तेजनम् ॥ ५ ॥

**कितः संशय-प्रतीकारे । ३ । ४ । ६ ।**

कितः संशय-प्रतीकारार्थात्
स्वार्थे
सन् स्यात् ।
विचिकित्सति मे मनः,
व्याधिं चिकित्सति ।
संशय-प्रतीकारार्थ इति किम्?
केतयति ॥ ६ ॥

**शान्-दान्-मान्-बधाद् निशानाऽऽर्जव-विचार-वैरूप्ये दीर्घश्चेतः । ३ । ४ । ७ ।**

एभ्यः
यथासङ्ख्यं

निशानाद्यर्थेभ्यः
स्वार्थे
सन् स्यात्,
दीर्घश्चैषां
द्वित्वे
पूर्वस्य ।
शीशांसति, दीदांसति,
मीमांसते, बीभत्सते ।
अर्थोक्तिः किम् ?
अर्थान्तरे मा भूत् ?
निशानम्, अवदानम्,
मानयति, बाधयति ॥ ७ ॥

धातोः कण्ड्वादेर्यक् । ३ । ४ । ८ ।

एभ्योः धातुभ्यः
स्वार्थे
यक् स्यात् ।
कण्डूयति, कण्डूयते, महीयते ।
धातोरिति किम् । कण्डूः ॥ ८ ॥

## व्यञ्जनादेरेकस्वराद् भृशाऽऽभीक्ष्ण्ये यङ् वा ।३।४।९।

गुण—क्रियाणां
अधिश्रयणाऽऽदीनां
क्रियान्तराऽव्यवधानेन—
साकल्येन संपत्तिः
फलातिरेको वा=
भृशत्वं ।

प्रधानक्रियायाः=विक्लेदादेः
क्रियान्तराऽव्यधानेन
आवृत्तिः=आभीक्ष्ण्यं ।

तद्विशिष्टार्थवृत्तेः धातोः
व्यञ्जनादेः एकस्वराद्
यङ् वा स्यात् ।

पापच्यते ।
व्यञ्जनादेरिति किम् ?
भृशमीक्षते ।

एकस्वरात् इति किम् ?

भृशं चकास्ति ।

वा इति किम् ?

लुनीहि लुनीहीत्येव अयं लुनातीत्यादि यथा स्यात् ॥ ९ ॥

## अट्य-र्त्ति-सूत्रि-मूत्रि-सूच्यशूर्णोः ।३।३।१०।

एभ्यः

भृशा-ऽऽभीक्ष्ण्यार्थवृत्तिभ्यः

यङ् स्यात् ।

अटाट्यते, अरार्यते,

सोसूत्र्यते, मोमूत्र्यते,

सोसूच्यते, अशाश्यते

प्रोर्णोनूयते ॥ १० ॥

## गत्यर्थात् कुटिले ।३।४।११।

व्यञ्जनादेःएकस्वराद्

गत्यर्थात्

कुटिले एवार्थे वर्त्तमानाद्

धातोःयङ् स्यात्।

चङ्क्रम्यते ।

कुटिल इति किम्?

भृशं क्रामति ॥ ११ ॥

**गॄ-लुप-सद-चर-जप-जभ-दश-दहो गर्ह्ये । ३ । ४ । १२ ।**

गर्ह्यार्थेभ्य एव एभ्यः

यङ् स्यात् ।

निजेगिल्यते, लोलुप्यते,

सासद्यते, चञ्चूर्यते,

जञ्जप्यते, जञ्जभ्यते,

दन्दश्यते, दन्दह्यते ।

गर्ह्य इति किम्?

साधु जपति, भृशं निगिरति ॥ १२ ॥

**न गृणा-शुभ-रुचः । ३ । ४ । १३ ।**

एभ्यःयङ् न स्यात् ।

निन्द्यं गृणाति,

भृशं शोभते,

भृशं रोचते ॥ १३ ॥

बहुलं लुप् । ३ । ४ । १४ ।

यङः लुप्

बहुलं स्यात् ।

बोभूयते,-बोभवीति ।

बहुलवचनात् क्वचित् भवति,

लोलूया, पोपूया ॥ १३ ॥

अचि । ३ । ४ । १५ ।

यङः

अचि परे

लुप् स्यात् ।

चेच्यः, नेन्यः ॥ १५ ॥

नोतः । ३ । ४ । १६ ।

उदन्ताद् विहितस्य यङः

अचि परे

लुब् न स्यात् ।
रोरूयः ॥ १६ ॥

## चुरादिभ्यो णिच् । ३ । ४ । १७ ।

एभ्यः धातुभ्यः
स्वार्थे णिच् स्यात् ।
चोरयति, पदयते ॥ १७ ॥

## युजादेर्नवा । ३ । ४ । १८ ।

एभ्यः
स्वार्थे णिच्
वा स्यात् ।
योजयति,-योजति ।
साहयति,-सहति ॥ १८ ॥

## भूङः प्राप्तौ णिङ् । ३ । ४ । १९ ।

भुवः
प्राप्त्यर्थात्
णिङ् वा स्याद् ।
भावयते,-भवते ।
प्राप्तौ इति किम्? भवति ॥ १९ ॥

## प्रयोक्तृव्यापारे णिग् । ३ । ४ । २० ।

कुर्वन्तं यः प्रयुङ्क्ते
तद्व्यापारे वाच्ये
धातोर्णिग् वा स्यात् ।
कारयति,
भिक्षां वासयति,
राजानमागमयति,
कंसं घातयति,
पुष्येण चन्द्रं योजयति,
उज्जयिन्याः प्रस्थितो–
माहिष्मत्यां सूर्यमुद्गमयति॥ १० ॥

## तुमर्हाद् इच्छायां सन् अ-तत्सनः
## । ३ । ४ । २१ ।

यो धातुः
इषेः कर्म,
इषिणैव च समानकर्तृकः
स तुमर्हः,

तस्मात्
इच्छायां अर्थे
सन् वा स्यात्,
न तु इच्छा-सन्नन्तात्।
चिकीर्षति, जिगमिषति।
तुमर्हात् इति किम्?
यानेनेच्छति,
मुक्तिमिच्छति मैत्रस्य।
इच्छायामिति किम्?
भोक्तुं याति।
अ-तत्सन इति किम्?
चिकीर्षितुमिच्छति।
तत् इति किम्?
जुगुप्सिषते ॥ २१ ॥

**द्वितीयायाः काम्यः । ३ । ४ । २२ ।**

द्वितीयान्तात्
इच्छायां
काम्यो वा स्यात्।

इदंकाम्यति ।

द्वितीयाया इति किम् ?

इष्टः पुत्रः ॥ २२ ॥

## अ-माऽव्ययात् क्यन् च । ३ । ४ । ३३ ।

मान्ता-व्ययाभ्यामन्यस्माद्

द्वितीयान्तात्

इच्छायां

क्यन् काम्यश्च वा स्यात् ।

पुत्रीयति, पुत्रकाम्यति ।

अ-माऽव्ययादिति किम् ?

इदमिच्छति,

स्वरिच्छति ॥ २३ ॥

## आधाराच्चोपमानाद् आचारे ।३।४।२४।

अ-माऽव्ययात् उपमानाद्,

द्वितीयान्तात् आधारात् च

आचारार्थे क्यन् वा स्यात् ।

पुत्रीयति च्छात्रम्,

प्रासादीयति कुट्याम् ॥ २४ ॥

**कर्तुः क्विप्, गल्भ-क्लीब-होडात्तु ङित् । ३ । ४ । २५ ।**

कर्तुःउपमानाद् नाम्नः आचाराऽर्थे क्विप् वा स्यात्, गल्भ-क्लीब-होडेभ्यस्तु स एव ङित् । अश्वति, गल्भते, क्लीबते, होडते ॥२५॥

**क्यङ् । ३ । ४ । २६ ।**

कर्तुःउपमानात् आचारेऽर्थे क्यङ् वा स्यात् । हंसायते ॥ २६ ॥

**सो वा लुक् च । ३ । ४ । २७ ।**

सन्तात् कर्तुः उपमानात् आचारार्थे क्यङ् वा स्याद्,

अन्तस्य च सो वा लुक् ।
पयायते-पयस्यते ॥२७॥

## ओजोऽप्सरसः । ३ । ४ । २८ ।

आभ्यां कर्तुः
उपमानाभ्यां
आचारे
क्यङ् वा स्यात्,
सश्च लुक् ।
ओजायते, अप्सरायते ॥ २८ ॥

## च्व्यर्थे भृशादेः स्तोः । ३ । ४ । २९ ।

भृशादेः कर्तुः
च्व्यर्थे
क्यङ् वा स्यात्,
यथासम्भवं तःलुक् च ।
भृशायते, उन्मनायते, वेहायते ।
कर्तुःइत्येव ?
अभृशं भृशं करोति ।

च्व्यर्थ इति किम् ?

भृशो भवति ॥ २९ ॥

**डाच्-लोहितादिभ्यः षित् । ३ । ४ । ३० ।**

डाजन्तेभ्यो

लोहितादिभ्यश्च

कर्तृभ्यः

च्व्यर्थे

क्यङ् षित् स्यात् ।

पटपटायति,-पटपटायते ।

लोहितायति,-लोहितायते ।

कर्तुःइत्येव ?

अपटपटा-पटापटा करोति ।

च्व्यर्थ इत्येव ?

लोहितो भवति ॥ ३० ॥

**कष्ट-कक्ष-कृच्छ्र-सत्र-गहनाय पापे क्रमणे । ३ । ४ । ३१ ।**

एभ्यःचतुर्थ्यन्तेभ्यः

पापवृत्तिभ्यः
क्रमणेऽर्थे
क्यङ् स्यात् ।
कष्टायते, कक्षायते, कृच्छ्रायते,
सत्रायते गहनायते ।
चतुर्थीति किम् ?
रिपुः कष्टं क्रामति ।
पाप इति किम् ?
कष्टाय तपसे क्रामति ॥३१॥

## रोमन्थाद् व्याप्याद् उच्चर्वणे । ३ । ४ । ३२ ।

अभ्यवहृतं द्रव्यं=रोमन्थः,
उद्गीर्य चर्वणं=उच्चर्वणम्,
अस्मिन्नर्थे कर्मणः
क्यङ् वा स्यात् ।
रोमन्थायते गौः ।
उच्चर्वण इति किम् ?
कीटो रोमन्थं वर्त्तयति ॥३२॥

फेनो-ष्म-बाष्प-धूमाद् उद्वमने
। ३ । ४ । ३३ ।

एभ्यः कर्मभ्यः
उद्वमनेऽर्थे
क्यङ् वा स्यात्।
फेनायते, उष्मायते,
बाष्पायते, धूमायते ॥ ३३ ॥

सुखादेरनुभवे । ३ । ४ । ३४ ।

साक्षात्कारेऽर्थे
सुखादेः कर्म्मणः
क्यङ् वा स्यात् ।
सुखायते, दुखायते ॥ ३४ ॥

शब्दादेः कृतौ वा । ३ । ४ । ३५ ।

एभ्यः कर्मभ्यः
कृतौ अर्थे
क्यङ् वा स्यात्।
शब्दायते, वैरायते।
पक्षे णिचू, शब्दयति, वैरयति ॥३६॥

**तपसः क्यन् । । ३ । ४ । ३६ ।**

अस्मात् कर्मणः

कृतौ अर्थे

क्यन् वा स्यात् ।

तपस्यति ॥ ३६ ॥

**नमो-वरिवस्-चित्रङोऽर्चा-सेवाऽऽश्चर्ये**

**। ३ । ४ । ३७ ।**

एभ्यः कर्मभ्यो यथासंख्यं

अर्चादिष्वर्थेषु

क्यन् वा स्यात् ।

नमस्यति, वरिवस्यति, चित्रीयते ॥३७॥

**अङ्गात् निरसने णिङ् । ३ । ४ । ३८ ।**

अङ्गवाचिनः कर्मणो

निरसनेऽर्थे

णिङ् वा स्यात् ।

हस्तयते, पादयते ॥३८॥

**पुच्छाद् उत्-परि-व्यसने । ३ । ४ । ३९ ।**

पुच्छात् कर्मण
उदसने पर्यसने
व्यसने असने चार्थे
णिङ् वा स्यात् ।
विपुच्छयते, पुच्छयते ॥ ३९ ॥

**भाण्डात् समाचितौ । ३ । ४ । ४० ।**

भाण्डात् कर्मणः
समाचितौ अर्थे
णिङ् वा स्यात् ।
सम्भाण्डयते, परिभाण्डयते ॥ ४० ॥

**चीवरात् परिधानाऽर्जने । ३ । ४ । ४१ ।**

अस्मात् कर्म्मणः
परिधानेऽर्जने चार्थे
णिङ् वा स्यात् ।
परिचीवरयते, संचीवरयते ॥ ४१ ॥

**णिज् बहुलं नाम्नः कृगादिषु । ३ । ४ । ४२ ।**

कृगादीनां धातूनां अर्थे
नाम्नो
णिज् बहुलं स्यात् ।

मुण्डं करोति=मुण्डयति च्छात्रम्,

पटुमाचष्टे=पटयति,

वृक्षं रोपयति=वृक्षयति,

कृतं गृह्णाति=कृतयति ॥ ४२ ॥

**व्रताद् भुजि-तन्निवृत्त्योः । ३ । ४ । ४३ ।**

व्रतं=शास्त्रविहितो नियमः,

व्रताद्

भुज्यर्थात् तन्निवृत्त्यर्थाच्च

कृगादिष्वर्थेषु

णिज् बहुलं स्यात्।

पयो व्रतयति,

सावद्यान्नं व्रतयति ॥ ४३ ॥

**सत्या-ऽर्थ-वेदस्य आः । ३ । ४ । ४४ ।**

एषां

णिच्सन्नियोगे

आः स्यात् ।

सत्यापयति, अर्थापयति, वेदापयति ॥ ४४ ॥

**श्वेताश्व-अश्वतर-गालोडिताऽऽह्वरकस्याऽश्व-तर-इ-त-क-लुक् । ३ । ४ । ४५ ।**

एषां णिज्योगे यथासङ्ख्यं अश्वादेः शब्दस्य लुक् स्यात् ।

श्वेतयति, अश्वयति, गालोडयति, आह्वरयति ॥ ४५ ॥

**धातोरनेकस्वरादाम् परोक्षायाः, कृ-भ्व-स्ति चानुतदन्तम् । ३ । ४ । ४६ ।**

अनेकस्वरात् धातोः परस्याः परोक्षायाः स्थाने आम् स्यात्, आमन्ताच्च परे कृ-भ्व-स्तयः परोक्षान्ता अनु=पश्चात्अनन्तरं प्रयुज्यन्ते ।

चकासाञ्चकार, चकासाम्बभूव, चकासामास ।

अनेकस्वरात् इति किम्?

पपाच,

अनुः विपर्यास-व्यवहितिनिवृत्त्यर्थः,

तेन

चकार चकासाम्, ईहां चैत्रश्चक्रे

इत्यादि न स्यात् ॥ ४६ ॥

**दया-ऽयाऽऽस्-कासः । ३ । ४ । ४७ ।**

एभ्यः धातुभ्यः परस्याः

परोक्षाया

आम् स्यात्,

आमन्ताच्च परे

कृ-भ्वस्तयः परोक्षान्ता

अनुप्रयुज्यन्ते ।

दयाश्चक्रे, दयाम्बभूव, दयामास ।

पलायाश्चक्रे, आसाञ्चक्रे, कासाञ्चक्रे ॥४७॥

**गुरुनाम्यादेरनृच्छूर्णोः । ३ । ४ । ४८ ।**

गुरुर्नाम्यादिर्यस्य तस्मात् धातोः,

ऋच्छ-ऊर्णुवर्जात् परस्याः
परोक्षाया आम् स्यात्,
आमन्ताच्च परे
कृ-भ्व-स्तयः परोक्षान्ता
अनुप्रयुज्यन्ते ।
ईहाञ्चक्रे, ईहाम्बभूव, ईहामास ?
गुरु इति किम् ? इयेष ।
नामीति किम् ? आनर्च ।
आदीति किम् ? निनाय ।
अनृच्छ-र्णोरिति किम् ?
आनर्च्छ, प्रोर्णुनाव ॥ ४८ ॥

**जागृ-उष-समिन्धेर्नवा । ३ । ४ । ४९ ।**

एभ्यः धातुभ्यः परस्याः
परोक्षायाः
आम् वा स्यात्,
आमन्ताच्च परे
कृ-भ्व-स्तयः परोक्षान्ता
अनुप्रयुज्यन्ते ।

जागराञ्चकार, जागराम्बभूव,

जागरामास, जजागार।

ओषाञ्चकार, उवोष ।

समिन्धाञ्चक्रे समीधे ॥ ४९ ॥

भी-ह्री-भृ-ह्रोस्तिव्वत् । ३ । ४ । ५० ।

एभ्यः परस्याः

परोक्षाया

आम् वा स्यात्,

स च तिव्वत्,

आमन्ताच्च परे

कृ-भ्व-स्तयः परोक्षान्ताः

अनुप्रयुज्यन्ते ।

बिभयाञ्चकार-बिभयाम्भूव,

बिभयामास-बिभाय ।

जिह्रयाञ्चकार-जिह्राय ।

बिभराञ्चकार-बभार

जुहवाञ्चकार-जुहाव ॥ ५० ॥

## वेत्तेः कित् । ३ । ४ । ५१ ।

वेत्तेः परस्याः परोक्षाया
आम् किद् वा स्यात्।
आमन्ताच्च
कृ-भ्व-स्तयः परोक्षान्ताः
अनुप्रयुज्यन्ते ।
विदाञ्चकार, विवेद ॥ ५१ ॥

## पञ्चम्याः कृग् । ३ । ४ । ५२ ।

वेत्तेः परस्याः
पञ्चम्याः
किद् आम् वा स्यात्,
आमन्ताच्च परः
पञ्चम्यन्तः कृग् अनुप्रयुज्यते ।
विदाङ्करोतु, वेत्तु ॥ ५२ ॥

## सिच् अद्यतन्याम् । ३ । ४ । ५३ ।

अद्यतन्यां परस्यां
धातोः परः
सिच्

नित्यं स्यात् ।

अनैषीत् ॥ ५४ ॥

**स्पृश-मृश-तृप-कृष-दृपो-वा ।३।४।५४।**

एभ्यः

अद्यतन्यां

सिज्

वा स्यात् ।

अस्प्राक्षीत्–अस्प्रार्क्षीत्–अस्पृक्षत् ।

अम्राक्षीत्–अमार्क्षीत्–अमृक्षत् ।

अत्राप्सीत्–अतार्प्सीत्–अतृपत्,

अक्राक्षीत्–अकार्क्षीत्–अकृक्षत् ।

अद्राप्सीत्–अदार्प्सीत्–अदृपत् ॥५४॥

**ह-शिटो नाम्युपान्त्याद् अ-दृशोऽनिटः सक् ।३।४।५५।**

ह-शिडन्ताद् नाम्युपान्त्यात्

अ-दृशः अनिटः

अद्यतन्यां

सक् स्यात् ।

अघुक्षत्, अविक्षत् ।

ह-शिट इति किम् ?

अभैत्सीत् ।

नाम्युपान्त्यादिति किम् ?

अधाक्षीत् ।

अ-दृश इति किम् । अद्राक्षीत् ।

अनिट इति किम् ?

अकोषीत् ॥ ५५ ॥

**अ-श्लिषः । ३ । ४ । ५६ ।**

अ-श्लिषःअनिटअद्यतन्यां सक् स्यात् ।

आश्लिक्षद् कन्यां मैत्रः ।

अनिट इत्येव ? अश्लेषीत् ॥ ५६ ॥

**नाऽसत्त्वाऽऽश्लेषे । ३ । ४ । ५७ ।**

श्लिषः

अ-प्राण्याऽऽश्लेषार्थात्

सक् न स्यात् ।

उपाश्लिषत् जतु च काष्ठं च ।
अ-सत्त्वा-ऽऽश्लेष इति किम् ?
व्यत्यश्लिक्षन्त मिथुनानि ॥ ५७ ॥

## णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः । ३ । ४ । ५८ ।

ण्यन्तात् श्र्यादिभ्यश्च
कर्त्तरि अद्यतन्यां
ङः स्यात् ।
अचीकरत्, अशिश्रयत्,
अदुद्रुवत्, असुस्रुवत्,
अचकमत् ।
कर्त्तरि इति किम् ?
अकारयिषातां कटौ मैत्रेण ॥५८॥

## ट्धे-श्वेर्वा । ३ । ४ । ५९ ।

आभ्यां
कर्त्तरि अद्यतन्यां
ङो वा स्यात् ।
अदधत्—अधात् ।
अशिश्वियत्—अश्वत् ।

कर्त्तरीत्येव ?

अधिषातां गावौ वत्सेन ॥ ५९ ॥

## शास्त्य-सू-वक्ति-ख्यातेरङ् । ३ । ४ । ६० ।

एभ्यः

कर्त्तरि अद्यतन्यां

अङ् स्यात् ।

अशिषत्, अपास्थत्,

अवोचत्, आख्यत् ।

कर्त्तरि इत्येव ?

अशासिषातां शिष्यौ गुरुणा ॥६०॥

## सर्त्य-र्त्तेर्वा । ३ । ४ । ६१ ।

आभ्यां

कर्त्तरि अद्यतन्यां

अङ् वा स्यात् ।

असरत्-असार्षीत् ।

आरत्, आर्षीत् ॥६१॥

## ह्वा-लिप्-सिचः । ३ । ४ । ६२ ।

एभ्यः

कर्त्तरि अद्यतन्यां
अङ् स्यात् ।
आह्वत्, अलिपत्, असिचत् ॥६२॥

## वाऽऽत्मने । ३ । ४ । ६३ ।

ह्वादेः
कर्त्तरि अद्यतन्यां
आत्मनेपदे अङ् वा स्यात् ।
आह्वत–आह्वास्त ।
अलिपत–अलिप्त ।
असिचत–असिक्त ॥ ६३ ॥

## लृदिद्-द्युतादि-पुष्यादेः परस्मै ।३।४।६४।

लृदितो द्युतादेः
पुष्यादेश्च
कर्त्तरि अद्यतन्यां
परस्मैपदे अङ् स्यात् ।
अगमत्, अद्युतत्,
अरुचत्, अपुषत्,

औचत् ।

परस्मैपद इति किम्?

समगंस्त ॥ ६४ ॥

**ऋदित्-श्वि-स्तम्भू-म्रुचू-म्लुचू-ग्रुचू-ग्लुचू-ग्लुञ्चू-ज्रो वा । ३ । ४ ६५ ।**

ऋदितः श्व्यादेश्च

कर्त्तरि अद्यतन्यां

परस्मैपदे अङ् वा स्यात् ।

अरुधत्—अरौत्सीत् ।

अश्वत्—अश्वयीत् ।

अस्तभत्—अस्तम्भीत् ।

अम्रुचत—अम्रोचीत् ।

अम्लुचत्—अम्लोचीत् ।

अग्रुचत्—अग्रोचीत् ।

अग्लुचत्—अग्लोचीत् ।

अग्लुचत्—अग्लुञ्चीत् ।

अजरत्—अजारीत् ॥ ६५ ॥

ञिच् ते पदः त-लुक् च । ३ । ४ । ६६ ।

पद्यतेः कर्त्तरि अद्यतन्याः
ते परे
ञिच् स्याद्,
निमित्त-तस्य च लुक्
उदपादि ।
त इति किम् ।
उदपत्साताम् ॥ ६६ ॥

दीप-जन-बुधि-पूरि-तायि-प्यायो वा । ३ । ४ । ६७ ।

एभ्यः
कर्त्तरि अद्यतन्याः
ते परे
ञिच् वा स्यात् ।
त-लुक् च,
अदीपि—अदीपिष्ट ।
अजनि—अजनिष्ट ।

अबोधि-अबुद्ध ।
अपूरि-अपूरिष्ट ।
अतायि-अकृतायिंष्ट ।
अप्यायि-अप्यायिष्ट ॥ ६७ ॥

**भाव-कर्मणोः । ३ । ४ । ६८ ।**

सर्वस्माद् धातोः
भाव-कर्मविहिते
अद्यतन्याः ते
ञिच् स्यात्,
त-लुक् च ।
आसि त्वया,
अकारि कटः ॥ ६८ ॥

**स्वर-ग्रह-दृश-हन्भ्यः स्य-सिच्-ाशीः-श्वस्तन्यां ञिट् वा ।३।४।६९।**

स्वरान्ताद्
ग्रहादेश्च विहितासु
भाव-कर्मजासु

स्य-सिजा-शीः-श्वस्तनीषु

जिट् वा स्यात् ।

दायिष्यते, दास्यते ।

अदायिषाताम्-आदिषाताम् ।

दायिषीष्ट-दासीष्ट ।

दायिता-दाता ।

ग्राहिष्यते-ग्रहीष्यते ।

अग्राहिषाताम्, अग्रहीषाताम् ।

ग्राहिषीष्ट-ग्रहीषीष्ट ।

ग्राहिता-ग्रहीता ।

दर्शिष्यते-द्रक्ष्यते ।

अदर्शिषाताम-अदृक्षाताम् ।

दर्शिषीष्ट-दृक्षीष्ट ।

दर्शिता-द्रष्टा ।

घानिष्यते-हनिष्यते ।

अघानिषाताम्-अवधिषाताम् ।

घानिषीष्ट-वधिषीष्ट ।

घानिता-हन्ता ॥ ६९ ॥

## क्यः शिति । ३ । ४ । ७० ।

सर्वस्माद् धातोः
भाव-कर्मविहिते शिति
क्यः स्यात् ।
शय्यते त्वया,
क्रियते कटः
भ्रियते घटः ।
शिति इति किम् ?
बभूवे ॥ ७० ॥

## कर्त्तर्य-नद्भ्यः शव् । ३ । ४ । ७१ ।

अदादि-वर्जाद् धातोः
कर्त्तरि विहिते शिति
शव् स्यात् ।
भवति ।
कर्त्तरि इति किम्? पच्यते ।
अनद्भ्य इति किम्? अत्ति ॥ ७१ ॥

## दिवादेः श्यः । ३ । ४ । ७२ ।

दिवादेः कर्त्तृविहिते शिति
श्यः स्यात् ।
दीव्यति, जीर्यति ॥ ७२ ॥

**भ्रास-भ्लास-भ्रम-क्लम-त्रसि-त्रुटि-लषि-यसि-संयसेर्वा । ३ । ४ । ७३ ।**

एभ्यः
कर्त्तरि विहिते शिति
श्यो वा स्यात् ।
भ्रास्यते-भ्रासते ।
भ्लास्यते-भ्लासते ।
भ्राम्यते-भ्रमति ।
क्राम्यति-क्रामति ।
क्लाम्यति-क्लामति ।
त्रस्यति-त्रसति ।
त्रुट्यति-त्रुटति ।
लष्यति लषति ।
यस्यति-यसति ।
संयस्यति-संयसति ॥ ७३ ॥

कुषि-रञ्जेर्व्याप्ये वा परस्मै च ।३।४।७४।

आभ्यां
व्याप्ये कर्त्तरि
शिद्विषये
परस्मैपदं वा स्यात्,
तद्योगे च श्यः ।
कुष्यति-कुष्यते वा पादः स्वयमेव ।
रज्यति-रज्यते वा वस्त्रं स्वयमेव ।
व्याप्ये कर्त्तरीति किम् ।
कुष्णाति पादं रोगः ।
शितीत्येव ? अकोषि ॥ ७४ ॥

स्वादेः श्नुः । ३ । ४ । ७५ ।

स्वादेः
कर्तृविहिते शिति
श्नुः स्यात् ।
सुनोति, सिनोति ॥ ७५ ॥

वाऽक्षः । ३ । ४ । ७६ ।

अक्षः
कर्तृविहिते शिति
श्नुर्वा स्यात् ।
अक्ष्णोति-अक्षति ॥ ७६ ॥

**तक्षः स्वार्थे वा । ३ । ४ । ७७ ।**

स्वार्थस्तनुत्वं
तद्वृत्तेस्तक्षेः
कर्तृविहिते शिति
श्नुर्वा स्यात् ।
तक्ष्णोति-तक्षति ।
स्वार्थ इति किम् ?
संतक्षति शिष्यम् ॥ ७७ ॥

**स्तम्भू-स्तुम्भू-स्कम्भू-स्कुम्भू-स्कोःश्ना च । ३ । ४ । ७८ ।**

स्तम्भ्वादेः
सौत्राद् धातो स्कुञ्श्च
कर्तृविहिते शिति
श्ना श्नुश्च स्यात् ।

स्तभ्नाति-स्तभ्नोति ।

स्तुभ्नाति-स्तुभ्नोति ।

स्कभ्नाति-स्कभ्नोति ।

स्कुभ्नाति-स्कुभ्नोति ।

स्कुनाति-स्कुनोति ॥ ७८ ॥

## क्र्यादेः । ३ । ४ । ७९ ।

क्र्यादेः

कर्तृविहिते शिति

श्ना स्यात् ।

क्रीणाति, प्रीणाति ॥ ७९ ॥

## व्यञ्जनात् श्नाहेरानः । ३ । ४ । ८० ।

व्यञ्जनात् परस्य

श्नायुक्तस्य हेः

आनः स्यात् ।

पुषाण, मुषाण ।

व्यञ्जनात् इति किम् ? लुनीहि ॥ ८० ॥

## तुदादेः शः । ३ । ४ । ८१ ।

एभ्यः
कर्तृविहिते शिति
शः स्यात् ।
तुदति, तुदते ॥ ८१ ॥

**रुधां स्वरात् श्नो, नलुक् च ।३।४।८२।**

रुधादीनां
स्वरात् परः
कर्तृविहिते शिति
श्नः स्यात्,
तद्योगे
प्रकृतेः नः
लुक् च यथासम्भवम् ।
रुणद्धि, हिनस्ति ॥ ८२ ॥

**कृग्–तनादेरुः । ३ । ४ । ८३ ।**

कृगः
तनादिभ्यश्च
कर्तृविहिते शिति
उः स्यात् ।
करोति, तनोति ॥ ८३ ॥

**सृजः श्राद्धे ञि-क्या-त्मने तथा ।३।४।८४।**

सृजः पराणि
श्रद्धावति कर्त्तरि
ञि-क्या-त्मनेपदानि स्युः,
तथा
यथा
पूर्वं विहितानि ।
असर्जि-
सृज्यते-
स्रक्ष्यते-
-वा मालां धार्मिकः ।
श्राद्ध इति किम् ?
व्यत्यसृष्ट माले मिथुनम् ॥ ८४ ॥

**तपेस्तपःकर्म्मकात् । ३ । ४ । ८५ ।**

तपेः
तपःकर्मकात्
कर्त्तरि
ञि-क्याऽऽत्मनेपदानि स्युः ।

तथा ।

तप्यते–तेपे वा तपः साधुः ।

तप इति किम्?

उत्तपति स्वर्णं स्वर्णकारः ।

कर्मेति किम्?

तपः साधुं तपति ॥ ८५ ॥

## एकधातौ कर्मक्रियये-काऽकर्म-क्रिये । ३ । ४ । ८६ ।

एकस्मिन् धातौ

कर्म्मस्थ-क्रियया

पूर्वदृष्टया

एका=अभिन्ना

सम्प्रतिपक्षकर्मिका

क्रिया यस्य,

तस्मिन् कर्त्तरि

कर्म-कर्तृरूपे

धातोः=

ञि-क्या-त्मनेपदानि स्युः ।

अकारि-

क्रियते-

करिष्यते वा-

कटः स्वयमेव ।

एकधातौ इति किम्?

पचति ओदनं चैत्रः,

सिध्यत्योदनः स्वयमेव ।

कर्म-क्रिययेति किम्?

साधु असिः छिनत्ति ।

एक-क्रिय इति किम्?

स्रवति उदकं कुण्डिका,

स्रवति उदकं कुण्डिकायाः ।

अ-कर्म्मक्रिय इति किम्?

भिद्यमानः कुशूलः

पात्राणि भिनत्ति ॥ ८६ ॥

पचि-दुहेः । ३ । ४ । ८७ ।

एकधातौ

कर्मस्थ-क्रियया पूर्वदृष्टया

अकर्मक्रिया
सकर्मक्रिया वा,
एक-क्रिये कर्त्तरि
कर्म-कर्तृरूपे,
आभ्यां
ञि-क्या-त्मनेपदानि स्युः ।
अपाचि-
पच्यते-
पक्ष्यते वा-
ओदनः स्वयमेव,
अदोहि-
दुग्धे-
धोक्ष्यते वा-
गौः स्वयमेव,
उदुम्बरः फलं
पच्यते-
अपक्त-
पक्ष्यते वा स्वयमेव,
दुग्धे-
अदुग्ध-

धोक्ष्यते वा पयो
गौः स्वयमेव ॥ ८७ ॥

न कर्मणा ञिच् । ३ । ४ । ८८ ।

पचि–दुहिभ्यां
कर्म्मणा योगे
अनन्तरोक्ते कर्त्तरि
ञिच् न स्यात् ।
अपक्त उदुम्बरः
फलं स्वयमेव,
अदुग्ध गौः
पयः स्वयमेव ।
कर्मणेति किम् ?
अपाचि ओदनः स्वयमेव ।
अनन्तरोक्ते कर्त्तरि इत्येव !
अपाचि उदुम्बरः फलं वायुना ॥८८॥

रुधः । ३ । ४ । ८९ ।

रुधः
अनन्तरोक्ते कर्त्तरि

ञिच् न स्यात् ।

अरुद्ध गौः स्वयमेव ॥ ८९ ॥

## स्वर-दुहो वा । ३ । ९० ।

स्वरान्ताद्

दुहेश्च

अनन्तरोक्ते कर्त्तरि

ञिच् वा स्यात् ।

अकृत-अकारि वा

कटः स्वयमेव ।

अदुग्ध-अदोहि वा

गौः स्वयमेव ॥ ९० ॥

## तपः कर्त्रनुतापे च । ३ । ४ । ९१ ।

तपेः कर्म-कर्त्तरि,

कर्त्तरि अनुतापे चार्थे

ञिच् न स्यात् ।

अन्ववातप्त कितवः स्वयमेव,

अतप्त तपांसि साधुः,

अन्वतप्त चैत्रेण,

अन्ववातप्त पापः स्वकर्म्मणा ।

कर्त्रनुतापे चेति किम् ?

अतापि पृथिवी राज्ञा ॥९१॥

## णि-स्नु-श्र्यात्मनेपदाऽकर्म्मकात् ।३।४।९२।

ण्यन्तात्

स्नु-श्रिभ्यां

आत्मनेपदविधौ

अकर्मकेभ्यश्च

कर्म्मकर्त्तरि

ञिच् न स्यात् ।

अपीपचत् ओदनं चैत्रेण मैत्रः,

अपीपचत

ओदनः स्वयमेव ।

प्रास्नोष्ट गौः स्वयमेव,

उदशिश्रियत दण्डः स्वयमेव,

व्यकृत सैन्धवः स्वयमेव ॥९२॥

## भूषार्थ-सन्-किरादिभ्यश्च ञि-क्यौ ।३।४।९३।

भूषार्थेभ्यः,

सन्नन्तेभ्यः,

किरादिभ्यो
णयादिभ्यश्च
कर्म्म-कर्त्तरि
ञि-क्यौ
न स्याताम् ।

भूषार्थ-

अलमकृत कन्या स्वयमेव-
अलंकुरुते कन्या स्वयमेव ।

सन्-

अचिकीर्षिष्ट-
चिकीर्षते वा कटः स्वयमेव ।

किरादिः-

अकीर्ष्ट-किरते वा पांशुः स्वयमेव,
अगीर्ष्ट-गिरते वा ग्रासः स्वयमेव ।

णि-

कारयते कटः स्वयमेव,
चोरयते गौः स्वयमेव,
प्रस्नुते गौः स्वयमेव ।

श्रि-उच्छ्रयते दण्डः स्वयमेव ।

आत्मनेपदाऽकर्मकात्-

विकुर्वते सैन्धवाः स्वयमेव ॥९३॥

**करणक्रियया क्वचित् । ३ ४ । ९४ ।**

एकधातौ

पूर्वदृष्टया

करणस्थया क्रियया

एकाकर्मक्रिये कर्त्तरि

ञि-क्या-त्मनेपदानि स्युः,

क्वचित् ।

परिवारयन्ते कण्टका वृक्षं स्वयमेव ।

क्वचित् इति किम् ?

साधु असिः छिनत्ति ॥ ९४ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ
तृतीयस्याध्यायस्य
तृतीयः पादः समाप्तः

॥ श्री वर्धमानस्वामिने नमः ॥

चतुर्थाध्यायस्य—

# प्रथमः पादः

**द्विर्धातुः परोक्षा-ङे, प्राक् तु स्वरे स्वरविधेः । ४ । १ । १ ।**

परोक्षायां ङे च परे

धातुः द्विः स्यात्,

स्वरादौ तु

द्वित्वनिमित्ते

स्वरस्य कार्यात् प्रागेव ।

पपाच, अचकमत ।

धातुः इति किम् ?

प्राशिश्रियत् ।

प्राक् इति किम् ?

चक्रतुः ।

स्वर इति किम् ?

जेघ्रीयते ।

स्वरविधेः इति किम् ?

शुशाव

प्राक् तु स्वर-विधेः इति

आ-द्विर्वचनं अधिकारः ॥१॥

## आद्योंऽश एकस्वरः । ४ । १ । २ ।

अनेकस्वरस्य धातोः

आद्यः

एकस्वरः अवयवः

परोक्षा-ङे परे

द्विः स्यात् ।

जजागार ।

अचीकणत्-अचकाणत् ।

अचीकरत् ॥ २ ॥

## सन्-यङश्च । ४ । १ । ३ ।

सन्नन्तस्य यङन्तस्य च

आद्यः एकस्वरः अंशः,
द्विः स्यात् ।
तितिक्षते, पापच्यते ॥ ३ ॥

स्वराऽऽदेर्द्वितीयः । ४ । १ । ४ ।

स्वरादेः द्व्युक्ति भाजः
द्वितीयः अंशः एकस्वरः
द्विः स्यात् ।
अटिटिषति, अशाश्यते ।
प्राक् तु स्वरे स्वरविधेः इत्येव ?
आटिटत् ॥ ४ ॥

न ब-द-नं संयोगाऽऽदिः । ४ । १ । ५ ।

स्वरादेः धातोः
द्वितीयस्य अंशस्य एकस्वरस्य
ब-द्-नाः संयोगस्य आद्याः
न द्विः स्युः ।
उब्जिजिषति,
अड्डिटिषति,
उन्दिदिषति ।

संयोगादिः इति किम् ?

प्राणिणिषति ॥ ५ ॥

अ-यि रः । ४ । १ । ६ ।

स्वरादेः धातोः

द्वितीयस्य अंशस्य

एकस्वरस्य

संयोगादी रो

द्विः न स्यात्,

न तु राद् अनन्तरे यि।

अर्चिचिषति

अयि इति किम् ?

अरार्यते ॥ ६ ॥

नाम्नो द्वितीयाद् यथेष्टम् । ४ । १ । ७ ।

स्वरादेः नामधातोः द्वित्वभाजः

द्वितीयादारभ्य

एकस्वरः अंशः

यथेष्टं द्विः स्यात् ।

अशिश्वीयिषति-

अश्वीयियिपति—
अश्वीयिषिषति ॥ ७ ॥

**अन्यस्य । ४ । १ । ८ ।**

स्वरादेः
नामधातोः अन्यस्य
द्वित्वभाजः
एकस्वरः अंशः
यथेष्टं प्रथमादिः
द्विः स्यात् ।
पुपुत्रीयिषति—पुतित्रीयिषति,
पुत्रीयियिषति—पुत्रियिषिषति ॥८॥

**कण्डवादेस्तृतीयः । ४ । १ । ९ ।**

कण्डूवादेः द्वित्वभाजः
एकस्वरः अंशः
तृतीय एव
द्विः स्यात् ।
कण्डूयियिषति, असूयियिपति ॥ ९ ॥

**पुनरेकेषाम् । ४ । १ । १० ।**

एकेषां मते

द्वित्वे कृते

पुनर्द्वित्वं स्यात् ।

सुसोषुपिषते ।

एकेषां इति किम् ? सोषुपिषते ॥१०॥

**यिः सन् वेर्ष्यः । ४ । १ । ११ ।**

ईर्ष्यः द्वित्वभाजः

यि

सन् वा द्विः स्यात् ।

ईर्ष्यियिषति–ईर्ष्यिषिषति ॥ ११ ॥

**ह्वः शिति । ४ । १ । १२ ।**

जुहोत्यादयः

शिति

द्विः स्युः ।

जुहोति ॥ १२ ।

**चराचर–चलाचल–पतापत–वदावद–घनाघन–पाटूपटं वा । ४ । १ । १३ ।**

एते

अचि

कृतद्वित्वादयः

वा निपात्यन्ते ।

चराचरः, चलाचलः,

पतापतः, वदावदः,

घनाघनः, पाटूपटः ।

पक्षे–

चरः, चलः,

पतः, पदः,

हनः, पटः ॥ १३ ॥

## चिक्लिद-चक्नसम् । ४ । १ । १४ ।

एतौ

केऽचि च

कृत-द्वित्वौ

निपात्येते ।

चिक्लिदः,

चक्नसः ॥ १४ ॥

दाश्वत्-साह्वत्-मीढ्वत् ।४।१।१५।

एते क्वसौ
अद्वित्वादयः
निपात्यन्ते ।
दाश्वांसौ, साह्वांसौ, मीढ्वांसौ ॥ १५॥

ज्ञप्यापो ज्ञीपीप्, न च द्विः सि सनि । ४ । १ । १६ ।

ज्ञपेः अपेश्च
सादौ सनि परे
यथासंख्यं
ज्ञीप्-ईपौ स्यातां,
न च अनयोः
एकस्वरः अंशः
द्वि स्यात् ।
ज्ञीप्सति, ईप्सति ।
सि इति किम् ?
जिज्ञपयिषति ॥ १६ ॥

ऋध ईर्त् । ४ । १ । १७ ।

ऋधः

सादौ सनि परे

ईर्त् स्यात्,

न च अस्य द्विः ।

ईर्त्सति ।

सि इत्येव ? अर्दिधिषति ॥१७॥

**दम्भो धिप्-धीप् ।४।१।१८।**

दम्भेः

सि सनि

धिप्-धीपौ स्यातां,

न चाऽस्य द्विः ।

धिप्सात-धीप्सति ।

सि इत्येव ?

दिदम्भिषति ॥१८॥

**अ-व्याप्यस्य मुचेमाक् वा ।४।१।१९।**

मुचेः अ-कर्म्मणः

सि सनि

मो क्वा स्यात्,

न च अस्य द्विः ।
मोक्षति-मुमुक्षति चैत्रः ।
अ-व्याप्यस्येति किम् ?
मुमुक्षति वत्सम् ॥ १९ ॥

## मि-मी-मा-दामित् स्वरस्य ।४।१।२०।

मि-मी-मा-दासंज्ञानां
स्वरस्य
सि सनि
इत् स्यात्,
न च द्विः ।
मित्सति, मित्सते,
मित्सते,
दित्सति, धित्सति ॥ २० ॥

## रभ-लभ-शक-पदामिः । ४ । १ । २१ ।

एषां
स्वरस्य
सि सनि
इः स्यात्,

न च द्विः ।
आरिप्सते,
लिप्सते, शिक्षति,
पित्सति, पित्सते ।
सि इत्येव ? पिपतिषति ॥२१॥

राधेर्वधे । ४ । १ । २२ ।

राधेः हिंसाऽर्थस्य
सि सनि
स्वरस्य इः स्यात्,
न च द्विः ।
प्रतिरित्सति ।
वध इति किम् ? आरिरात्सति ॥ २२ ॥

अवित्परोक्षा-सेट्-थवोरेः । ४ । १ । २३ ।

राधेः हिंसार्थस्य
अविति परोक्षायां,
थवि च सेटि
स्वरस्य एः स्यात्,
न च द्विः ।

रेधुः, रेधिथ ।

अवित् इति किम् ?

अपरराध ।

वध इत्येव ? आरराधतुः ॥२३॥

**अनादेशाऽऽदेरेकव्यञ्जनमध्येऽतः ।४।१।२४।**

अ-वित्परोक्षा-सेट्थवोः परयोः

यः अनादेशाऽऽदिः

तत्सम्बन्धिनः स्वरस्य अतः

असहाय-व्यञ्जनयोर्मध्यगतस्य

एः स्यात्,

न च द्विः ।

पेचुः, पेचिथ,

नेमुः, नेमिथ ।

अनादेशादेः इति किम् ?

बभणतुः ।

एकव्यञ्जनमध्य इति किम् ?

ततक्षिथ ।

अतः इति किम् ?

दिदिवतुः ।

सेट्थवि इत्येव,

पपक्थ ॥ २४ ॥

## तृ-त्रप-फल-भजाम् ।४।१।२५।

एषां

अवित्परोक्षा-सेट्थवोः

स्वरस्य एः स्यात्,

न च द्विः ।

तेरुः, तेरिथ, त्रेपे,

फेलुः, फेलिथ,

भेजुः, भेजिथ ॥ २५ ॥

## जृ-भ्रम-वम-त्रस-फण-स्यम-स्वन-राज-भ्राज-भ्रास-भ्लासो वा ।४।१।२६।

एषां स्वरस्य

अवित् परोक्षा-सेट्थवोः

एः वा स्यात्,

न च द्विः ।

जेरुः–जजरुः ।

जेरिथ–जजरिथ ।

भ्रेमुः–बभ्रमुः ।

भ्रेमिथ–बभ्रमिथ ।

वेमुः–ववमुः ।

वेमिथ–ववमिथ ।

त्रेसुः–तत्रसुः ।

त्रेसिथ–तत्रसिथ ।

फेणुः–पफणुः ।

फेणिथ,–पफणिथ ।

स्येमुः–सस्यमुः ।

स्येमिथ,–सस्यमिथ ।

स्वेनुः–सस्वनुः ।

स्वेनिथ–सस्वनिथ ।

रेजुः–रराजुः ।

रेजिथ–रराजिथ ।

भ्रेजे,–बभ्राजे ।

भ्रेसे, बभ्रासे ।

भ्लेसे,–बभ्लासे ॥ २६ ॥

'वा श्रन्थ-ग्रन्थो न-लुक् च ।४।१।२७।

अनयोः स्वरस्य
अवित् परोक्षा-सेट्थवोः
एः वा स्यात्,
तद्योगे च नो लुक्,
न च द्विः ।
श्रेथुः-शश्रन्थुः ।
श्रेथिथ-शश्रन्थिथ ।
ग्रेथुः-जग्रन्थुः ।
ग्रेथिथ-जग्रन्थिथ ॥ २७ ॥

दम्भः । ४ । १ । २८ ।

दम्भेः स्वरस्या
अवित्परोक्षायां
एः स्यात्,
न च द्विः ।
तद्योगे च नो लुक् ।
देभुः ॥ २८ ॥

थे वा । ४ । १ । २९ ।

दम्भेः स्वरस्य
थवि
एः वा स्यात्,
तद्योगे च नो लुक्,
न च द्विः ।
देभिथ-ददम्भिथ ॥ २९ ॥

**न शस-ददि-वादि-गुणिनः ।४।१।३०।**

शसि-दद्योः
वादीनां गुणिनां च
स्वरस्य
एः स्यात् ।
विशशसुः-
विशशसिथ,
ददद‍े, ववले,
विशशरुः-विशशरिथ ॥ ३० ॥

**हौ दः । ४ । १ । ३१ ।**

दासंज्ञस्य
हौ परे
एः स्यात्;

न च द्विः ।

देहि धेहि, ॥ ३१ ॥

## देर्दिगिः परोक्षायाम् । ४ । १ । ३२ ।

देङः

परोक्षायां

दिगिः स्यात्,

न च द्विः ।

दिग्ये ॥ ३२ ॥

## ङे पिबः पीप्य् ।४।१।३३।

ण्यन्तस्य पिबतेः

ङे परे

पीप्य् स्यात्,

न च द्विः ।

अपीप्यत् ॥ ३३ ॥

## अ-ङे हि-हनो ही घः पूर्वात् ।४।१।३४।

हि-हनोः

ङ-वर्जे प्रत्यये परे

द्वित्वे सति

पूर्वस्मात् परस्य
हौ धः स्यात् ।
प्रजिघाय, जंघन्यते ।
अ–ङ इति किम् ?
प्राजीहयत् ॥ ३४ ॥

**जेर्गिः सन्–परोक्षयोः । ४ । १ । ३५ ।**

सन्–परोक्षयोः
द्वित्वे सति
पूर्वात् परस्य
जेः गिः स्यात् ।
जिगीषति, विजिग्ये ॥ ३५ ॥

**चेः किर्वा । ४ । १ । ३६ ।**

सन्–परोक्षयोः
द्वित्वे सति
पूर्वस्मात् परस्य
चेः किः वा स्यात् ।
चिकीषति–चिचीषति ।
चिक्ये–चिच्ये ॥ ३६ ॥

## पूर्वस्याऽस्वे स्वरे य्वोरियुव् ।४।१।३७।

द्वित्वे सति यः पूर्वः
तत्सम्बन्धिनोः
इवर्णोवर्णयोः
अ स्वे स्वरे परे
इयुवौ स्याताम् ।
इयेष, अरियर्ति, उवोष ।
अ-स्व इति किम् ? ईषतुः ।
स्वर इति किम् ? इयाज ॥ ३७ ॥

## ऋतोऽत् । ४ । १ । ३८ ।

द्वित्वे सति
पूर्वस्य ऋतः
अत् स्यात् ।
चकार ॥ ३८ ॥

## ह्रस्वः । ४ । १ । ३९ ।

द्वित्वे सति
पूर्वस्य
ह्रस्वः स्यात् ।
पपौ ॥ ३९ ॥

ग-होर्जः । ४ । १ । ४० ।

द्वित्वे सति

पूर्वयोः

ग-होः

जः स्यात् ।

जगाम जहास ॥ ४० ॥

द्युतेरिः ४ । १ । ४१ ।

द्युतेः

द्वित्वे सति

पूर्वस्य

इः स्यात् ।

दिद्युते ॥ ४१ ॥

द्वितीय-तुर्ययोः पूर्वौ ।४।१।४२।

द्वित्वे

पूर्वयोः

द्वितीय-तुर्ययोः

यथासङ्ख्यं

पूर्वौ आद्यतृतीयौ स्याताम् ।

चखान, जझाम ॥ ४२ ॥

तिर्वा ष्ठिवः । ४ । १ । ४२ ।

ष्ठिवेः

द्वित्वे सति

पूर्वस्य

तिः

वा स्यात् ।

तिष्ठेव-टिष्ठेव ॥ ४३ ॥

व्यञ्जनस्याऽनादेर्लुक् । ४ । १ । ४४ ।

द्वित्वे

पूर्वस्य व्यञ्जनस्य

अनादेः

लुक् स्यात् ।

जग्ले ।

अनादेः इति किम् ?

आदेर्मा भूत्,

पपाच ॥ ४४ ॥

अ-घोषे शिटः । ४ । १ । ४५ ।

द्वित्वे

पूर्वस्य शिटः
तत्सम्बन्धिनि एव अघोषे
लुक् स्यात् ।
चुश्च्योत ।
अ-घोष इति किम् ?
सस्नौ ॥ ४५ ॥

**क-ङश्च-ञ् । ४ । १ । ४६ ।**

द्वित्वे
पूर्वयोः क-ङोः
यथासङ्ख्यं
च-ञौ स्याताम् ।
चकार, ञुङ्वे ॥ ४६ ॥

**न कवतेर्यङः । ४ । १ । ४७ ।**

यङन्तस्य कवतेः
द्वित्वे सति
पूर्वस्य कः
चः न स्यात् ।
कोकूयते खरः ।

कवतेः इति किम् ?

कौति-कुवत्योः मा भूत् ।

चोकूयते ।

यङः इति किम् ?

चुकुवे ॥ ४७ ॥

## आ-गुणौ अन्यादेः ।४।१।४८।

यङन्तस्य द्वित्वे

पूर्वस्य न्याद्यागमवर्जस्य

आ-गुणौ स्याताम् ।

पापच्यते, लोलूयते ।

अ-न्यादेः इति किम् ?

वनीवच्यते, जञ्जप्यते,

यंयम्यते ॥ ४८ ॥

## न हाको लुपि । ४ । १ । ४९ ।

हाको द्वित्वे

पूर्वस्य यङः

लुपि

आ न स्यात् ।

जहेति ॥ ४९ ॥

**वञ्च-स्रंस-ध्वंस-भ्रंस-कस-पत-पद-स्कन्दोऽन्तो नीः ४ । १ । ५० ।**

एषां यङन्तानां
द्वित्वे पूर्वस्य
नीः अन्तः स्यात् ।
वनीवच्यते, सनीस्रस्यते,
दनीध्वस्यते, वनीभ्रस्यते,
चनीकस्यते, पनीपत्यते,
पनीपद्यते, चनीस्कद्यते ॥५०॥

**मुरतोऽनुनासिकस्य । ४ । १ । ५१ ।**

आत् परो यः अनुनासिकः,
तदन्तस्य यङन्तस्य
द्वित्वे पूर्वस्य
मुः अन्तः स्यात् ।
बम्भण्यते ।
अतः इति किम्?
तेतिम्यते ।

अनुनासिकस्य इति किम् ?
पापच्यते ॥ ५१ ॥

**जप-जभ-दह-दश-भञ्ज-पशः ।४।१।५२।**

एषां यङन्तानां
द्वित्वे पूर्वस्य
मुः
अन्तः स्यात् ।
जञ्जप्यते, जञ्जभ्यते,
दन्दह्यते, दन्दश्यते,
बम्भज्यते, पम्पश्यते ॥ ५२ ॥

**चर–फलाम् । ४ । १ । ५२ ।**

एषां यङन्तानां
द्वित्वे
पूर्वस्य मुः अन्तः स्यात् ।
चञ्चूर्यते, पम्फुल्यते ॥ ५३ ॥

**ति चोपान्त्याऽतोऽनोदुः ।४।१।५४।**

यङन्तानां चरफलां
तादौ च प्रत्यये

उपान्त्यस्य अतः
उः स्यात्,
न च तस्य ओत्।
चञ्चूर्यते, पम्फुल्यते,
चूर्त्तिः, प्रफुल्लिः।
अतः इति किम्?
चञ्चार्यते पम्फाल्यते।
अनोंत् इति किम्?
चंचूर्त्ति, पम्फुल्लि ॥ ५४ ॥

**ऋमतां रीः। ४। १। ५५।**

ऋमतां यङन्तानां
द्वित्वे
पूर्वस्य
रीः अन्तः स्यात्
नरीनृत्यते ॥ ५५ ॥

**रि-रौ च लुपि। ४। १। ५६।**

ऋमतां यङः
लुपि द्वित्वे

पूर्वस्य रि-रौ,
रीश्चान्तः स्यात् ।
चरिकर्ति-चर्कर्ति-चरीकर्ति ॥ ५६ ॥

## निजां शित्येत् । ४ । १ । ५७ ।

निजि-विजि-विषां
शिति द्वित्वे
पूर्वस्य
एत् स्यात् ।
नेनेक्ति, वेवेक्ति, वेवेष्टि ।
शिति इति किम् ?
निनेज ॥ ५७ ॥

## पृ-ॠ-भृ-मा-हाङामिः ।४।१।५८।

एषां
शिति द्वित्वे
पूर्वस्य
इः स्यात् ।
पिपर्ति,
इयर्त्ति,

बिभर्त्ति
मिमीते,
जिहीते ।
हाङ् इति किम्?
जहाति ।
शिति इत्येव? पपार ॥ ५८ ॥

**सनि अस्य । ४ । १ । ५९ ।**

द्वित्वे
पूर्वस्य अतः
सनि परे
इः स्यात् ।
पिपक्षति ।
अस्य इति किम्? पापचिषते ॥ ५९ ॥

**ओर्जाऽन्तस्था-पवर्गेऽवर्णे ।४।१।६०।**

द्वित्वे पूर्वस्य उतः
अवर्णान्ते जाऽन्तस्था-पवर्गे परे
सनि
इः स्यात् ।

जिजावयिषति,
यियविषति,
यियावयिषति,
रिरावयिषति,
लिलावयिषति,
पिपविषते,
पियावयिषति,
मिमावयिषते ।
जान्तस्थापवर्ग इति किम् ?
जुहावयिषति ।
अवर्ण इति किम् ?
बुभूषति ॥ ६० ॥

## श्रु-स्रु-द्रु-प्रु-प्लु-च्योर्वा ।४।१।६१।

एषां
सनि द्वित्वे
पूर्वस्य उतः
अवर्णान्तायां अन्तस्थायां परस्यां
इः वा स्यात् ।
शिश्रावयिषति-शुश्रावयिषति ।

सिस्रावविषति–सुस्रावयिषति

दिद्रावयिषति–दुद्रावयिषति ।

पिप्रावयिषति–पुप्रावयिषति ।

पिप्लावयिषति–पुप्लावयिषति ।

चिच्यावयिषति–चुच्यावयिषति ॥६१॥

**स्वपो णावुः ।४।१।६२।**

स्वपेः

णौ सति

द्वित्वे पूर्वस्य

उत् स्यात् ।

सुष्वापयिषति ।

णौ इति किम् ?

सिष्वापकीयिषति ।

स्वपो णौ इति किम् ?

स्वापं चिकीर्षति, सिष्वापयिषति ।

स्वपो णौ सति द्वित्वे इति किम् ?

सोषोपयिषति ॥ ६२ ॥

**अ–समानलोपे सन्वत् लघुनि ङे ।४।१।६३।**

न विद्यते समानस्य लोपो यस्मिन्
तस्मिन् ङ-परे णौ
द्वित्वे पूर्वस्य
लघुनि धात्वक्षरे परे
सनीव कार्यं स्यात् ।
अचीकरत्,
अजीजवत्,
अशिश्रवत्,
लघुनि इति किम् ? अततक्षत् ।
णौ इत्येव ? अचकमत ।
अ-समानलोप इति किम् ?
अचकथत् ॥ ६३ ॥

## लघोर्दीर्घोऽस्वरादेः । ४ । १ । ६४ ।

अ-स्वरादेः
अ-समानलोपे
ङ-परे णौ
द्वित्वे पूर्वस्य
लघोः

लघुनि धात्वक्षरे परे
दीर्घः स्यात् ।
अचीकरत् ।
लघोः इति किम् ?
अचिक्वणत् ।
अ-स्वरादेः इति किम् ?
और्ण्णुनवत् ॥ ६४ ॥

**स्मृ-दॄ-त्वर-प्रथ-म्रद-स्तॄ-स्पशेरः ।४।१।६५।**

एषां
अ-समानलोपे
ङ-परे णौ
द्वित्वे
पूर्वस्य
अत् स्यात् ।
असस्मरत्, अददरत्,
अतत्वरत्, अपप्रथत्,
अमम्रदत्, अतस्तरत्,
अपस्पशत् ॥ ६५ ॥

## वा वेष्ट-चेष्टः । ४ । १ । ६६ ।

अनयोः

अ-समानलोपे

ङ-परे णौ

द्वित्वे पूर्वस्य

अद् वा स्यात् ।

अववेष्टत्–अविवेष्टत् ।

अचचेष्टत्–अचिचेष्टत् ॥ ६६ ॥

## ई च गणः । ४ । १ । ६७ ।

गणेः

ङ-परे णौ

द्वित्वे

पूर्वस्य ईः, अश्च स्यात् ।

अजीगणत्–अजगणत् ॥ ६७ ॥

## अस्याऽऽदेराः परोक्षायाम् । ४ । १ । ६८ ।

अस्यां द्वित्वे

पूर्वस्य आदेः अतः

आः स्यात् ।

आदुः, आरतुः ।

अस्य इति किम्? ईयुः ।

आदेः इति किम्ः ?

पपाच ॥ ६८ ॥

## अनातो नश्चान्तः ऋदाद्यशौ-संयोगस्य

। ४ । १ । ६९ ।

ऋदादेः

अश्नोतेः संयोगान्तस्य च

परोक्षायां द्वित्वे

पूर्वस्य आदेः

आत् स्थानात्

अन्यस्य

अस्य

आः स्यात्,

कृताऽऽतो नोऽन्तश्च ।

आनृधुः, आनशे, आनञ्ज ।

ऋदादि इति किम् ? आर ।

अनातः इति किम् ? आञ्छ ॥ ६९ ॥

भू-स्वपोरदुतौ । ४ । १ । ७० ।

भू-स्वपोः परोक्षायां द्वित्वे पूर्वस्य यथासंख्यम् अदुतौ स्याताम् । बभूव, सुष्वाप ॥ ७० ॥

ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः । ४ । १ । ७१ ।

एषां परोक्षायां द्वित्वे पूर्वस्य इः स्यात् । जिज्यौ, संविव्याय, विव्याध, विव्याच, विव्यथे ॥ ७१ ॥

## यजादि-वश्-वचः स-स्वराऽन्तस्था इ-उ-ऋत् । ४ । १ । ७२ ।

यजादेः
वश्-वचोश्च
परोक्षायां द्वित्वे
पूर्वस्य स-स्वराऽन्तस्थाः
इ-उ-ऋरूपाः
प्रत्यासत्त्या स्यात् ।

इयाज
उवाय,
उवाश,
उवाच ॥ ७२ ॥

## न वयो य् । ४ । १ । ७३ ।

वेगः वयः य्
परोक्षायां
य्वृत् न स्यात् ।
ऊयुः ॥ ७३ ॥

## वेरयः । ४ । १ । ७४ ।

वेगः

अयन्तस्य

पूर्वस्य परस्य च

परोक्षायां

य्वृत् न स्यात् ।

ववौ ।

अयः इति किम् ? उवाय ॥ ७४ ॥

अ-विति वा । ४ । १ । ७५ ।

वेगः

अयन्तस्य

अ-विति परोक्षायां

य्वृत् वा न स्यात्

ववुः-ऊवुः ॥ ७५ ॥

ज्यश्च यपि । ४ । १ । ७६ ।

ज्यः वेगश्च

यपि

य्वृत् न स्यात् ।

प्रज्याय, प्रवाय ॥ ७६ ॥

व्यः । ४ । १ । ७७ ।

व्यः

यपि

य्वृत् न स्यात् ।

प्रव्याय ॥ ७७ ॥

सं-परेर्वा । ४ । १ । ७८ ।

आभ्यां परस्य व्योः

यपि

य्वृत् वा न स्यात् ।

संव्याय-संवीय ।

परिव्याय-परिव्याय-परिवीय ॥७८॥

यजादि-वचेः किति ।४।१।७९।

यजादेः वचेश्च

स-स्वराऽन्तस्था

किति परे

य्वृत् स्यात्

ईजुः, ऊयुः, ऊचुः ।

किति इति किम् ? यक्षाष्ट ॥७९॥

**स्वपेर्यङ्-ङे- च । ४ । १ । ८० ।**

स्वपेः

यङि ङे किति च परे

स-स्वराऽन्तस्था

य्वृत् स्यात् ।

सोषुप्यते,

असूषुपत्,

सुषुप्सति ॥ ८० ॥

**ज्या-व्यधः क्ङिति । ४ । १ । ८१ ।**

ज्या-व्यधोः

स-स्वराऽन्तस्था

किति ङिति

य्वृत् स्यात् ।

जीयात्, जिनाति,

विध्यात्, विध्यति ॥ ८१ ॥

**व्यचोऽनसि । ४ । १ । ८२ ।**

व्यचेः

स-स्वराऽन्तस्था

अस्वर्जे क्ङिति

य्वृत् स्यात् ।

विचति ।

अनसि इति किम् ? उरुव्यचाः ॥ ८२ ॥

**वशेर-यङि । ४ । १ । ८३ ।**

वशेः

स-स्वराऽन्तस्था

अ-यङि क्ङिति

य्वृत् स्यत् ।

अष्टः, अशन्ति ।

अ-यङि इति किम् ?

वावश्यते ॥ ८३ ॥

**ग्रह-व्रश्च-भ्रस्ज-प्रच्छः । ४ । १ । ८४ ।**

एषां

स-स्वराऽन्तस्था

क्ङिति

य्वृत् स्यात् ।

जगृहुः, गृह्णाति,

वृक्णः, वृश्चति,

मृष्टः, मृज्जति,

पृष्टः, पृच्छा ॥ ८४ ॥

**व्ये-स्यमोर्यङि । ४ । १ । ८५ ।**

व्येग्-स्यमोः

स-स्वराऽन्तस्था

यङि

य्वृत् स्यात् ।

वेवीयते, सेसिमीति ॥ ८५ ॥

**चायः कीः । ४ । १ । ८६ ।**

चायोः

यङि

कीः स्यात् ।

चेकीतः ॥ ८६ ॥

**द्वित्वे ह्वः । ४ । १ । ८७ ।**

ह्वेगः

द्वित्वविषये

स-स्वराऽन्तस्था

य्वृत् स्यात् ।

जुहूषति ॥ ८७ ॥

**णौ ङ-सनि । ४ । १ । ८८ ।**

ह्वेगः

स-स्वराऽन्तस्था

ङ-परे

सन्-परे च

णौ विषये

य्वृत् स्यात् ।

अजूहवत् ,

जुहावयिषति ॥ ८८ ॥

**श्वेर्वा । ४ । १ । ८९ ।**

श्वेः

स-स्वराऽन्तस्था

ङ-परे,

सन्-परे

णौ विषये

य्वृद् वा स्यात् ।

अशूशवत्-अशिश्वयत् ।

शुशावयिषति-शिश्वाययिषति ॥८९॥

**वा परोक्षा-यङि । ४ । १ । ९० ।**

श्वः

स-स्वराऽन्तस्था

परोक्षा-यङोः

य्वृत् वा स्यात् ।

शुशाव-शिश्वाय ।

शोशूयते-शेश्वीयते ॥ ९० ॥

**प्यायः पीः । ४ । १ । ९१ ।**

प्यायः

परोक्षा-यङोः

पीः स्यात् ।

आपिप्ये, आपेपीतः ॥ ९१ ॥

**क्तयोरनुपसर्गस्य । ४ । १ । ९२ ।**

अनुपसर्गस्य प्यायेः

क्त-क्तवतोः

पीः स्यात् ।

पीनम्, पीनवत् मुखम् ।

अनुपसर्गस्य इति किम् ?

प्रप्यानो मेघः ॥ ९२ ॥

## आङोऽन्धूधसोः । ४ । १ । ९३ ।

आङः परस्य

प्यायेः अन्धौ ऊधसि चार्थे

क्तयोः परतः

पीः स्यात् ।

आपीनोऽन्धुः,

आपीनमूधः ।

अन्धूधसोः इति किम् ?

आप्यानश्चन्द्रः ।

आङ एव इति नियमात्-

प्राप्यानम् ऊधः ॥ ९३ ॥

## स्फायः स्फीर्वा । ४ । १ । ९४ ।

स्फायतेः

क्तयोः परयोः

स्फीर्वा स्यात् ।

स्फीतः—स्फीतवान् ।

स्फातः—स्फातवान् ॥ ९४ ॥

**प्रसमः स्त्यः स्तीः । ४ । १ । ९५ ।**

प्रसम्—समुदायपूर्वस्य

स्त्यः

क्तयोः परयोः

स्तीः स्यात् ।

प्रसंस्तीतः,

प्रसंस्तीतवान् ।

प्रसमः इति किम् ?

संप्रस्त्यानः ॥ ९५ ॥

**प्रात् तश्च मो वा । ४ । १ । ९६ ।**

प्रात् केवलात् परस्य

स्त्यः

क्तयोः परयोः

स्तीः स्यात्,

क्तयोः नः मश्च वा ।

प्रस्तीतः प्रस्तीतवान्—

प्रस्तीमः, प्रस्तीमवान् ॥ ९६ ॥

**श्यः शीर्द्रव-मूर्त्ति-स्पर्शे नश्चाऽस्पर्शे । ४ । १ । ९७ ।**

मूर्त्तिः=काठिन्यम्,
द्रव-मूर्त्ति-स्पर्शाऽर्थस्य श्यः
क्तयोः परयोः
शीः स्यात्,
तद्योगे च क्तयोः स्तः
अ-स्पर्शविषये नश्च ।
शीनम्, शीनवद् घृतम्,
शीतं वर्त्तते, शीतो वायुः ॥ ९७ ॥

**प्रतेः । ४ । १ । ९८ ।**

प्रतेः परस्य
श्यः
क्तयोः परयोः
शीः स्यात्,
तद्योगे क्तयोः तो न् च ।
प्रतिशीनः, प्रतिशीनवान् ॥ ९८ ॥

**वाऽभ्य-वाभ्याम् । ४ । १ । ९९ ।**

आभ्यां परस्य

श्यः

क्तयोः परयोः

शीः वा स्यात्,

तद्योगे च

क्तयोः तः

अ-स्पर्शे नश्च ।

अभिशीनः, अभिशीनवान् ।

अभिश्यानः, अभिश्यानवान् ।

अवशीनम्, अवश्यानं हिमम् ।

अवशीनवान्, अवश्यानवान् ॥ ९९ ॥

**श्रः शृतं हविः-क्षीरे । ४ । १ । १०० ।**

श्रातेः श्रायतेश्च

क्ते हविषि-क्षीरे चार्थे

शृः निपात्यते ।

शृतं हविः, शृतं क्षीरं स्वयमेव ।

हविः-क्षीर इति किम् ?

श्राणा यवागूः ॥ १०० ॥

**श्रपेः प्रयोक्त्रैक्ये । ४ । १ । १०१ ।**

श्रातेः श्रायतेर्वा
ण्यन्तस्य
एकस्मिन् प्रयोक्तरि
क्ते परे
हविःक्षीरयोः
श्रृः निपात्यते ।
श्रृतं हविः-क्षीरं वा चैत्रेण ।
हविः-क्षीर इत्येव ?
श्रपिता यवागूः ।
प्रयोक्त्रैक्य इति किम् ?
श्रपितं हविश्चैत्रेण मैत्रेण ॥ १०१ ॥

## य्वृत् सकृत् । ४ । १ । १०२ ।

अन्तस्थास्थानां
इ-उ-ऋत् सकृदेव स्यात् ।
संवीयते ॥ १०२ ॥

## दीर्घमवोऽन्त्यम् । ४ । १ । १०३ ।

वेग्-वर्जस्य य्वृत्
अन्त्यं दीर्घं स्यात् ।
जीनः ।

अ-व इति किम्? उतः ।
अन्त्यं इति किम्? सुप्तः ॥ १०३ ॥

## स्वर-हन्-गमोः सनि धुटि ।४।१।१०४।

स्वरान्तस्य हन्-गमोश्च
धुडादौ सनि
दीर्घः स्यात् ।
चिचीषति,
जिघांसति,
संजिगांसते ।
धुटि इति किम्?
यियविषति ॥ १०४ ॥

## तनो वा । ४ । १ । १०५ ।

तनेः
धुडादौ सनि
दीर्घो
वा स्यात् ।
तितांसति-तितंसति ।
धुटीत्येव? तितनिषति ॥ १०५ ॥

क्रमः क्त्वि वा । ४ । १ । १०६ ।

क्रमः धुडादौ क्त्वि दीर्घो वा स्यात् । क्रान्त्वा–क्रन्त्वा । धुटि इत्येव ? क्रमित्वा ॥ १०६ ॥

अ-हन्-पञ्चमस्य क्वि- क्ङिति । ४ । १ । १०७ ।

हन्–वर्जस्य पञ्चमान्तस्य क्वौ धुडादौ च क्ङिति दीर्घः स्यात् । प्रशान्, शान्तः, शंशान्तः । पञ्चमस्येति किम् ? पक्त्वा ।

अहन् इति किम्?
वृत्रहणि।
धुटीत्येव? यम्यते ॥ १०७ ॥

## अनुनासिके च च्छ्-वः शूट् । ४ । १ । १०८ ।

अनुनासिकादौ क्वौ
धुडादौ च
धातोः च्छ्वोः
यथासङ्ख्यं
श्-ऊटौ स्याताम्।
प्रश्नः, शब्दप्राशौ,
पृष्टः, स्योमा,
अक्षद्यूः, द्यूतः ॥ १०८ ॥

## मव्य-वि-श्रिवि-ज्वरि-त्वरेरुपान्त्येन । ४ । १ । १०९ ।

एषां
अनुनासिकादौ क्वौ
धुडादौ च प्रत्यये

उपान्त्येन सह

ऊट् स्यात् ।

मोमा, मूः, मूतिः,

ओमा, ओम्, ऊः, ऊतिः

श्रोमा, श्रूः. श्रूतिः,

जूर्मा, जूः, जूर्तिः,

तूर्मा, तूः, तूर्णः ॥ १०९ ॥

## रात् लुक् । ४ । १ । ११० ।

रात परयोः छ्वोः

अनुनासिकादौ क्वौ,

धुडादौ च प्रत्यये

लुक् स्यात् ।

मोर्मा, मूः, मूर्त्तिः ।

तोर्मा, तूः, तूर्णः ॥ ११० ॥

## क्तेऽनिटश्च-जोः क-गौ घिति । ४ । १ । १११ ।

क्ते

अनिटो धातोः

चजोः घिति

यथासंख्यं

क-गौ स्याताम् ।

पाकः, भोग्यम् ।

क्तेऽनिट इति किम् ?

सङ्कोचः, कूजः ॥ १११ ॥

## न्यङ्कू-द्गुग-मेघाऽऽदयः । ४ । १ । ११२ ।

न्यङ्क्वादयः कत्वे,

उद्गादयो गत्वे,

मेघादयो घत्वे कृते

निपात्यन्ते ।

न्यङ्कुः, शोकः,

उद्गः, न्युद्गः,

मेघः ओघः ॥ ११२ ॥

## न वञ्चेर्गतौ । ४ । १ । ११३ ।

गत्यर्थस्य वञ्चेः

कत्वं

न स्यात् ।

वञ्चं वञ्चन्ति ।

गतौ इति किम् ?

वङ्कं काष्ठम् ॥ ११३ ॥

**यजेर्यज्ञाङ्गे । ४ । १ । ११४ ।**

यज्ञाङ्गवृत्तेः

यजेःगत्वं न स्यात् ।

पञ्च प्रयाजाः

यज्ञांग इति किम् ? प्रयागः ॥११४॥

**घ्यण्यावश्यके । ४ । १ । ११५ ।**

आवश्यकोपाधिके घ्यणि

च-जोः

क-गौ न स्याताम् ।

अवश्यपाच्यम् , अवश्यरञ्ज्यम् ।

आवश्यक इति किम् ।

पाक्यम् ॥ ११५ ॥

**नि-प्राद् युजः शक्ये । ४ । १ । ११६ ।**

आभ्यां

युजः

शक्ये गम्ये

ध्यणि

गो न स्यात् ।

नियोज्यः, प्रयोज्यः ।

शक्य इति किम् ?

नियोग्यः ॥ ११६ ॥

## भुजो भक्ष्ये । ४ । १ । ११७ ।

भुजः भक्ष्यार्थे ध्यणि

गः

न स्यात् ।

भोज्यं पयः ।

भक्ष्य इति किम् ?

भोग्या भूः ॥ ११७ ॥

## त्यज-यज-प्रवचः । ४ । १ । ११८ ।

एषां

ध्यणि

क-गौ न स्याताम् ।

त्याज्यम्, याज्यम्,

प्रवाच्यः । ॥ ११८ ॥

## वचोऽ-शब्दनाम्नि । ४ । १ । ११९ ।

अ-शब्दसंज्ञायां वचे
ध्यणि
को न स्यात् ।
वाच्यम् ।
अ-शब्दनाम्नि इति किम् ॥
वाक्यम् ॥ ११९ ॥

## भुज-न्युब्जं पाणि-रोगे । ४ । १ । १२० ।

भुजे-न्युँब्जेश्च
घञन्तस्य
पाणौ रोगे चार्थे
यथासंख्यं
भुज-न्युब्जौ
निपात्येते ।
भुजः पाणिः,
न्युब्जो रोगः ॥ १२० ॥

## विरुध्-न्यग्रोधौ । ४ । १ । १२१ ।

वि-पूर्वस्य रुहेः क्विप्यपि,

न्यक्-पूर्वस्य चाऽचि

वीरुत्-न्यग्रोधौ

एतौ

धान्तौ निपात्येते ।

वीरुत्, न्यग्रोधः ॥१२१॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ
चतुर्थस्याध्यायस्य
प्रथमः पादः समाप्तः

ज्ञानार्थिभिः सम्यक् परिभावनीयम्

मोहनीय क्षयोपशममन्तरा

ज्ञानावरणक्षयोपशमो हि मद्य-
पहस्तस्थखड्गवत् आत्मविघाती भवे-
दिति सुज्ञ-विदुषामनुभवसत्यम् ॥

॥ श्री वर्धमानस्वामिने नमः ॥

चतुर्थाध्यायस्य—

# द्वितीयः पादः

## आत् सन्ध्यक्षरस्य ।४।२।१।

धातोः सन्ध्यक्षरान्तस्य

आत् स्यात् ।

संख्याता, सुग्लः ।

धातोः इत्येव ?

गोभ्याम् ॥ १ ॥

## न शिति । ४ । २ । २ ।

सन्ध्यक्षरान्तस्य

शिति विषयभूते

आत् न स्यात् ।

संव्ययति ॥ २ ॥

**ञ्यः थव्-णवि । ४ । २ । ३ ।**

ञ्यः

थवि णवि च विषये

आत् न स्यात् ।

संविव्याय संविव्ययिथ ॥ ३ ॥

**स्फुर-स्फुलोर्घञि । ४ । २ । ४ ।**

अनयोः

सन्ध्यक्षरस्य

घञि

आत् स्यात् ।

विस्फारः, विस्फालः ॥ ४ ॥

**वाऽपगुरो णमि । ४ । २ । ५ ।**

अपपूर्वस्य गुरेः

सन्ध्यक्षरस्य

णमि आत् वा स्यात् ।

अपगारम् अपगारम्-अपगोरम् अपगोरम् ॥५॥

दीङः सनि वा । ४ । २ । ६ ।

दीङः

सनि

आत् वा स्यात् ।

दिदासते-दिदीषते ॥ ६ ॥

यपक्ङिति । ४ । २ । ७ ।

दोङो

यपि-अक्ङिति च विषये

आत् स्यात् ।

उपदाय-उपदाता-उपदायाः

वर्त्तते ॥ ७ ॥

मिग्-मीगोऽखल्-अच्-अलि । ४ । २ । ८ ।

अनयोः

यपि

खल्-अच्-अल्वर्जे

अ-क्ङिति च विषये

आत् स्यात् ।

निमाय, निमाता,

प्रमाय, प्रमाता,

अ-खल-चलि इति किम् ?

ईषन्निमयः, दुःप्रमयः, मयः,

आमयः निमयः, प्रमयः ॥ ८ ॥

## लीङ्-लिनोर्वा । ४ । २ । ९ ।

अनयोः

यपि

खल्-अच्-अस्वर्जे

अ-क्ङिति च विषये

आत् वा स्यात् ।

विलाय-विलीय ।

विलाता-विलेता ।

अ-खल-चलि इति किम् ?

ईषद्विलयः विलयः,

विलयोऽस्ति ॥ ९ ॥

## णौ क्री-जि-इङः । ४ । २ । १० ।

एषां

णौ

आत् स्यात् ।

क्नोपयति,

जापयति,

अध्यापयति ॥ १० ॥

## सिध्यतेरज्ञाने । ४ । २ । ११ ।

अ-ज्ञानार्थस्य सिध्यतेः

णौ स्वरस्य

आत् स्यात् ।

मन्त्रं साधयति ।

अ-ज्ञान इति किम् ?

तपस्तापसं सेधयति । ॥११॥

## चि-स्फुरोर्णौ वा । ४ । २ । १२ ।

चि-स्फुरोः

णौ स्वरस्य

आत् वा स्यात् ।

चापयति-चाययति ।

स्फारयति-स्फोरयति ॥ १२ ॥

## वियः प्रजने । ४ । २ । १३ ।

गर्भाऽऽधानार्थस्य वियः

णौ

वा आत् स्यात् ।

पुरा वातो गाः

प्रवापयति-प्रवाययति ॥ १३ ॥

रुहः पः । ४ । २ । १४ ।

रुहेः

णौ

प् वा स्यात् ।

रोपयति-रोहयति वा तरुम् ॥ १४ ॥

## लियो नोऽन्तः स्नेहद्रवे । ४ । २ । १५ ।

लियः स्नेह-द्रवे गम्ये

णौ

नोऽन्तो वा स्यात् ।

घृतं विलीनयति-विलाययति ।

स्नेह-द्रव इति किम् ?

अयो विलाययति ॥ १५ ॥

लो लः । ४ । २ । १६ ।

लारूपस्य

णौ

स्नेहद्रवे गम्ये

लोऽन्तो

वा स्यात् ।

घृतं विलालयति-विलापयति वा।

स्नेहद्रव इत्येव ?

जटाभिः आलापयते ॥ १६ ॥

**पातेः । ४ । २ । १७ ।**

पातेः

णौ

लोऽन्तः स्यात् ।

पालयति ॥ १७ ॥

**धूग्-प्रीगोर्नः । ४ । २ । १८ ।**

धूग्-प्रीगोः

णौ

नोऽन्तः स्यात् ।

धूनयति, प्रीणयति ॥ १८ ॥

**वो वि-धूनने जः । ४ । २ । १९ ।**

वा इत्यस्य

वि–धूननेऽर्थे

णौ

जोऽन्तः स्यात् ।

पक्षेण उपवाजयति ।

वि–धूनन इति किम् ?

उच्चैः केशान् आवापयति ॥ १९ ॥

## पा-शा-छा-सा-वे-व्या-ह्वो यः ।४।२।२०।

एषां

णौ

योऽन्तः स्यात् ।

पाययति, शाययति,

अवच्छाययति, अवसाययति,

वाययति, व्याययति,

ह्वाययति ॥ २० ॥

## अर्ति-री-ब्ली-ह्री-क्नूयि-क्ष्मायि-आतां पुः

।४।२।२१।

एषां आदन्तानां च णौ पुरन्तः स्यात् । अर्पयति, रेपयति, ब्लेपयति, ह्रेपयति, क्नोपयति, क्ष्मापयति, दापयति, सत्यापयति, ॥ २१ ॥

**स्फायः स्फाव् । ४ । २ । २१ ।**

णौ स्फायः स्फाव् स्यात् । स्फावयति ॥ २२ ॥

**शदिरगतौ शात् । ४ । २ । २३ ।**

शदिः
अ-गत्यर्थे
णौ
शात् स्यात् ।
पुष्पाणि शातयति ।
अ-गतौ इति किम् ?
गाः शादयति ॥ २३ ॥

## घटादेर्ह्रस्वो, दोर्घस्तु वा ञि-णम्परे ।४।२।२४।

घटादीनां
णौ
ह्रस्वः स्यात्,
ञि-णम्परे तु णौ
वा दीर्घः ।
घटयति,
अघाटि-अघटि ।
घाटंघाटम्-घटंघटम् ।
व्यथयति, अव्याथि-अव्यथि ।
व्याथंव्याथम्-व्यथंव्यथम् ॥ २४ ॥

कगे-वन-जनै-जॄष्-क्नस्-रञ्जः ।४।२।२५

एषां

णौ

ह्रस्वः स्यात्,

ञि-णम्परे तु णौ

वा दीर्घः ।

कगयति-अकागि-अकगि ।

कागंकागम्-कगंकगम् ।

उपवनयति, उपावानि-उपावनि ।

उपवानमुपवानम्-उपवनमुपवनम् ।

जनयति, अजानि-अजनि ।

जानंजानम्-जनंजनम् ।

जरयति, अजारि-अजरि ।

जारंजारम्-जरंजरम् ।

क्नसयति, अक्नासि-अक्नसि ।

क्नासंक्नासम्-क्नसंक्नसम् ।

रजयति, अराजि-अरजि ।

राजंराजम्-रजंरजम् ॥ २५ ॥

**अमोऽकम्य-मि-चमः । ४ । २ । २६ ।**

कम्य-मि-चमिवर्जस्य
अमन्तस्य
णौ
ह्रस्वः स्यात्,
ञि-णम्परे तु णौ
वा दीर्घः ।
रमयति, अरामि-अरमि ।
रामंरामम्-रमंरमम् ।
अ-कम्य-मि-चम इति किम् ?
कामयते, अकामि, कामंकामम्,
आमयति, आचामयति ॥ २६ ॥

**पर्यपात् स्खदः । ४ । २ । २७ ।**

आभ्यामेव परस्य
स्खदेः
णौ ह्रस्वः स्यात्,
ञि-णम्परे तु
वा दीर्घः ।

परिस्खदयति, पर्यस्खादि-पर्यस्खदि ।

परिस्खादंपरिस्खादम्—परिस्खदंपरिस्खदम् ।

अपस्खादमपस्खादम्-अपस्खदमपस्खदम् ।

पर्यपात् इति किम् ?

प्रस्खादयति ॥ २७ ॥

**शमोऽदर्शने । ४ । २ । २८ ।**

अ—दर्शनार्थस्य शमेः

णौ ह्रस्वः स्यात्,

ञि—णम्परे तु

वा दीर्घः ।

शमयति रोगम् ।

अशामि—अशमि ।

शामं शामम्,—शमं शमम् ।

अ—दर्शन इति किम् ?

निशामयति रूपम् ॥ २८ ॥

**यमोऽपरिवेषणे णिचि च । ४ । २ । २९ ।**

अ—परिवेषणार्थस्य यमः

णिचि—अणिचि च णौ

ह्रस्वः स्यात्,

ञि-णम्परे तु वा दीर्घः ।

यमयति, अयामि-अयमि ।

यामंयामम्-यमंयमम् ।

अ-परिवेषणे इति किम्?

यामयति अतिथिम् ॥ २९ ॥

**मारण-तोषण-निशाने ज्ञश्च ।४।२।३०।**

एषु अर्थेषु

ज्ञः

णिचि अणिचि च णौ

ह्रस्वः स्यात्,

ञि-णम्परे तु

वा दीर्घः ।

संज्ञपयति पशुम्,

विज्ञपयति राजानम्,

प्रज्ञपयति शस्त्रम् ।

अज्ञापि-अज्ञपि ।

ज्ञापंज्ञापम्-ज्ञपंज्ञपम् ॥ ३० ॥

**चह्णः शाठ्ये । ४ । २ । ३१ ।**

चहेः चुरादेः
शाठ्यार्थस्य
णिचि णौ
ह्रस्वः स्यात्,
ञि-णम्परे तु
वा दीर्घः ।
चहयति, अचाहि-अचहि ।
चाहंचाहम्-चहंचहम् ।
शाठ्ये इति किम् ?
अचहि ॥ ३१ ॥

**ज्वल-ह्वल-ह्मल-ग्ला-स्ना-वनू-वम-नमोऽनुपसर्गस्य वा । ४ । २ । ३२ ।**

एषां
अनुपसर्गाणां
णौ
ह्रस्वो वा स्यात् ।
ज्वलयति-ज्वालयति ।
ह्वलयति-ह्वालयति ।

ह्मलयति-ह्मालयति ।

ग्लपयति-ग्लापयति ।

स्नपयति,-स्नापयति ।

वनयति-वानयति ।

वमयति-वामयति ।

नमयति-नामयति !

अनुपसर्गस्य इति किम् ?

प्रज्वलयति,

प्रह्वलयति,

प्रह्मलयति,

प्रग्लापयति,

प्रस्नापयति,

प्रवनयति,

प्रवमयति,

प्रणमयति ॥ ३२ ॥

## छदेरिस्-मन्-त्रट्-क्वौ । ४ । २ । ३३ ।

छदेः

इस्-मन्-त्रट्-क्विप् परे णौ

ह्रस्वः स्यात् ।

छदिः, छद्म,

छत्री, उपच्छत् ॥ ३३ ॥

**एकोपसर्गस्य च घे । ४ । २ । ३४ ।**

एकोपसर्गस्य

अनुपसर्गस्य च छदेः

घ-परे णौ

ह्रस्वः स्यात् ।

प्रच्छदः, छदः ।

एकोपसर्गस्य चेति किम् ?

समुपच्छादः ॥३४॥

**उपान्त्यस्याऽसमानलोपि-शासु-ऋदितो ङे । ४ । २ । ३५ ।**

समानलोपि-शासु-ऋदित् वर्जस्य

धातोः

उपान्त्यस्य

ङ-परे णौ

ह्रस्वः स्यात् ।

अपीपचत्,

मा भवान् अटिटत् ।

अ-समानलोपि-शास्वृदितः इति किम् ?

अत्यरराजत्, अशशासत्,

मा भवान् ओणिणत् ॥ ३५ ॥

**भ्राज-भास-भाष-दीप-पीड-जीव-मील-कण-रण-वण-भण-श्रण-ह्वे-हेठ-लुट-लुप-लपां नवा । ४ । २ । ३६ ।**

एषां

ङ-परे णौ

उपान्त्यस्य

ह्रस्वो वा स्यात् ।

अबिभ्रजत्—अबभ्राजत् ।

अबिभसत्—अबभासत् ।

अबीभषत्—अबभाषत् ।

अदीदिपत्—अदिदीपत् ।

अपीपिडत्—अपिपीडत् ।

अजीजिवत्—अजिजीवत्,

अमीलित्-अमिमीलत् ।

अचीकणत-अचकाणत् ।

अरीरणत्-अरराणत् ।

अवीवणत्-अववाणत् ।

अबीभणत्-अबभाणत् ।

अशिश्रणत्-अशश्राणत् ।

अजूहवत्-अजुहावत् ।

अजिहिठत्-अजिहेठत् ।

अलूलुटत्-अलुलोटत् ।

अलूलुपत्-अलुलोपत् ।

अलीलपत्-अललापत् । ॥३६॥

**ॠद्-ॠवर्णस्य । ४ । २ । ३७ ।**

उपान्त्यस्य ऋवर्णस्य

ङ-परे णौ

वा ऋः स्यात् ।

अवीवृतत्-अववर्त्तत् ।

अचीकृतत्-अचिकीर्त्तत् ॥३७॥

**जिघ्रतेरिः । ४ । । २ । ३८ ।**

घ्रः उपान्त्यस्य

ङ-परे

णौ

इः वा स्यात् ।

अजिघ्रिपत-अजिघ्रपत् ॥ ३८ ॥

**तिष्ठतेः । ४ । २ । ३९ ।**

स्थः

उपान्त्यस्य

ङ-परे णौ

इः स्यात ।

अतिष्ठिपत् ॥ ३९ ॥

**ऊद् दुषो णौ । ४ । २ । ४० ।**

दुषेः

उपान्त्यस्य

णौ

ऊत् स्यात् ।

दूषयति ॥ ४० ॥

**चित्ते वा । ४ । २ । ४१ ।**

चित्तकर्त्तृकस्य दुषेः

उपान्त्यस्य

णौ परे

ऊद् वा स्यात् ।

मनो दूषयति—मनो दोषयति मैत्रः ॥४१॥

**गोहः स्वरे । ४ । २ । ४२ ।**

कृतगुणस्य गुहेः

स्वरादौ

उपान्त्यस्य

ऊत् स्यात् ।

निगूहति ।

गोह इति किम् ? निजुगुहुः ॥४२॥

**भुवो वः परोक्षाऽद्यतन्योः ।४।२।४३।**

भुवो वन्तस्य

उपान्त्यस्य

परोक्षाऽद्यतन्योः

ऊत् स्यात् ।

बभूव, अभूवन्,

व इति किम् ?

बभूवान् , अभूत् ॥ ४३ ॥

**गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक् । ४ । २ । ४४ ।**

एषां

उपान्त्यस्य

अ-ङवर्जे

स्वरादौ क्ङिति परे

लुक् स्यात् ।

जग्मुः,

जघ्नुः,

जज्ञे,

चख्नुः,

जक्षुः ।

स्वर इति किम् ? गम्यते ।

अनङि इति किम् ? अगमत् ।

क्ङिति किम् ? गमनम् ॥ ४४ ॥

**नो व्यञ्जनस्यानुदितः । ४ । २ । ४५ ।**

व्यञ्जनान्तस्य
अनुदितः धातोः
उपान्त्यस्य नः
क्ङिति परे
लुक् स्यात् ।
स्रस्तः, सनीस्रस्यते ।
व्यञ्जनस्य इति किम् ?
नीयते ।
अनुदित इति किम् ?
नानन्द्यते ॥ ४५ ॥

**अञ्चोऽनर्चायाम् । ४ । २ । ४६ ।**

अनर्चार्थस्यैव
अञ्चेः
उपान्त्य—नः
क्ङिति परे
लुक् स्यात् ।
उदक्तमुदकं कूपात् ।
अनर्चायाम् इति किम् ?
अञ्चिताः गुरवः ॥ ४६ ॥

लङ्गि-कम्प्योरुपतापाऽङ्गविकृत्योः

। ४ । २ । ४७ ।

अनयोः

उपान्त्य-नः

यथासङ्ख्यं

उपतापे अङ्गविकारे चार्थे

क्ङिति परे

लुक् स्यात् ।

विलगितः, विकपितः ।

उपतापाऽङ्गविकृत्योः इति किम् ?

विलङ्गितः, विकम्पितः ॥ ४७ ॥

भञ्जेःञौ वा । ४ । २ । ४८ ।

भञ्जेः

उपान्त्य-नः

ञौ परे

लुग् वा स्यात् ।

अभाजि-अभञ्जि ॥ ४८ ॥

**दंश-सञ्जः शवि । ४ । २ । ४९ ।**

अनयोः

उत्पान्त्य-नः

शवि

लुक् स्यात् ।

दशति, सजति ॥ ४९ ॥

**अकट्-घिनोश्च रञ्जः । ४ । २ । ५० ।**

रञ्जः

अकटि घिनणि शवि च

उपान्त्य-नः

लुक् स्यात् ।

रजकः, रागी, रजति ॥ ५० ॥

**णौ मृगरमणे । ४ । २ । ५१ ।**

रञ्जः

उपान्त्य-नः

णौ

मृगाणां रमणेऽर्थे

लुक् स्यात्

रजयति मृगं व्याधः ।

मृगरमण इति किम् ?

रञ्जयति रजको वस्त्रम् ॥ ५१ ॥

घञि भाव-करणे । ४ । २ । ५२ ।

रञ्जेः

उपान्त्य-नः

भाव-करणार्थे घञि

लुक् स्यात् ।

रागः ।

भाव-करण इति किम् ?

आधारे-

रङ्गः ॥ ५२ ॥

स्यदो जवे । ४ । २ । ५३ ।

स्यन्देः

घञि

नलुक्-वृद्ध्यभावौ

निपात्येते,

वेगेऽर्थे ।

गोस्यदः ।

जत्र इति किम् ?

घृतस्यन्दः ॥ ५३ ॥

**दशनाऽवोद-एध-उद्म-प्रश्रथ-हिमश्रथम्**

**। ४ । २ । ५४ ।**

एते

न-लुगादौ कृते

निपात्यन्ते ।

दशनम् , अवोदः,

एधः, उद्मः,

प्रश्रथः, हिमश्रथः ॥ ५४ ॥

**यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति । ४ । २ । ५५ ।**

एषां तनादीनां च

धुडादौ क्ङिति

लुक् स्यात् ।

यतः, रत्वा, नतिः,

गतः, इतः, मतः,

वतिः, ततः, क्षतः ।

धुटीति किम् ? यम्यते ।

क्ङिति इति किम् ? यन्ता ॥५५॥

यपि । ४ । २ । ५६ ।

यम्यादीनां

यपि

लुक् स्यात् ।

प्रहत्य, प्रमत्य, प्रवत्य,

प्रतत्य-प्रसत्य ॥ ५६ ॥

वा मः । ४ । २ । ५७ ।

यम्यादीनां मान्तानां

यपि

वा लुक् स्यात्

प्रयत्य प्रयम्य ।

विरत्य-विरम्य ।

प्रणत्य-प्रणम्य ।

आगत्य-आगम्य ॥ ५७ ॥

गमां क्वौ । ४ । २ । ५८ ।

एषां गमादीनां यथादर्शनं क्वौ क्ङिति लुक् स्यात् । जनङ्गत्, संयत्, परीतत्, सुमत्, सुवत् ॥५८॥

न तिकि दीर्घश्च । ४ । २ । ५९ ।

एषां तिकि लुक्, दीर्घश्च न स्यात् । यन्तिः, रन्तिः, नन्तिः, गन्तिः, हन्तिः, मन्तिः, वन्तिः, तन्तिः ॥ ५९ ॥

आः खनि-सनि-जनः । ४ । २ । ६० ।

एषां धुडादौ क्ङिति

आः स्यात् ।

खातः, सातः,

जातः, जातिः ।

क्ङिति इत्येव ? चङ्खन्ति ।

धुटिइत्येव ? जनित्वा ॥ ६० ॥

**सनि । ४ । २ । ६१ ।**

एषां

धुडादौ सनि

आः स्यात् ।

सिषासति ।

धुटि इत्येव ? सिसनिषति ॥ ६१ ॥

**ये नवा । ४ । २ । ६२ ।**

एषां

ये क्ङिति

आः वा स्यात् ।

खायते-खन्यते ।

चाखायते-चङ्खन्यते ।

सायते-सन्यते ।

प्रजाय-प्रजन्य ।

किङति इत्येव ?

सान्यम् , जन्यम् ॥ ६२ ॥

**तनः क्ये । ४ । २ । ६३ ।**

तनः

क्ये

आः वा स्यात् ।

तायते-तन्यते ।

क्य इति किम् ? तन्तन्यते ॥६३॥

**तौ सनस्तिकि । ४ । २ । ६४ ।**

अनः

तिकि

तौ=लुगा-तौ

वा स्याताम् ।

सतिः-सातिः-सन्तिः ॥ ६४ ॥

**वन्याङ् पञ्चमस्य । ४ । २ । ६५ ।**

पञ्चमस्य

वनि

आङ् स्यात् ।

विजावा, द्यावा ॥६५॥

**अपात् चायश्चिः क्तौ । ४ । २ । ६६ ।**

अपपूर्वस्य चायतेः

क्तौ

चिः स्यात् । अपचितिः ॥ ६६ ॥

**ह्लादो ह्लद् क्तयोश्च । ४ । २ । ६७ ।**

ह्लादेः क्त–क्तवतोः

क्तौ च

ह्लद् स्यात् ।

ह्लन्नः, ह्लन्नवान्, ह्लत्तिः ॥६७॥

**ऋ-ल्वादेरेषां तो नोऽप्रः । ४ । २ । ६८ ।**

पृवर्जात् ऋदन्ताद्,

ल्वादिभ्यश्च परेषां

क्ति–क्त–क्तवतूनां

तो नः स्यात् ।

तीर्णिः, तीर्णः, तीर्णवान् ।

लूनिः, लूनः, लूनवान् ।

धूनिः, धूनः, धूनवान् ।

अ-प्र इति किम् ?

पूर्त्तिः, पूर्त्तः, पूर्त्तवान् ॥ ६८ ॥

**रदाद्-अमूर्च्छ-मदः क्तयोर्दस्य च । ४ । २ । ६९ ।**

मूर्च्छि-मदिवर्जाद्

र-दन्तात् परस्य

क्तयोः

तस्य

तद्योगे धातु-दश्च नः स्यात् ।

पूर्णः, पूर्णवान्,

भिन्नः, भिन्नवान् ।

अ-मूर्च्छ-मद इति किम् ?

मूर्त्तः, मत्तः ।

रदान्तस्येति किम् ?

चरितम्, मुदितम् ॥ ६९ ॥

**सूयत्याद्योदितः । ४ । २ । ७० ।**

सूयत्यादिभ्यो नवभ्यः
ओदिद्भ्यश्च परस्य
क्तयोः तः नः स्यात् ।
सूनः, सूनवान् .
दूनः, दूनवान्,
लग्नः, लग्नवान् ॥ ७० ॥

व्यञ्जनान्तस्थातोऽख्याध्यः ।४।२।७१।

ख्या-ध्यावर्जस्य धातोः
यद् व्यञ्जनं,
तस्मात् परा याऽन्तस्था,
तस्याः परो यः आः,
तस्मात् परस्य
क्तयोः तः नः स्यात् ।
स्त्यानः, स्त्यानवान् ।
व्यञ्जन इति किम् ? यातः ।
अन्तस्था इति किम् ? स्नातः
आतः इति किम् ? च्युतः ।
धातोर्व्यञ्जनेति किम् ? निर्यातः ।

अख्या-ध्य इति किम् ?

ख्यातः, ध्यातः ।

आतः परस्य इति किम् ?

दरिद्रितः ॥ ७१ ॥

**पू-दिवि-अञ्चेर्नाशाऽद्यूताऽनपादाने**

**। ४ । २ । ७२ ।**

एभ्यः

यथासङ्ख्यं

नाशाद्यर्थेभ्यः परस्य

क्तयोः तः नः स्यात् ।

पूना यवाः, आद्यूनः, समक्नौ पक्षौ ।

नाशाऽद्यूताऽनपादान इति किम् ?

पूतम्, द्यूतम्, उदक्तं जलम् ॥ ७२ ॥

**सेर्ग्रासे कर्म्मकर्त्तरि । ४ । २ । ७३ ।**

सेः परस्य

क्तयोः तः

ग्रासे कर्म्मकर्त्तरि

नः स्यात् ।

सिनो ग्रासः स्वयमेव ।

कर्म्म-कर्त्तरीति किम् ?

सितो ग्रासो मैत्रेण ॥७३॥

## क्षेः क्षी चाऽध्यार्थे । ४ । २ । ७४ ।

ध्यणोऽर्थो=भाव-कर्म्मणी,

ततोऽन्यस्मिन्नर्थे

क्तयोः तः

क्षेः परस्य

नः स्यात्,

तद्योगे क्षेः क्षीश्च ।

क्षीणः, क्षीणवान् मैत्रः ।

अ-ध्यार्थे इति किम् ? क्षितमस्य ।७४॥

## वाऽऽक्रोश-दैन्ये । ४ । २ । ७५ ।

आक्रोशे दैन्ये च गम्ये

क्षेः परस्य

अ-ध्यार्थे

क्तयोः तः

न् वा स्यात्,

तद्योगे क्षीश्च ।

क्षीणाऽऽयुर्जाल्मः ।

क्षीणकः-क्षितकस्तपस्वी ॥ ७५ ॥

## ऋ-ह्री-घ्रा-ध्रा-त्रा-उन्द-नुद-विन्तेर्वा । ४ । २ । ७६ ।

एभ्यः परस्य

क्तयोः तः

नो वा स्तात् ।

ऋणम्-ऋतम् ।

ह्रीणः-ह्रीतः ।

ह्रीणवान्-ह्रीतवान् ।

घ्राणः-घ्रातः ।

ध्राणः-ध्रातः

त्राणः,-त्रातः ।

समुन्नः-समुत्तः ।

नुन्नः-नुत्तः ।

विन्नः-वित्तः ॥ ७६ ॥

## दु-गोरू च । ४ । २ । ७७ ।

दु-गुभ्यां परस्य
क्तयोः तः
नः स्यात्,
तद्योगे दु-गोरूश्च ।
दूनः-दूनवान् ।
गूनः-गूनवान् ॥ ७७ ॥

## क्षै-शुषि-पचो म-क-वम् । ४ । २ । ७८ ।

एभ्यः परस्य
क्तयोस्तः
यथासङ्ख्यं म-क-वाः स्युः ।
क्षामः, क्षामवान् ।
शुष्कः, शुष्कवान् ।
पक्वः, पक्ववान् ॥ ७८ ॥

## निर्वाणमवाते । ४ । २ । ७९ ।

अ-वाते कर्त्तरि
निर्पूर्वाद् वातेः परस्य
क्तयोः तः
नो निपात्यते ।
निर्वाणो मुनिः ।

अ-वात इति किम् ?

निर्वाते वातः ॥ ७९ ॥

**अनुपसर्गाः क्षीबो-ल्लाघ-कृश-परिकृश-फुल्लो-त्फुल्ल-संफुल्लाः । ४ । २ । ८० ।**

अनुपसर्गाः

क्तान्ताः एते

निपात्यन्ते ।

क्षीबः, उल्लाघः

कृशः, परिकृशः,

फुल्लः, उत्फुल्लः, संफुल्लः ।

अनुपसर्गा इति किम् ?

प्रक्षीबितः ॥ ८० ॥

**भित्तं शकलम् । ४ । २ । ८१ ।**

भिदेः परस्य क्तस्य

नत्वाभावो निपात्यते,

शकलपर्यायश्चेत् ।

भित्तं शकलमित्यर्थः ।

शकलमिति किम् ? भिन्नम् ॥ ८१ ॥

## वित्तं धन-प्रतीतम् । ४ । १ । ८२ ।

विन्दतेः परस्य

क्तस्य

नत्वाभावो निपात्यते,

धन-प्रतीतयोः पर्यायश्चेत् ।

वित्तं=धनम् , वित्तः=प्रतीतः,

धन-प्रतीतमिति किम् ?

विन्नः ॥ ८२ ॥

## हु-धुटो हेर्धिः । ४ । २ । ८३ ।

होर्धुडन्ताच्च परस्य

हेः धिः स्यात् ।

जुहुधि, विद्धि ॥ ८३ ॥

## शास्-अस्-हनः शाधि-एधि जहि । ४ । २ । ८४ ।

शास्-अस्-हनां ह्यन्तानां

यथासंख्यं

शाधि-एधि-जहयः स्युः ।

शाधि, एधि, जहि ॥ ८४ ॥

**अतः प्रत्ययात् लुक् । ४ । २ । ८५ ।**

धातोः परो
यः अदन्तः प्रत्ययः
ततः परस्य
हेः लुक् स्यात् ।
दीव्य ।
अत इति किम् ? राध्नुहि ।
प्रत्ययात् इति किम् ? पापहि ॥८५॥

**अ-संयोगाद् ओः । ४ । २ । ८६ ।**

अ-संयोगात् परो य उः,
तदन्तात् प्रत्ययात् परस्य
हेः लुक् स्यात् ।
सुनु ।
अ-संयोगात् इति किम् ? अक्ष्णुहि ।
उः इति किम् ? क्रीणीहि ॥ ८६ ॥

**व-मि अविति वा । ४ । २ । ८७ ।**

अ संयोगात् परो य उः,
तदन्तस्य प्रत्ययस्य

लुग् वा स्यात्,
व-मादौ अ-विति परे।
सुन्वः-सुनुवः ।
सुन्मः-सुनुमः ।
अ-विति इति किम्? सुनोमि।
अ-संयोगात् इत्येव? तक्ष्णुवः ॥८७॥

**कृगो वि च ।४।२।८८।**

कृगः परस्य उतः
यादौ व-मि चाऽविति
लुक् स्यात्।
कुर्युः, कुर्वः, कुर्मः ॥ ८८ ॥

**अतः शित्युत् ।४।२।८९।**

शिति अ-विति य उः
तन्निमित्तस्य कृगः
अतः उः स्यात्।
कुरु ।
अ-विति इत्येव। करोति ॥ ८९ ॥

## श्नाऽस्त्योर्लुक् । ४ । २ । ९० ।

श्नस्य अस्तेः अतः
शिति अ-विति
लुक् स्यात् ।

रुन्द्धः, स्तः ।
अत इत्येव । आस्ताम् ॥ ९० ॥

## वा द्विषाऽऽतोऽनः पुस् । ४ । २ । ९१ ।

द्विषः आदन्ताच्च परस्य
शितः, अ-वितः
अनः स्थाने

पुस् वा स्यात् ।
अद्विषुः—अद्विषन् ।
अयुः—अयान् ॥ ९१ ॥

## सिज्-विदोऽभुवः । ४ । २ । ९२ ।

सिच्प्रत्ययाद्
विदश्च धातोः
परस्य

अनः पुस् स्यात् ।

न चेद् भुवः परः सिच् स्यात् ।

अकार्षुः, अविदुः ।

अ-भुव इति किम् ? अभूवन् ॥ ९२ ॥

## द्वयुक्त-जक्षपञ्चतः । ४ । २ । ९३ ।

कृतद्वित्वाद् जक्षपञ्चकाच्च परस्य

शितः अवितः

अनः पुस् स्यात् ।

अजुहवुः, अजक्षुः,

अदरिद्रुः, अजागरुः,

अचकासुः, अशासुः ॥९३॥

## अन्तो नो लुक् । ४ । २ । ९४ ।

द्वयुक्तजक्षपञ्चकात् परस्य

शितः

अ-वितः

अन्तः नः लुक् स्यात् ।

जुह्वति, जुह्वत्,
जक्षति, जक्षत्,
दरिद्रति, दरिद्रत् ॥ ९४ ॥

## शौ वा । ४ । २ । ९५ ।

द्वयुक्तजक्षपञ्चकात् परस्य
अन्तः नः
शिविषये
लुग् वा स्यात् ।
ददति-ददन्ति कुलानि ।
जक्षति-जक्षन्ति ।
दरिद्रति-दरिद्रन्ति ॥ ९५ ॥

## श्नश्चाऽऽतः । ४ । २ । ९६ ।

द्वयुक्तजक्षपञ्चतः श्नश्च
शिति अ-विति
आतः लुक् स्यात् ।
मिमते, दरिद्रति, क्रीणन्ति ।
अ-वितीत्येव ?
अजहाम्, अक्रीणाम् ॥९६॥

## एषामीर्व्यञ्जनेऽदः । ४ । २ । ९७ ।

द्व्युक्त-जक्षपञ्चतः श्नश्च
आतः
शिति अ-विति
व्यञ्जनादौ
इः स्यात्
न तु दासंज्ञस्य ।
मिमीते, लुनीतः ।
व्यञ्जन इति किम् ? मिमते
अ-द् इति किम् ? दत्तः, धत्तः ॥९७॥

## इर्दरिद्रः । ४ । २ । ९८ ।

दरिद्रः
व्यञ्जनादौ
शिति अ-विति
आतः
इः स्यात् ।
दरिद्रितः ।
व्यञ्जन इत्येव ? दरिद्रति ॥९८॥

## भियो नवा । ४ । २ । ९९ ।

भियः

व्यञ्जनादौ

शिति अ-विति

इः वा स्यात् ।

बिभितः-बिभीतः ॥ ९९ ॥

## हाकः । ४ । २ । १०० ।

हाकः

व्यञ्जनादौ शिति अ-विति

आतः इः

वा स्यात् ।

जहितः-जहीतः ॥ १०० ॥

## आ च हौ । ४ । २ । १०१ ।

हाकः हौ

आत् इश्च

वा स्यात् ।

जहाहि-जहिहि-जहीहि ॥ १०१ ॥

## यि लुक् । ४ । २ । १०२ ।

यादौ शिति

हाकः आः

लुक् स्यात् ।

जह्यात् ॥ १०२ ॥

## ओतः श्ये । ४ । २ । १०३ ।

धातोः अतोः

श्ये

लुक् स्यात् ।

अवद्यति ।

श्य इति किम् ?

गौरिवाचरति गवति ॥१०३॥

## जा ज्ञा-जनोऽत्यादौ । ४ । २ । १०४ ।

ज्ञा जनोः

शिति

जाः स्यात्,

नत्वनन्तरे तिवादौ ।

जानाति, जायते ।

अ-त्यादौ इति किम् ?

जाज्ञाति, जज्ञन्ति ॥१०४॥

**प्वादेर्ह्रस्वः । ४ । २ । १०५ ।**

प्वादेः

शिति अ-त्यादौ

ह्रस्वः स्यात् ।

पुनाति, लुनाति ।

प्वादेः इति किम् ? व्रीणाति ॥१०५॥

**गम्-इषद्-यमः छः । ४ । २ । १०६ ।**

एषां

छः स्यात् ।

गच्छति, इच्छति,

यच्छति, आयच्छते ।

अ-त्यादौ इति किम् ? जङ्गन्ति ॥१०३॥

**वेगे सर्त्तेर्धाव् । ४ । २ । १०७ ।**

सर्त्तेः

वेगे गम्ये

शिति

धाव् स्यात्,

अ—त्यादौ ।

धावति ।

वेग इति किम् ।

धर्ममनुसरति ॥ १०७ ॥

**श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्-दृशि-अर्त्ति-शद-सदः शृ-कृ-धि-पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-शीय-सीदम्**

। ४ । २ । १०८ ।

एषां

शिति अत्यादौ

यथासंख्यं

आऽऽदयः स्युः

शृणु, कृणु, धिनु,

पिब, जिघ्र, धम,

तिष्ठ, मन, यच्छ,

पश्य, ऋच्छ,

शीयते, सीद ॥ १०८ ॥

**क्रमो दीर्घः परस्मै । ४ । २ । १०९ ।**

क्रमेः

परस्मैपदनिमित्ते शिति

दीर्घः स्यात,

अ-त्यादौ ।

क्राम, क्राम्यति ।

परस्मैपद इति किम् ?

आक्रमते सूर्यः ॥ १०९ ॥

**ष्ठिवु-क्लमु- आ-चमः । ४ । २ । ११० ।**

एषां

शिति अ-त्यादौ

दीर्घः स्यात् ।

ष्ठीव, क्लाम, आचाम ।

आङ इति किम् ? चम ॥११०॥

**शमसप्तकस्य श्ये । ४ । २ । १११ ।**

शमादीनां सप्तानां

श्ये

दीर्घः स्यात् ।

शाम्य, दाम्य

ताम्य, भ्राम्य,

श्राम्य, क्षाम्य, माद्य ।

श्ये इति किम् ? भ्रमन्ति ।

अ–त्यादौ इत्येव ? शंशति ॥१११॥

**ष्ठिव्-सिवोऽनटि वा ।.४ । २ । ११२ ।**

ष्ठिव्–सिवोः

अनटि

दीर्घो वा स्यात् ।

निष्ठीवनम्–निष्ठेवनम् ।

सीवनम्—सेवनम् ॥ ११२ ॥

**म-वि अस्याः । ४ । २ । ११३ ।**

धातोर्विहिते

मादौ वादौ च

अतः आः दीर्घः स्यात्,
पचामि, पचावः पचामः ॥ ११३ ॥

**अनतोऽन्तोऽदात्मने । ४ । २ । ११४ ।**

अनतः परस्या
आत्मनेपदस्थस्य
अन्तः
अत् स्यात् ।
चिन्वते ।
आत्मनेपद इति किम् ? चिन्वति
अनत इति किम् ? पचन्ते ॥ ११४ ॥

**शीङो रत् । ४ । २ । ११५ ।**

शीङः परस्य
आत्मनेपदस्थस्य अन्तः
रत् स्यात् ।
शेरते ॥ ११५ ॥

**वेत्तेर्नवा । ४ । २ । ११६ ।**

वेत्तेः परस्य
आत्मनेपदस्थस्य अन्तः

रद् वा स्यात् ।

संविद्रते-संविदते ॥ ११६ ॥

**तिवां णवः परस्मै ।४।२।११७।**

वेत्तेः परेषां

परस्मैपदानां तिवादीनां

परस्मैपदान्येव णवादयो नव

यथासंख्यं

वा स्युः ।

वेद, विदतुः, विदुः

वेत्थ, विदथुः, विद,

वेद, विद्व, विद्म ।

पक्षे-वेत्तीत्यादि ॥ ११७ ॥

**ब्रूगः पञ्चानां पञ्चाऽऽहश्च ।४।२।११८।**

ब्रूगः परेषां

तिवादीनां पञ्चानां

यथासंख्यं

पञ्च णवादयो

वा स्युः,

तद्योगे ब्रूगः आहश्च ।

आह, आहतुः, आहुः,

आत्थ आहथुः ।

पक्षे, ब्रवीतीत्यादि ॥११८॥

## आशिषि तु-ह्योस्तातङ् ।४।२।११९।

आशीरर्थयोः

तु-ह्योः

स्तातङ्

वा स्यात् ।

जीवतात्-जीवतु भवान् ।

जीवतात्-जीव त्वम् ।

नन्दतात्-नन्द त्वम् ।

आशिषि इति किम्? जीवतु ॥११९॥

**आतो णव औः । ४ । २ । १२० ।**

आतः परस्य
णवः
औः स्यात् ।
पपौ ॥१२०॥

**आतामाते-आथामाथे आद् इः । ४ । २ । १२१ ।**

आत् परेषां
एषां
आतः
इः स्यात् ।
पचेताम् , पचेते,
पचेथाम् , पचेथे ।
आत् इति किम् ? मिमाताम् ॥ १२१ ॥

**यः सप्तम्याः । ४ । २ । १२२ ।**

आत् परस्य
सप्तम्याः याशब्दस्य इः स्यात् ।
पचेत् , पचेः ॥ १२२ ॥

## याम्-युसोः इयम्-इयसौ ।४।२।१२३।

आत् परयोः याम् युसोः यथासंख्यं इयम्–इयुसौ स्याताम् ।

पचेयम् , पचेयुः ॥ १२३ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ
चतुर्थस्याध्यायस्य
द्वितीयः पादः समाप्तः

### ० भाषासमितिः श्रामण्यश्च ०

श्रामण्यं हि समिति-गुप्तिपालनसम्भवं, तत्राऽपि स्वपर-कल्याणकारणापेक्षया भाषा-समितिः सुमहर्घा, तस्य च व्यवस्थितिः व्याकरणाऽध्ययनसापेक्षा. अतः ज्ञानाचार मर्यादया सज्ज्ञाननिश्रया व्याकरणाध्ययनं श्रमणानामितिकर्त्तव्यतारूपम् ॥

॥ श्री वर्धमानस्वामिने नमः ॥

चतुर्थाध्यायस्य–

# तृतीयः पादः

## नामिनो गुणोऽक्ङिति । ४ । ३ । १ ।

नाम्यन्तस्य धातोः

क्ङिद्वर्जे प्रत्यये

गुणः स्यात् ।

चेता ।

अ क्ङिति इति किम् ?

युतः ॥ १ ॥

## उ–श्नोः । ४ । ३ । २ ।

धातोः
उ-श्नोः प्रत्यययोः
अ-क्ङिति
गुणः स्यात् ।
तनोति, सुनोति ॥ २ ॥

**पुस्-पौ । ४ । ३ । ३ ।**

नाम्यन्तस्य धातोः
पुसि पौ च
गुणः स्यात् ।
ऐयरुः, अर्पयति ॥ ३ ॥

**लघोरुपान्त्यस्य । ४ । ३ । ४ ।**

धातोः उपान्त्यस्य
नामिनो लघोः
अ-क्ङिति
गुणः स्यात् । भेत्ता ।
लघोः इति किम् ? ईहते ।
उपान्त्यस्य इति किम् ? भिनत्ति ॥४॥

**मिदः श्ये । ४ । ३ । ५ ।**

मिदेः उपान्त्यस्य
श्ये
गुणः स्यात् ।
मेद्यति ॥ ५ ॥

जागुः किति । ४ । ३ । ६ ।

जागुः
किति
गुणः स्यात् ।
जागरितः ॥ ६ ॥

ऋवर्ण-दृशोऽङि । ४ । ३ । ७ ।

ऋवर्णान्तानां
दृशेश्च
अङि परे
गुणः स्यात् ।
आरत्, असरत्,
अजरत्, अदर्शत् ॥ ७ ॥

स्कृ-ऋच्छृतोऽकि परोक्षायाम् ।४।३।८।

स्कृ-ऋच्छोः
ऋदन्तानां च
नामिनः
परोक्षायां गुणः स्यात्,
न तु कोपलक्षितायां क्वसु-कानोः ।
सञ्चस्करुः आनर्च्छुः, तेरुः ।
अ-कि इति किम् ?
सञ्चस्कृवान् ॥ ८ ॥

## संयोगाद् ऋदर्त्तेः । ४ । ३ । ९ ।

संयोगात् परो यः ऋत्,
तदन्तस्य अर्त्तेश्च
परोक्षायां
अ-कि गुणः स्यात् ।
सस्मरुः, सस्वरुः, आरुः ।
संयोगात् इति किम्? चक्रुः ॥९॥

## क्य-यङा-शी-र्ये । ४ । ३ । १० ।

संयोगात् य ऋत्,
तदन्तस्य
अर्त्तेश्च

क्ये यङि आशी-र्ये च

गुणः स्यात् ।

स्मर्यते, स्वर्यते, अर्यते,

सास्मर्यते, सास्वर्यते, अरार्यते,

स्मर्यात्, अर्यात् ॥ १० ॥

**न वृद्धिश्चाविति क्ङिल्लोपे ।४।३।११।**

अ-विति प्रत्यये यः

कितो ङितश्च लोपः,

तस्मिन् सति

गुणो वृद्धिश्च

न स्यात् ।

चेच्यः, मरीमृजः ॥ ११ ॥

**भवतेः सिज्लुपि । ४ । ३ । १२ ।**

भुवः

सिज्लुपि

गुणो

न स्यात् ।

अ-भूत् ।

सिज्लुपि इति किम्?

व्यत्यभविष्ट ॥ १२ ॥

## सूतेः पञ्चम्याम् ।४।३।१३।

सूतेः

पञ्चम्यां

गुणो न स्यात् ।

सुवै ॥ १३ ॥

## द्व्युक्तोपान्त्यस्य शिति स्वरे ।४।३।१४।

द्व्युक्तस्य धातोः

उपान्त्यस्य

नामिनः

स्वरादौ शिति

गुणो न स्यात् ।

नेनिजानि ।

उपान्त्यस्य इति किम्?

जुहवानि ।

शिति इति किम्? निनेज ॥१४॥

**हु-इणोरप्विति व्-यौ । ४ । ३ । १५ ।**

होः इणश्च
नामिनः
स्वरादौ अ-पिति-अविति च
शिति यथासंख्यं
व्-यौ स्याताम् ।
जुह्वति, यन्तु ।
अ-प्-विति इति किम् ?
अजुहवुः । अयानि ॥ १५ ॥

**इको वा । ४ । ३ । १६ ।**

इकः स्वरादौ
अ-विति शिति
य् वा स्यात् ।
अधियन्ति-अधीयन्ति ॥ १६ ॥

**कुटादेर्ङिद्वद् अ-ञ्णित् । ४ । ३ । १७ ।**

कुटादेः परः
ञित्-णित्वर्जः प्रत्ययो
ङिद्वत् स्यात् ।

कुटिता, गुता ।

अ-ञ्-णित् इति किम् ?

उत्कोटः, उच्चुकोट ॥ १७ ॥

## विजेरिट् । ४ । ३ । १८ ।

विजेः इट्

ङिद्वत् स्यात् ।

उद्विजिता ।

इट् इति किम् ?

उद्वेजनम् ॥ १८ ॥

## वोर्णोः । ४ । ३ । १९ ।

ऊर्णोः

इट्

ङिद्वत् वा स्यात् ।

प्रोर्णुविता–प्रोर्णविता ॥१९॥

## शिद्वित् । ४ । ३ । २० ।

धातोः

विद्वर्जः

शित् प्रत्ययो

ङिद्वत् स्यात् ।

इतः, क्रीणाति ।

अ-वित् इति किम्? एति ।

शित् इति किम्? चेषीष्ट ॥ २० ॥

**इन्ध्यसंयोगात् परोक्षा किद्वत् । ।३।२१।**

इन्धेः

असंयोगान्ताच्च परा

अ-वित् परोक्षा

किद्वत् स्यात् ।

समीधे, निन्युः ।

इन्ध्य-संयोगात् इति किम्? सस्रंसे ॥ २१ ॥

**स्वञ्जेर्नवा । ४ । ३ । २२ ।**

स्वञ्जः

परोक्षा

किद्वत् वा स्यात् ।

सस्वजे—सस्वञ्जे ॥ २२ ॥

**ज-नशो न्युपान्त्ये तादिः क्त्वा**

**। ४ । ३ । २३ ।**

जन्तात् नशेश्च
न्युपान्त्ये सति
तादिः क्त्वा
किद्वत् वा स्यात् ।
रक्त्वा-रङ्क्त्वा ।
नष्ट्वा-नंष्ट्वा ।
नि इति किम् ? भुक्त्वा ।
उपान्त्य इति किम् ? निक्त्वा ।
तादिः इति किम् ? विभज्य ॥ २३ ॥

**ऋत्-तृष-मृष-कृश-वञ्च-लुञ्च-थ-फः सेट्**
। ४ । ३ । २४ ।

न्युपान्त्ये सति
एभ्यो
सेट् क्त्वा
किद्वत् वा स्यात् ।
ऋतित्वा-अर्त्तित्वा ।
तृषित्वा-तर्षित्वा ।

मृषित्वा-मर्षित्वा ।

कृशित्वा-कर्शित्वा ।

वचित्वा-वञ्चित्वा ।

लुचित्वा-लुञ्चित्वा ।

श्रथित्वा-श्रन्थित्वा ।

गुफित्वा-गुम्फित्वा ।

न्युपान्त्य इति किम् ?

कोथित्वा, रेफित्वा ।

सेट् इति किम् ? वक्त्वा ॥ २४ ॥

## वौ व्यञ्जनाऽऽदेः सन् चाऽय्-वः

## । ४ । ३ । २५ ।

वौ उदित् उपान्त्ये सति

व्यञ्जनादेः धातोः परः

क्त्वा सन् च

सेटौ

किद्वत् वा स्यातां,

न तु य्वन्तात् ।

द्युतित्वा—द्योतित्वा ।

दिद्युतिषते-दिद्योतिषते ।

लिखित्वा—लेखित्वा ।

लिलिखिषति-लिलेखिषति ।

वौ इति किम् ? वर्त्तित्वा ।

व्यञ्जनादेः इति किम् । ओषित्वा ।

अय्व इति किम् ? देवित्वा ॥ २५ ॥

## उति शवर्हाऽद्भ्यः क्तौ भावाऽऽरम्भे ।४।३।२६।

उति उपान्त्ये सति

शवर्हेभ्यः अदादिभ्यश्च परौ

भावाऽऽरम्भयोः

क्त-क्तवतू सेटौ

क्विद्वत् वा स्याताम् ।

कुचितम्, कोचितमनेन ।

प्रकुचितः, प्रकोचितः ।

प्रकुचितवान्, प्रकोचितवान् ।

रुदितम्—रोदितम् एभिः ।

प्ररुदितः, प्ररोदितः ।

प्ररुदितवान्, प्ररोदितवान् ।

उति इति किम् ? श्वितितम् एभिः ।

शवर्हाद्भ्यः इति किम् ? प्रगुधितः ।

भावारम्भ इति किम् ? रुचितः ॥२६॥

## न डीङ्-शीङ्-पूङ्-धृषि-क्ष्विदि-स्विदि-मिदः । ४ । ३ । २७ ।

एभ्यः परौ

सेटौ क्त-क्तवतू

किद्वत् न स्याताम् ।

डयितः, डयितवान् ।

शयितः, शयितवान् ।

पवितः, पवितवान् ।

प्रधर्षितः प्रधर्षितवान् ।

प्रक्ष्वेदितः, प्रक्ष्वेदितवान् ।

प्रस्वेदितः प्रस्वेदितवान् ।

प्रमेदितः प्रमेदितवान् ।

सेटौ इत्येव

डीनः, डीनवान् ॥ २७ ॥

**मृषः क्षान्तौ । ४ । ३ । २८ ।**

क्षमाऽर्थात् मृषः

सेटौ क्त–क्तवतू

किद्वत् न स्याताम् ।

मर्षितः, मर्षितवान् ।

क्षान्तौ इति किम् ?

अपमृषितं वाक्यम् ॥ २८ ॥

**क्त्वा । ४ । ३ । २९ ।**

धातोः

से क्त्वा

किद्वत् स्यात् ।

देवित्वा ।

सेट् इत्येव,

कृत्वा ॥ २९ ॥

**स्कन्द–स्यन्दः । ४ । ३ । ३० ।**

आभ्यां
क्त्वा
किद्वत् न स्यात् ।
स्कन्त्वा, स्यन्त्वा ॥ ३० ॥

## क्षुध-क्लिश-कुष-गुध-मृड-मृद-वद-वसः ।४।३।३१।

एभ्यः
सेट् क्त्वा
किद्वत् स्यात् ।
क्षुधित्वा, क्लिशित्वा,
कुषित्वा, गुधित्वा,
मृडित्वा, मृदित्वा,
उदित्वा, उषित्वा ॥ ३१ ॥

## रुद-विद-मुष-ग्रह-स्वप-प्रच्छः सन् च ।४।३।३२।

एभ्यः
क्त्वा सन् च
किद्वत् स्यात् ।

रुदित्वा, रुरुदिषति,
विदित्वा, विविदिषति,
मुषित्वा, मुमुषिषति,
गृहीत्वा, जिघृक्षति,
सुप्त्वा, सुषुप्सति,
पृष्ट्वा, पिपृच्छिषति ॥३२॥

**नामिनोऽनिट् । ४ । ३ । ३३ ।**

नाम्यन्तात् धातोः
अनिट् सन्
किद्वत् स्यात् ।
चिचीषति ।
अनिट् इति किम्? शिशयिषते ॥३३॥

**उपान्त्ये । ४ । ३ । ३४ ।**

नामिनः उपान्त्ये सति
धातोः अनिट् सन्
किद्वत् स्यात् ।
बिभित्सति । ३४ ॥

## सिजाशिषौ आत्मने । ४ । ३ । ३५ ।

नामिनि उपान्त्ये सति
धातोः
आत्मनेपदविषयौ
अनिटौ सिजाशिषौ
किद्वत् स्याताम् ।
अभित्त, भित्सीष्ट ।
आत्मने इति किम् ?
अस्राक्षीत् ॥ ३५ ॥

## ऋवर्णात् । ४ । ३ । ३६ ।

ऋवर्णान्ताद् धातोः
अनिटौ आत्मनेपदविषयौ
सिजाशिषौ
किद्वत् स्याताम् ।
अकृत् , कृषीष्ट,
अतीर्ष्ट, तीर्षीष्ट ॥ ३६ ॥

## गमो वा । ४ । ३ । ३७ ।

गमेः
आत्मनेपदविषयौ
सिजाशिषौ

क्तिद्वत वा स्याताम् ।
समगत-समगंस्त ।
संगसीष्ट-संगंसीष्ट ॥ ३७ ॥

**हनः सिच् । ४ । ३ । ३८ ।**

हन्तेः
आत्मनेपदविषयः सिच्
क्तिद्वत् स्यात् ।
आहत ॥ ३८ ॥

**यमः सूचने । ४ । ३ । ३९ ।**

सूचनार्थाद् यमेः
आत्मनेपदविषयः सिच्
क्तिद्वत् स्यात् ।
उदायत ।
सूचने इति किम् ?
आयंस्त रज्जुम् ॥ ३९ ॥

**वा स्वीकृतौ । ४ । ३ । ४० ।**

स्वीकारार्थाद् यमेः

आत्मनेपदविषयः सिच्
किद्वद् वा स्यात् ।
उपायत्–उपायंस्त महास्त्राणि ।
स्वीकृतौ इति किम् ?
आयंस्त पाणिम् ॥ ४० ॥

**इश्च स्था–दः । ४ । ३ । ४१ ।**

स्थः दासंज्ञकाच्च
आत्मनेपदविषयः सिच्
किद्वत् स्यात्,
तद्योगे स्था–दोः इश्च ।
उपास्थित,
आदित, व्यधित ॥ ४१ ॥

**मृजोऽस्य वृद्धिः । ४ । ३ । ४२ ।**

मृजेः
गुणे सति
अस्य
वृद्धिः स्यात् ।
मार्ष्टि ।

अतः इति किम् ?
मृष्टः ॥ ४२ ॥

## ऋतः स्वरे वा । ४ । ३ । ४३ ।

मृजेः ऋतः
स्वरादौ प्रत्यये
वृद्धिर्वा स्यात् ।
परिमार्जन्ति—परिमृजन्ति ।
ऋत इति किम् ? ममार्ज ।
स्वर इति किम् । मृज्वः ॥ ४३ ॥

## सिचि परस्मै समानस्याऽङिति ।४।३।४४।

समानाऽन्तस्य धातोः
परस्मैपदविषये सिचि
अ-ङिति
वृद्धिः स्यात् ।
अचैषीत् ,
परस्मैपद इति किम् ? अच्योष्ट ।
समानस्य इति किम ? अगवीत् ।
अ-ङिति इति किम् ? न्यनुवीत् ॥४४॥

## व्यञ्जनानामनिटि । ४ । ३ । ४५ ।

व्यञ्जनान्तस्य धातोः

परस्मैपदविषये अनिटि सिचि

समानस्य

वृद्धिः स्यात् ।

अराङ्क्षीत् ।

समानस्य इत्येव ? उदवोढाम् ।

अनिटि इति किम् ? अतक्षीत् ॥४५॥

## वोर्णुगः सेटि । ४ । ३ । ४६ ।

ऊर्णोः

सेटि सिचि

परस्मैपदे

वृद्धिर्वा स्यात् ।

प्रौर्णावीत्-प्रोर्णवीत्-प्रोर्णुवीत् ॥४६॥

## व्यञ्जनादेर्वोपान्त्यस्याऽतः ।४।३।४७।

व्यञ्जनादेः धातोः

उपान्त्यस्य अतः

सेटि सिचि
परस्मैपदे
वृद्धिर्वा स्यात् ।
अकाणीत्–अकणीत् ।
व्यञ्जनादेः इति किम् ?
मा भवान् अटीत् ।
उपान्त्यस्य इति किम् ? अवधीत् ।
अतः इति किम् ? अदेवीत् ।
सेटि इत्येव ? अधाक्षीत् ॥ ४७ ॥

**वद-व्रज-ल्र्‌ः । ४ । ३ । ४८ ।**

वद्–व्रजोः
लन्त–रन्तयोः
उपान्त्यस्य
परस्मैपदे सेटि सिचि
वृद्धिः स्यात् ।
अवादीत्, अव्राजीत्,
अज्वालीत्, अक्षारीत् ॥ ४८ ॥

**न श्वि-जागृ-शस-क्षण-हृ-म्-येदितः । ४ । ३ । ४९ ।**

एषां ह्म्यन्तानां
एदितां च
परस्मैपदे
सेटि सिचि
वृद्धिर्न स्यात् ।
अश्वयीत्, अजागरीत्,
अशसीत्, अक्षणीत्,
अग्रहीत्, अवमीत्,
अहयीत्, अकगीत् ॥ ४९ ॥

ञ्णिति । ४ । ३ । ५० ।

ञिति णिति च परे
धातोः
उपान्त्यस्य
अतः
वृद्धिः स्यात् ।
पाकः, पपाच ॥ ५० ॥

नामिनोऽकलि-हलेः । ४ । ३ । ५१ ।

नाम्यन्तस्य धातोः
नाम्नः
कलि-हलिवर्जस्य

ञ्णिति

वृद्धिः वा स्यात् ।

अचायि, कारकः, अपीपटत् ।

कलि-हलिवर्जनं किम् ?

अचकलत् , अजहलत् ॥ ५१ ॥

## जागुर्ञि-णवि । ४ । ३ । ५२ ।

जागुः

ञौ णवि एव च

ञ्णिति

वृद्धिः स्यात् ।

अजागारि, जजागार ।

ञि—णवि एव इति किम् ?

जागरयति ॥ ५२ ॥

## आत ऐः कृत्-ञौ । ४ । ३ । ५३ ।

आदन्तस्य धातोः

ञ्णिति कृति ञौ च

ऐः स्यात् ।

दायः, दायकः, अदायि ।

कृत् इति किम् ? ददौ ॥ ५३ ॥

**न जन–वधः । ४ । ३ । ५४ ।**

अनयोः
कृति ञ्णिति ञौ च
वृद्धिः न स्यात् ।
प्रजनः, जन्यः, अजनि,
वधः, वध्यः, अवधि ॥ ५४ ॥

**मोऽकमि-यमि-रमि-नमि-गमि-वम्-आचमः । ४ । ३ । ५५ ।**

मन्तस्य धातोः
कम्यादिवर्जस्य
ञ्णिति कृति ञौ च
वृद्धिः न स्यात् ।
शमः, शमकः, अशमि ।
कम्यादिवर्जनं किम् ?
कामः, कामुकः अकामि
यामः, रामः, नामः,
अगामि, वामः,
आचामकः ॥ ५५ ॥

## वि-श्रमेर्वा । ४ । ३ । ५६ ।

वि-श्रमेः
ञ्णिति कृति ञौ च
वृद्धिर्वा स्यात् ।
विश्रामः—विश्रमः
विश्रामकः-विश्रमकः ।
व्यश्रामि-व्यश्रमि ॥ ५६ ॥

## उद्यमो-परमौ । ४ । ३ । ५७ ।

उदु-पाभ्यां
यमि-रम्योः
घञि
वृद्ध्यभावो
निपात्यते ।
उद्यमः, उपरमः ॥ ५७ ॥

## णिद् वाऽन्त्यो णव् । ४ । ३ । ५८ ।

परोक्षाया अन्त्यो णव्
णित् वा स्यात् ।

अर्हं-
-चिचय-चिचाय ।
-चुकुट-चुकोट ।
अन्त्य इति किम् ? स पपाच ॥ ५८ ॥

## उत औः विति व्यञ्जनेऽद्वेः ।४।३।५९।

अ-द्व्युक्तस्य
उदन्तस्य धातोः
व्यञ्जनादौ विति
औः स्यात् ।
यौति ।
उत इति किम् ? एति ।
धातोः इत्येव ? सुनोति ।
विति इति किम् ? स्तुतः ।
व्यञ्जन इति किम् ? स्तवानि ।
अ-द्वेः इति किम् ? जुहोति ॥५९॥

## वोर्णोः । ४ । ३ । ६० ।

ऊर्णोः
अ-द्व्युक्तस्य
व्यञ्जनादौ विति

औः वा स्यात् ।

प्रोर्णौति-प्रोर्णोति ।

अ-द्वेः इत्येव ? प्रोर्णोनोति ॥६०॥

## न दि-स्योः । ४ । ३ । ६१ ।

ऊर्णोः

दि-स्योः परयोः

औः न स्यात् ।

प्रौर्णोत्, प्रौर्णोः ॥ ३१ ॥

## तृहः श्नाद् ईत् । ४ । ३ । ६२ ।

तृहेः

श्नात् परः

व्यञ्जनादौ त्रिति-परे

ईत् स्यात् ।

तृणेढि ॥ ६२ ॥

## ब्रूतः परादिः । ४ । ३ । ६३ ।

ब्रुवः ऊतः परः

व्यञ्जनादौ विति

परादिः ईत् स्यात् ।

ब्रवीति ।

ऊत इति किम् ? आत्थ ॥६३॥

**यङ्-तु-रु-स्तोर्बहुलम् । ४ । ३ । ६४ ।**

यङ्लुबन्तात्

तु–रु–स्तुभ्यश्च परः

व्यञ्जनादौ विति

ईत् बहुलं

परादिः स्यात् ,

क्वचिद्वा–

बोभवीति–बोभोति ।

क्वचिन्न– वर्वर्त्ति ।

तवीति–तौति ।

रवीति–रौति ।

स्तवीति–स्तौति ।

अ–द्वेः इत्येव ? तुतोथ, तुष्टोथ ॥ ६४ ॥

**सः सिचः तेर्दि-स्योः । ४ । ३ । ६५ ।**

सिजन्ताद् धातोः
स्तेश्च सन्तात् परः
दि-स्योः परयोः
परादिः ईत् स्यात् ।
अकार्षीत्, अकार्षीः,
आसीत् आसीः ।
स इति किम् ? अदात् ॥ ३५ ॥

## पिब-एति-दा-भू-स्थः सिचो लुप् परस्मै न चेट् । ४ । ३ । ६६ ।

एभ्यः परस्य
सिचः
परस्मैपदे
लुप् स्यात्,
लुप्-योगे
न च इट् ।
अपात्, अगात्,
अध्यगात्,
अदात्, अधात्,

अभूत् , अस्थात् ।

परस्मैपद इति किम् ?

अपासत पयांसि तैः ॥ ६६ ॥

## ट्धे-घ्रा-शा-च्छा-सो वा ।४।३।६७।

एभ्यः परस्य

सिचः

परस्मैपदे

लुब् वा स्यात्,

लुप् योगे च न इट् ।

अधात्-अधासीत् ।

अघ्रात्–अघ्रासीत् ।

अशात्–अशासीत् ।

अच्छात्–अच्छासीत् ।

असात्–असासीत् ॥ ६७ ॥

## तन्भ्यो वा त-थासि न्-णोश्च ।४।३।६८।

तनादिभ्यः परस्य सिचः

ते थासि च

लुप् वा स्यात्,

तद्योगे न-णोश्च लुप्,

न च इट्

अतत-अतनिष्ट ।

अतथाः-अतनिष्ठाः ।

असत-असनिष्ट ।

असथाः-असनिष्ठाः ॥ ६८ ॥

**सनस्तत्र आ वा । ४ । ३ । ६९ ।**

सनः लुपि सत्यां

आ वा स्यात् ।

असात-असत ।

असाथाः-असथाः ।

तत्र इति किम् ? असनिष्ट ॥६९॥

**धुट्-ह्रस्वात् लुगनिटस्त-थोः**

**। ४ । ३ । ७० ।**

धुडन्तात् ह्रस्वान्ताच्च

धातोः परस्य
अनिटः सिचः
तादौ थादौ च
लुक् स्यात् ।
अभित्त, अभित्थाः,
अकृत, अकृथाः ।
अनिट इति किम् ? व्यद्योतिष्ट ॥७०॥

## इट ईति । ४ । ३ । ७१ ।

इटः परस्य
सिचः
ईति
लुक् स्यात् ।
अलावीत् ।
इट इति किम् ? अकार्षीत् ।
ईति इति किम् ? अभणिषम् ॥७१॥

## सो धि वा । ४ । ३ । ७२ ।

धातोः धादौ प्रत्यये
सः लुग्

वा स्यात्,

चकाधि–चकाद्धि ।

अलविध्वम्–अलविड्ढ्वम् ॥ ७२ ॥

## अस्तेः सि हस्तु एति । ४ । ३ । ७३ ।

अस्तेः सः

सादौ प्रत्यये

लुक् स्यात्,

एति तु

सो हः ।

असि, व्यतिसे,

व्यतिहे, मावयामाहे ॥७३॥

## दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः । ४ । ३ । ७४ ।

एभ्यः परस्य सकः

दन्त्यादौ आत्मनेपदे

लुग् वा स्यात् ।

अदुग्ध–अधुक्षत ।

अदिग्ध-अघिक्षत ।

अलीढाः-अलिक्षथाः ।

न्यगुह्वहि—न्यघुक्षावहि ।

दन्त्य इति किम् ? अधुक्षामहि ॥७४॥

**स्वरेऽतः । ४ । ३ । ७५ ।**

सकः अस्य

स्वरादौ प्रत्यये

लुक् स्यात् ।

अधुक्षाताम् ॥ ७५ ॥

**दरिद्रोऽद्यतन्यां वा । ४ । ३ । ७६ ।**

दरिद्रः अद्यतन्यां विषये

लुग् वा स्यात् ।

अदरिद्रीत्—अदरिद्रासीत् ॥७६॥

**अ-शित्य-स्-सन्-णक-च्-णकाऽनटि । ४ । ३ । ७७ ।**

सादि-सन्नादिवर्जे

अ-शिति विषये

दरिद्रः लुक् स्यात् ।

दुर्दरिद्रम् ।

अ-शिति इति किम् ? दरिद्राति ।

सन्नादिवर्जनं किम् ?

दिदरिद्रासति,

दरिद्रायको याति,

दरिद्रायकः, दरिद्राणम् ॥७७॥

## व्यञ्जनाद् देः सश्च दः ।४।३।७८।

धातोः व्यञ्जनान्तात् परस्य

देः लुक् स्यात्,

यथासम्भवं

धातोः सः दश्च ।

अचकात्,

अजागः, अबिभः,

अन्वशात् ।

व्यञ्जनात् इति किम् ? अयात् ॥७८॥

## सेः सृ-द्-धां च रुर्वा ।४।३।७९।

व्यञ्जनान्ताद् धातोः परस्य
से: लुक् स्यात्,
यथासम्भवं
स-द्-धां
वा रुश्च ।
अचकास्त्वम् अचकात् त्वम् ।
अभिनस्त्वम्-अभिनत् त्वम् ।
अरुणस्त्वम्-अरुणत् त्वम् ॥७९॥

## योऽशिति । ४ । ३ । ८० ।

धातोः व्यञ्जनान्तात् परस्य
यः
अ-शिति प्रत्यये
लुक् स्यात् ।
जङ्गमिता ।
व्यञ्जनात् इत्येव ? लोलूयिता
अ-शिति इति किम् ? बेभिद्यते ॥८०॥

## क्यो वा । ४ । ३ । ८१ ।

धातोः व्यञ्जनात् परस्य

क्यः

अ-शिति प्रत्यये

लुग् वा स्यात् ।

समिधिष्यति–समिध्यष्यति ।

दृषदिष्यते–दृषद्यिष्यते ॥ ८१ ॥

अतः । ४ । ३ । ८२ ।

अदन्ताद् धातोः

विहिते

अ-शिति प्रत्यये

धातोः अतः

लुक् स्यात् ।

कथयति ।

विहितविशेषणं किम् ? गतः ॥८२॥

णेरनिटि । ४ । ३ । ८३ ।

अनिटि अ-शिति प्रत्यये

णेः लुक् स्यात् ।

अततक्षत्, चेतनः ।

अनिटि इति किम ? कारयिता ॥८३॥

## सेट्-क्तयोः । ४ । ३ । ८४ ।

सेटोः क्तयोः
णेः लुक् स्यात् ।
कारितः, गणितवान् ॥८४॥

## आम्-अन्ताऽऽल्वाऽऽय्येत्नौ अय् । ४ । ३ । ८५ ।

एषु परेषु
णेः अय् स्यात् ।
कारयाञ्चकार,
गण्डयन्तः,
स्पृहयालुः,
महयाय्यः,
स्तनयित्नुः ॥ ८५ ॥

## लघोर्यपि । ४ । ३ । ८६ ।

लघोः परस्य
णेः
यपि
अय् स्यात् ।

प्रशमय्य ।

लघोः इति किम् ? प्रतिपाद्य ॥८६॥

**वाऽऽप्नोः । ४ । ३ । ८७ ।**

आप्नोः परस्य

णेः

यपि

अप् वा स्यात् ।

प्रापय्य-प्राप्य ।

आप्नोः इति किम् ? अध्याप्य ॥८७॥

**मेङो वा मित् । ४ । ३ । ८८ ।**

मेङः

यपि

मित् वा स्यात् ।

अपमित्य, अपमाय ॥ ८८ ॥

**क्षेः क्षीः । ४ । ३ । ८९ ।**

क्षेः यपि

क्षीः स्यात् ।

प्रक्षीय ॥ ८९ ॥

## क्षय्य-जय्यौ शक्तौ । ४ । ३ । ९० ।

क्षि-ज्योः
अन्तस्य
शक्तौ गम्यायां
ये प्रत्यये
अय् निपात्यते ।
क्षय्यो व्याधिः,
जय्यः शत्रुः ।
शक्तौ इति किम् ?
क्षेयं पापम्, जेयं मनः ॥९०॥

## क्रय्यः क्रयार्थे । ४ । ३ । ९१ ।

क्रियः
अन्तस्य
ये प्रत्यये
अय् निपात्यते,
क्रयाय चेत् प्रसारितोऽर्थः ।
क्रय्यो गौः ।
क्रयार्थे इति किम् ?

क्रेयं ते धान्यं
न-चाऽस्ति प्रसारितम् ॥९१॥

**सस्तः सि । ४ । ३ । ९२ ।**

धातोः सन्तस्य
अ-शिति सादौ प्रत्यये विषयभूते
तः स्यात् ।

वत्स्यति ।
सः इति किम् ?
यक्षीष्ट ।

सि इति किम् ? वसिषीष्ट ॥९२॥

**दीय् दीङः क्ङिति स्वरे ।४।३।९३।**

दीङः
क्ङिति
अ-शिति स्वरे
दीय् स्यात् ।
उपदिदीयते ।
क्ङिति इति किम् ? उपदानम् ।
स्वर इति किम् ? उपदेदीयते ॥९३॥

## इट्-एत्-पुसि चाऽऽतो लुक् ।४।३।९४।

क्ङिति अ-शिति स्वरे
इटि
एति
पुसि च परे
आदन्तस्य धातोः
लुक् स्यात् ।
पपुः,
अदधत्,
पपिथ,
व्यतिरे,
अदुः ॥ ९४ ॥

## संयोगाऽऽदेर्वाऽऽशिष्येः ।४।३।९५।

धातोः संयोगादेः
आदन्तस्य
क्ङिति आशिषि
एः वा स्यात् ।
ग्लेयात्-ग्लायात् ।

संयोगादेः इति किम् ?
यायात् ।
ङ्किति इत्येव ? ग्लासीष्ट ॥९५॥

## गा-पा-स्था-सा-दा-मा-हाकः ।४।३।९६।

एषां
ङ्किति आशिषि
एः स्यात् ।
गेयात्, पेयात्,
स्थेयात्, अवसेयात्,
देयात्, धेयात्,
मेयात्, हेयात्, ॥ ९६ ॥

## ईर्व्यञ्जनेऽयपि । ४ । ३ । ९७ ।

गादेः
प्वर्जे ङ्किति
अ-शिति व्यञ्जनादौ-
ईः स्यात् ।
गीयते, जेगीयते,
पीयते, स्थीयते,

अवसीयते, दीयते,
धीयते, मीयते,
हीनः ।
व्यञ्जन इति किम् ? तस्थुः ।
अ-यपि इति किम् ? प्रगाय ॥ १७ ॥

**घ्रा-ध्मोर्यङि । ४ । ३ । ९८ ।**

घ्रा-ध्मोः
यङि
ईः स्यात् ।
जेघ्रीयते, देध्मीयते ॥९८॥

**हनो घ्नीर्वधे । ४ । ३ । ९९ ।**

हन्तेः
वधार्थस्य
यङि
घ्नीः स्यात् ।
जेघ्नीयते ।
वध इति किम् ?
गतौ–
जङ्घन्यते ॥ ९९ ॥

ञ्णिति घात् । ४ । ३ । १०० ।

ञिति णिति च परे

हन्तेः

घात् स्यात् ।

घातः, घातयति ॥ १०० ॥

ञि-णवि घन् । ४ । ३ । १०१ ।

ञौ णवि च परे

हन्तेः

घन् स्यात् ।

अघानि जघान ॥१०१॥

नशेर्नेश् वाऽङि । ४ । ३ । १०२ ।

नशेः

अङि

नेश्

वा स्यात् ।

अनेशत्-अनशत् ॥१०२॥

श्वयति-असू-वच-पतः श्वाऽऽस्थ-वोच-

पप्तम् । ४ । ३ । १०३ ।

एषां
अ—अङि
यथासङ्ख्यं
श्वादयः स्युः ।
अश्वत्,
आस्थत्,
अवोचत्,
अपप्तत् ॥ १०३ ॥

## शीङः एः शिति । ४ । ३ । १०४ ।

शीङः
शिति
एः स्यात् ।
शेते ॥ १०४ ॥

## क्ङिति यि शय् । ४ । ३ । १०५ ।

शीङः
क्ङिति यादौ
शय् स्यात् ।
शय्यते, शाशय्यते ।
क्ङिति इति किम् ? शेयम् ॥१०५॥

**उपसर्गाद् ऊहो ह्रस्वः । ४ । ३ । १०६ ।**

उपसर्गात् परस्य
ऊहतेः अतः
क्ङिति यादौ परे
ह्रस्वः स्यात् ।
समुह्यते ।
उपसर्गात् इति किम् ? ऊह्यते ।
यि इत्येव ? समूहितम् ।
ऊ ऊह इति प्रश्लेषः किम् ?
आ उह्यते=
ओह्यते, समोह्यते ॥ १०६ ॥

**आशिषीणः । ५ । ४ । १०७ ।**

उपसर्गात् परस्य इणः ईतः
क्ङिति यादौ आशिषि
ह्रस्वः स्यात् ।
उदियात् ।
ई इण इति प्रश्लेषः किम् ?
आ ईयात=
एयात्, समेयात् ॥१०७॥

दीर्घश्च्वि-यङ्-यक्-क्येषु च ।४।३।१०८।

एषु

यादौ आशिषि च

दीर्घः स्यात् ।

शुचीकरोति, तोष्टूयते,

मन्तूयति, दधीयति,

भृशायते, लोहितायते,

स्तूयते, ईयात् ॥ १०८ ॥

ऋतो रीः । ४ । ३ । १०९ ।

च्व्यादौ

ऋदन्तस्य

ऋतः स्थाने

रीः स्यात् ।

पित्रीस्यात, चेक्रीयते,

मात्रीयते पित्रीयते ।

ऋत इति किम् ? चेकीर्यते ॥१०९॥

रिः श-क्या५ऽशीर्ये । ४ । ४ । ११० ।

ऋदन्तस्य धातोः

ऋतः

शे क्ये आशीर्ये च परे

रिः स्यात् ।

व्याप्रियते, क्रियते, ह्रियात् ॥११०॥

## ईः च्वौ अवर्णस्याऽनव्ययस्य ।४।३।१११।

अनव्ययस्य

अवर्णान्तस्य

च्वौ ईः स्यात् ।

शुक्लीस्यात् , मालीस्यात् ।

अनव्ययस्य इति किम् ?

दिवाभूता रात्रिः ॥ १११ ॥

## क्यनि । ४ । ३ । ११२ ।

अवर्णान्तस्य

क्यनि

ईः स्यात् ।

पुत्रीयति । मालीयति ॥११२॥

क्षुत्-तृड्-गर्द्धेऽशनायोदन्य-धनायम्
। ४ । ४ । ११३ ।

एषु अर्थेषु
यथासंख्यं
अशनादयः क्यन्नताः
निपात्यन्ते ।

अशनायति
उदन्यति,
धनायति ।

क्षुदादौ इति किम् ?
अशनीयति, उदकीयति,
धनीयति दातुम् ॥११३॥

वृषाऽश्वाद् मैथुने स्सोऽन्तः ।४।३।११४।

आभ्यां मैथुनार्थाभ्यां
क्यनि
स्सोऽन्तः स्यात् ।

वृषस्यति गौः,
अश्वस्यति वडवा ।

मैथुने इति किम् ?

वृषीयति-अश्वायति ब्राह्मणी ॥११४॥

अस् च लौल्ये । ४ । ३ । ११५ ।

भोगेच्छातिरेको=लौल्यं ।

तत्र गम्ये

क्यनि परे

नाम्नः स्सः

अस् चाऽन्तः स्यात्

दधिस्यति–दध्यस्यति ।

लौल्य इति किम् ?

क्षीरीयति दातुम् ॥ ११५ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ
चतुर्थस्याध्यायस्य
तृतीयः पादः समाप्तः

॥ श्री वर्धमानस्वामिने नमः ॥

चतुर्थाध्यायस्य

# चतुर्थः पादः

## अस्ति-ब्रुवो भू-वचावशिति । ४ । ४ । १ ।

अस्ति-ब्रुवोः
यथासंख्यं
भू-वचौ स्यातां,
अ-शिति विषये ।
भव्यम्, अवोचत् ।
अ-शिति इति किम् ?
स्यात्, ब्रूते ॥ १ ॥

## अ-घञ्-क्यप्-अलच्यजेर्वी । ४ । ४ । २ ।

अ-घञादौ
अ-शिति विषये
अजेः वी स्यात् ।
प्रवेयम् ।
अघञ् क्यप्-अलचि इति किम् ?
समाजः, समज्या,
उदजः, अजः पशुः ॥ २ ॥

## तृ-अने वा । ४ । ४ । ३ ।

तृ-अनयोः विषयभूतयोः
अजेः वी वा स्यात् ।
प्रवेता-प्राजिता,
प्रवयणः-प्राजनो दण्डः ॥ ३ ॥

## चक्षो वाचि क्शांग्-ख्यांग् ।४।४।४।

चक्षो वागर्थस्य
अ-शिति विषये
क्शांग्-ख्यांगौ स्याताम् ।
आक्शास्यति, आक्शास्यते ।
आख्यास्यति, आख्यास्यते ।

आक्शेयम् , आख्येयम् ।

वाचि इति किम् ?

बोधे विचक्षणः ॥ ४ ॥

**नवा परोक्षायाम् । ४ । ४ । ५ ।**

चक्षः

वाचि

क्शांग्-ख्यांगौ

परोक्षायां

वा स्याताम् ।

आचक्शौ-आचख्यौ-आचचक्षे ॥५॥

**भृज्जो भर्ज् । ४ । ४ । ६ ।**

भृज्जतेः

अ-शिति

भर्ज् वा स्यात्

भर्ष्टा-भ्रष्टा ॥ ६ ॥

**प्राद् दागः त्तः आरम्भे क्ते ।४।४।७।**

आरम्भार्थस्य प्र-पूर्वस्य
दागः
क्ते परे
त्तो वा स्यात् ।
प्रत्तः प्रदत्तः ।
प्रात् इति किम् ? परीत्तम् ॥ ७ ॥

नि-वि-सु-अनु-अवात् । ४ । ४ । ८ ।

एभ्यः परस्य
दागः
क्ते
त्तो वा स्यात् ।
नीत्तम्-निदत्तम् ।
वीत्तम्-विदत्तम् ।
सूत्तम्-सुदत्तम् ।
अनूत्तम्-अनुदत्तम् ।
अवत्तम् अवदत्तम् ॥ ८ ॥

स्वरादुपसर्गाद् दः ति कित्यधः ।४।४।९।

स्वरान्तात् उपसर्गात् परस्य
धावर्जस्य दासंज्ञस्य
तादौ किति
त्तः नित्यं स्यात् ।
प्रत्तः, परीत्त्रिमम् ।
उपसर्गात् इति किम् ? दधि दत्तम् ।
स्वरात् इति किम् ? निर्दत्तम् ।
दः इति किम् ? प्रदाता व्रीहयः ।
ति इति किम् ? प्रदाय ।
अ-धः इति किम् ? निधीतः ॥९॥

**दत् । ४ । ४ । १० ।**

अ-धः दासंज्ञस्य
तादौ किति
दत् स्यात् ।
दत्तः, दत्तिः ।
अ-धः इत्येव ? धीतः ॥ १० ॥

**दो-सो-मा-स्थ इः । ४ । ४ । ११ ।**

एषां
तादौ किति
इः स्यात् ।
निर्दितः, सित्वा,
मितिः, स्थितवान् ॥ ११ ॥

**छा-शोर्वा । ४ । ४ । १२ ।**

छा-शोः
तादौ किति
इः वा स्यात् ।
अवच्छितः—अवच्छातः ।
निशितः-निशातः ॥ १२ ॥

**शो व्रते । ४ । ४ । १३ ।**

श्यतेः
व्रते=व्रतविषये प्रयोगे
नित्यं इः स्यात् ।
संशितं व्रतम्,
संशितः साधुः ॥ १३ ॥

**हाको हिः क्त्वि । ४ । ४ । १४ ।**

हाकः

तादौ किति=क्त्वायां

हिः स्यात् ।

हित्वा ।

क्त्व इति किम् ? हीनः

ति इत्येव ? प्रहाय ॥ १४ ॥

धागः । ४ । ४ । १५ ।

धागः

तादौ किति

हिः स्यात् ।

विहितः, हित्वा ॥ १५ ॥

यपि चाऽदो जग्ध् । ४ । ४ । १६ ।

तादौ किति

यपि च

अदेः

जग्ध् स्यात् ।

जग्धिः, प्रजग्ध्य ॥ १६ ॥

घस्लृ सन-द्यतनी-घञ-चलि ।४।४।१७।

एषु

अदेः

घस्लृः स्यात् ।

जिघत्सति, अघसत् , घासः,

प्रात्ति इति=प्रघसः, प्रादनं प्रघसः ॥१७॥

**परोक्षायां नवा । ४ । ४ । १८ ।**

अदेः

परोक्षायां

घस्लृः आदेशो वा स्यात् ।

जक्षुः आदुः ॥ १८ ॥

**वेर्वय् । ४ । ४ । १९ ।**

वेगः

परोक्षायां

वय् वा स्यात् ।

ऊयुः-ववुः ॥१९॥

**ऋः शॄ-दॄ-प्रः । ४ । ४ । २० ।**

एषां

परोक्षायां

ऋः वा स्यात् ।

विशश्रतुः—विशशरतुः ।

विदद्रतुः—विददरतुः ।

निपप्रतुः—निपपरतुः ॥ २० ॥

## हनो वध आशिषि अ-ञौ ।४।४।२१।

आशीर्विषये

हन्तेः वधः स्यात्,

न तु ञिटि,

वध्यात् ।

अ-ञौ इति किम् ? घानिषीष्ट ॥२१॥

## अद्यतन्यां वा त्वात्मने ।४।४।२२।

अद्यतन्यां विषये

हनः वधः स्यात्,

आत्मनेपदे तु वा ।

अवधीत्, अवधिष्ट—आहत ॥ २२ ॥

## इण्-इकोर्गा ।४।४।२३।

इण्—इकोः

अद्यतन्यां

गाः स्यात् ।

अगात्, अध्यगात ॥ २३ ॥

**णौ अज्ञाने गमुः । ४ । ४ । २३ ।**

इण्-इकोः

अज्ञानार्थयोः

णौ

गमुः स्यात् ।

गमयति, अधिगमयति ।

अ-ज्ञान इति किम् ?

अर्थान् प्रत्याययति ॥ २४ ॥

**सनि इङश्च । ४ । ४ । २५ ।**

इङः

इण्-इको-श्च

अ-ज्ञानार्थयोः

सनि

गमुः स्यात् ।

अधिजिगांसते,

जिगमिषति ग्रामम्,

मातुः अधिजिगमिषति ।।२५॥

गाः परोक्षायाम् । ४ । ४ । २६ ।

इङः
परोक्षाविषये
गाः स्यात् ।
अधिजगे ॥ २६ ॥

णौ सन्-ङे वा । ४ । ४ । २७ ।

सन्-ङे परे णौ
इङ्ः
गा वा स्यात् ।
अधिजिगापयिषति-अध्यापिपयिषति ।
अध्यजीगपत्-अध्यापिपत् ।
णौ इति किम् ? अधिजिगांसते ।
सन्-ङ इति किम् ?
अध्यापयति ॥ २७ ॥

वाऽद्यतनी-क्रियातिपत्त्योर्गीङ् ।४।४।२८।

अनयो इङः
गीङ् वा स्यात् ।
अध्यगीष्ट,-अध्यैष्ट ।
अध्यगीष्यत,-अध्यैष्यत ॥ २८ ॥

**अड् धातोरादिर्ह्यस्तन्यां चाऽमाङा ॥ ४ । ४ । २९ ।**

ह्यस्तन्यां
अद्यतनी–क्रियातिपत्त्योश्च विषये
धातोः आदिः
अट् स्यात्,
न तु माङ्योगे ।
अयात्, अयासीत्, अयास्यत ।
अ–माङ इति किम् ? मा स्म कार्षीत् ।
धातोः इति किम् ? प्रायाः ॥ २९ ॥

**एत्यस्तेर्वृद्धिः । ४ । ४ । ३० ।**

इण्–इकोः
अस्तेः च
आदेः स्वरस्य
ह्यस्तन्यां विषये
वृद्धिः स्यात्,
न तु माङा ।
आयन्, अध्यायन्, आस्ताम् ।
अमाङ इत्येव ? मा स्म ते यन् ॥३०॥

## स्वरादेस्तासु । ४ । ४ । ३१ ।

स्वरादेः धातोः

आदेः अद्यतन्यां

क्रियातिपत्ति-ह्यस्तनीषु विषये

वृद्धिः स्यात् ,

अ-माङा ।

आटीत् ,

ऐषिष्यत् ,

औज्झत् ।

अ-माङ इत्येव ? मा सोऽटीत् ॥३१॥

## स्ताद्यशितोऽत्रोणादेरिट् ।४।४३२।

धातोः परस्य

सादेः तादेश्च

अ-शितः

आदिः इट् स्यात् ,

न तु त्रोणाद्योः ।

लविष्यति, लविता ।

स्तादि इति किम् ? भूयात् ।
अ-शितः इति किम् ? आस्से ।
अ ओणादेः इति किम् ?
शस्त्रम्, वत्सः, हस्तः ॥ ३२ ॥

**तेर्ग्रहादिभ्यः । ४ । ४ । ३३ ।**

एभ्य एव परस्य
स्ताद्य-शितः
तेः आदिः
इट् स्यात् ।
निग्रहीतिः, अपस्निहितिः ।
ग्रहादिभ्य इति किम् ? शान्तिः ॥३३॥

**गृह्णोऽपरोक्षायां दीर्घः । ४ । ४ । ३४ ।**

ग्रहेः यः विहितः इट्
तस्य दीर्घः स्यात्,
न तु परोक्षायाम् ।
ग्रहीता ।
अ-परोक्षायाम् इति किम् ?
जगृहिव ॥ ३४ ॥

वॄतो नवाऽनाशीः-सिच्-परस्मै च । ४ । ४ । ३५ ।

वृभ्यां ऋदन्तेभ्यश्च परस्य इटः दीर्घः वा स्यात्, न तु परोक्षाऽऽशिषोः, सिचि च परस्मैपदे । प्रावरीता–प्रावरिता । वरीता–वरिता । तितरीषति–तितरिषति । परोक्षाऽऽदिवर्जनं किम् ? ववरिथ, तेरिथ, प्रावरिषीष्ट, आस्तरिषीष्ट, प्रावारिषुः, आस्तारिषुः ॥ ३५ ॥

इट् सिजा-शिषोरात्मने । ४ । ४ । ३६ ।

वॄतः परयोः आत्मनेपदविषये

सिजा-शिषोः
आदिः
इट् वा स्यात् ।
प्रावृत-प्रावरिष्ट ।
अवृत-अवरीष्ट ।
आस्तीर्ष्ट-आस्तरिष्ट ।
प्रावृषीष्ट-प्रावरिषीष्ट ।
वृषीष्ट-वरिषीष्ट ।
आस्तीर्षीष्ट-आस्तरिषीष्ट ।
आत्मने इति किम् ? प्रावारीत् ॥३६॥

**संयोगाद् ॠतः । ४ । ४ । ३७ ।**

धातोः
संयोगात् परः यः ॠत्
तदन्तात् परयोः
आत्मनेपदविषय-सिजा-शिषोः
आदिः इट् वा स्यात् ।
अस्मरिषाताम्-अस्मृषाताम् ।
स्मरिषीष्ट-स्मृषीष्ट ।
संयोगात् इति किम् ? अकृत ॥३७॥

**धूगौदितः । ४ । ४ । ३८ ।**

धूगः औदितश्च परस्य
स्ताद्यशितः
आदिः इट् वा स्यात् ।
धोता-धविता ।
रद्धा-रधिता ॥ ३८ ॥

**निष्कुषः । ४ । ४ । ३९ ।**

निष्पूर्वात् कुषः परस्य
स्ताद्यशितः
आदिः इट् वा स्यात् ।
निष्कोष्टा-निष्कोषिता ॥ ३९ ॥

**क्तयोः । ४ । ४ । ४० ।**

निष्कुषः परयोः
क्तयोः
आदिः इट्
नित्यं स्यात् ।
निष्कुषितः, निष्कुषितवान् ॥ ४० ॥

**जॄ–व्रश्चः क्त्वः । ४ । ४ । ४१ ।**

आभ्यां परस्य

क्त्वः

आदिः इट् स्यात् ।

जरीत्वा, व्रश्चित्वा ॥ ४१ ॥

**ऊदितो वा । ४ । ४ । ४२ ।**

ऊदितः परस्य

क्त्वः

आदिः इट् वा स्यात् ।

दान्त्वा–दमित्वा ॥ ४२ ॥

**क्षुध–वसस्तेषाम् । ४ । ४ । ४३ ।**

आभ्यां परेषां

क्त–क्तवतु–क्त्वां

आदिः इट् स्यात् ।

क्षुधितः, क्षुधितवान् , क्षुधित्वा,

उषितः, उषितवान् , उषित्वा ॥४३॥

## लुभ्यञ्चेर्विमोहा-ऽर्चे ।४।४।४४।

आभ्यां
यथासंख्यं
विमोहन-पूजार्थाभ्यां परेषां
क्त-क्तवतु-क्त्वां
आदिः इट् स्यात् ।
विलुभितः, विलुभितवान्, लुभित्वा,
अञ्चितः, अञ्चितवान्, अञ्चित्वा ।
विमोहा-ऽर्चे इति किम् ?
लुब्धो जाल्मः, उदक्तं जलम् ॥४४॥

## पूङ्-क्लिशिभ्यो नवा ।४।४।४५।

पूङः क्लिशिभ्यां च परेषां
क्त-क्तवतु-क्त्वां
आदिः इट् वा स्यात् ।
पूतः-पवितः,
पूत्वा-पवित्वा,
पूतवान्-पवितवान्,

क्लिष्टः-क्लिशितः,

क्लिष्टवान्-क्लिशितवान्,

क्लिष्ट्वा-क्लिशित्वा ॥४५॥

## सह-लुभे-च्छ-रुष-रिषस्तादेः ।४।४।४६।

एभ्यः परस्य

स्ताद्यशितः

तादेः इट् वा स्यात् ।

सोढा-सहिता ।

लोब्धा-लोभिता ।

एष्टा-एषिता ।

रोष्टा-रोषिता ।

रेष्टुम्-रेषितुम् ॥ ४६ ॥

## इवृ-ऋध-भ्रस्ज-दम्भ-श्रि-यु-ऊर्णु-भर-ज्ञपि-सनि-तनि-पति-वृ-ऋद्-दरिद्रः सनः ।४।४।४७।

इवन्ताद्

ऋधादिभ्यः

ऋदन्तेभ्यः

दरिद्रश्च परस्य
सनः आदिः
इट् वा स्यात् ।

दुद्यूषति-दिदेविषति ।
ईर्त्सति-अर्दिधिषति ।
बिभर्क्षति-बिभर्जिषति ।
धिप्सति, धीप्सति-दिदम्भिषति ।
शिश्रीषति-शिश्रयिषति
युयूषति-यियविषति ।
प्रोर्णुनूषति-प्रोर्णुनविषति ।
बुभूर्षति-बिभरिषति ।
ज्ञीप्सति-जिज्ञपयिषति ।
सिषासति-सिसनिषति ।
तितंसति-तितनिषति ।
पित्सति-पिपतिषति ।
प्रावुवूर्षति-प्रविवरिषति ।
वुवूर्षते-विवरीषते ।
तितीर्षति-तितरीषति ।
दिदरिद्रासति-दिदरिद्रिषति ॥४७॥

ऋ-स्मि-पूङ-अञ्ज-शो-कृ-गृ-दृ-धृ-प्रच्छः

। ४ । ४ । ४८ ।

एभ्यः परस्य
सनः
आदिः इट् स्यात् ।

अरिरिषति, सिस्मयिषति,
पिपविषते, अञ्जिजिषति,
अशिशिषते, चिकरीषति,
जिगरीषति, आदिदरिषते
आदिधरिषते, पिपृच्छिषति ॥४८॥

हनृतः स्यस्य । ४ । ४ । ४९ ।

हन्तेः
ऋदन्ताच्च परस्य
स्यस्य
आदिः इट् स्यात् ।
हनिष्यति, करिष्यति ॥ ४९ ॥

## कृत-चृत-नृत-च्छृद-तृदोऽसिचः सादेर्वा ।४।४।५०।

एभ्यः परस्य
अ-सिचः
सादेः
स्ताद्यशितः
आदिः इट्
वा स्यात् ।
कर्त्स्यति-कर्तिष्यति ।
चिचृत्सति-चिचर्त्तिषति ।
नर्त्स्यति-नर्त्तिष्यति ।
अच्छर्त्स्यत्-अच्छर्दिष्यत् ।
तितृत्सति-तितर्दिषति ।
अ-सिचः इति किम् ?
अकर्त्तीत् ॥ ५० ॥

## गमोऽनात्मने ।४।४।५१।

गमः परस्य
स्ताद्यशितः

सादेः इट् स्यात्,

न तु आत्मनेपदे ।

गमिष्यति ।

अधिजिगमिषिता शास्त्रस्य ।

अनात्मने इति किम् ? संगंसीष्ट ॥ ५१ ॥

**स्नोः । ४ । ४ । ५२ ।**

स्नोः परस्य

स्ताद्यशितः

अनात्मनेपदे

आदिः इट् स्यात् ।

प्रस्नविष्यति ।

अनात्मन इत्येव ? प्रास्नोष्ट ॥५२॥

**क्रमः । ४ । ४ । ५३ ।**

क्रमः परस्य

स्ताद्यशितः

आदिः इट् स्यात्,

अनात्मनेपदे ।

क्रमिष्यति, प्रक्रमितुम् ।

अनात्मन इत्येव ? प्रक्रंस्यते ॥५३॥

तुः । ४ । ४ । ५४ ।

अनात्मनेपद्विषयात्
क्रमः परस्य
तुः
स्ताद्यशितः
आदिः इट् स्यात् ।
क्रमिता ।
अनात्मन इत्येव ? प्रक्रन्ता ॥५४॥

न वृद्भ्यः । ४ । ४ । ५५ ।

वृदादिपञ्चकात् परस्य
स्ताद्यशितः
आदिः इट्
न स्यात्,
न चेत् असौ आत्मनेपदनिमित्तम् ।
वर्त्स्यति–विवृत्सति,
स्यन्त्स्यति–सिस्यन्त्सति ॥५५॥

एकस्वरादनुस्वारेतः । ४ । ४ । ५६ ।

एकस्वरात् अनुस्वारेतः

धातोः विहितस्य

स्ताद्यशितः

आदिः इट् न स्यात् ।

पाता ।

एकस्वरात् इति किम् ? अवधीत् ॥५६॥

## ऋवर्ण-श्रि-ऊर्णुगः कितः

। ४ । ४ । ५७ ।

ऋवर्णान्ताद् धातोः

श्रेः ऊर्णोश्च

एकस्वराद् विहितस्य

कितः

आदिः इट् न स्यात् ।

वृतः, तीर्त्वा, श्रितः, ऊर्णोत्वा ।

एकस्वरात् इत्येव ? जागरितः ।

कितः इति किम् ? वरिता ॥५७॥

**उवर्णात् । ४ । ४ ५८ ।**

उवर्णान्तात्

एकस्वराद् विहितस्य

क्तिः

आदिः इट् न स्यात् ।

युतः, लूनः ।

क्तिः इत्येव ? यविता लविता ॥५८॥

**ग्रह-गुहश्च सनः । ४ । ४ । ५९ ।**

आभ्यां उवर्णान्ताच्च

विहितस्य सनः

आदिः इट् न स्यात् ।

जिघृक्षति, जुघुक्षति, रुरूषति ॥५९॥

**स्वार्थे । ४ । ४ । ६० ।**

स्वार्थस्य सनः

आदिः इट् न स्यात् ।

जुगुप्सते ॥ ३० ॥

**डीय-श्व्यैदितः क्तयोः । ४ । ४ ६१ ।**

डीयतेः
श्वेः
ऐदिद्भ्यश्च धातुभ्यः
परयोः क्त-क्तवत्वोः
आदिः इट् न स्यात् ।
डीनः, डीनवान्,
शूनः शूनवान्,
त्रस्तः, त्रस्तवान् ॥ ६१ ॥

**वेटोऽपतः । ४ । ४ । ६२ ।**

अ-पतः
विकल्पितेटः
धातोः
एकस्वरात् परयोः
क्तयोः
आदिं इट् न स्यात् ।
रुद्धः, रुद्धवान् ।
अ-पत इति किम् ? पतितः ॥६२॥

**सं-नि-वेरर्देः । ४ । ४ । ६३ ।**

एभ्यः परात्
अर्देः परयोः
क्तयोः
आदिः इट् न स्यात् ।
समर्ण्णः, समर्ण्णवान्,
न्यर्ण्णः, न्यर्ण्णवान्,
व्यर्ण्णः, व्यर्ण्णवान् ।
सं-नि-वेः इति किम्? अर्दितः ॥६३॥

**अ-विदूरेऽभेः । ४ । ४ । ६४ ।**

अभेः परात्
अर्देः परयोः
क्तयोः
अ-विदूरेऽर्थे
आदिः इट् न स्यात् ।
अभ्यर्ण्णः, अभ्यर्ण्णवान् ।
अ-विदूर इति किम्?
अभ्यर्दितो दीनः शीतेन ॥ ६४ ॥

**वृतेर्वृत्तं ग्रन्थे । ४ । ४ । ६५ ।**

वृतेः ण्यन्तात्

वते

वृत्तं

ग्रन्थविषये

निपात्यते ।

वृत्तो गुणः छात्रेण ।

ग्रन्थ इति किम् ?

वर्त्तितं कुङ्कुमम् ॥६५॥

**धृष-शसः प्रगल्भे । ४ । ४ । ६६ ।**

आभ्यां परयोः

क्तयोः आदिः

प्रगल्भ एवार्थे

इट् न स्यात् ।

धृष्टः, विशस्तः ।

प्रगल्भ इति किम् ?

धर्षितः, विशसितः ॥ ६६ ॥

**कषः कृच्छ्र-गहने । ४ । ४ । ६७ ।**

अनयोः अर्थयोः

कषेः परयोः

क्तयोः

आदिः इट् न स्यात् ।

कष्टं दुःखम्,

कष्टोऽग्निः,

कष्टं वनं दुरवगाहम् ।

कृच्छ्र-गहन इति किम् ?

कषितं स्वर्णम् ॥ ६७ ॥

घुषेरविशब्दे । ४ । ४ । ६८ ।

अ-विशब्दार्थाद्

घुषेः परयोः

क्तयोः

आदिः इट् न स्यात् ।

घुष्टा रज्जुः,

घुष्टवान् ।

अ-विशब्द इति किम् ?

अवघुषितं वाक्यम् ॥ ६८ ॥

बलि-स्थूले दृढः । ४ । ४ । ६९ ।

बलिनि स्थूले चार्थे
दृहेः दृंहेः वा क्तान्तस्य
दृढः निपात्यते ।
दृढः ।
बलि-स्थूल इति किम् ?
दृहितम्, दृंहितम् ॥ ६९ ॥

क्षुब्ध-विरिब्ध-स्वान्त-ध्वान्त-लग्न-म्लिष्ट-फाण्ट-बाढ-परिवृढं मन्थ-स्वर-मनस्-तमस्-सक्ताऽस्पष्टाऽ-नायास-भृश-प्रभौ । ४ । ४ । ७० ।

एते क्तान्ताः
मन्थादिषु अर्थेषु
यथासङ्ख्यं अनिटः
निपात्यन्ते ।

क्षुब्धः समुद्रः,

क्षुब्धं वल्लवैः,

विरिब्धः स्वरः,

स्वान्तं=मनः,

ध्वान्तं=तमः,

लग्नं=सक्तम् ,

म्लिष्टं=अस्पष्टम्

फाण्टं=अनायाससाध्यम् ,

बाढं=भृशम् ,

परिवृढः=प्रभुः ॥ ७० ॥

आदितः । ४ । ४ । ७१ ।

आदितः धातोः परयोः

क्तयोः

आदिः इट् न स्यात् ।

मिन्नः मिन्नवान् ॥ ७१ ॥

**नवा भावाऽऽरम्भे । ४ । ४ । ७२ ।**

आदितः धातोः

भावा-ऽऽरम्भार्थयोः

क्तयोः

आदिः इट्

वा न स्यात् ।

भिन्नम्—मेदितम् ।

प्रभिन्नः—प्रभिन्नवान् ।

प्रमेदितः, प्रमेदितवान् ॥ ७२ ॥

**शकः कर्म्मणि । ४ । ४ । ७३ ।**

शकेः

कर्म्मणि

क्तयोः

आदिः इट्

वा न स्यात् ।

शक्तः—शकितो वा घटः कर्तुम् ॥ ७३ ॥

**णौ दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्न-ज्ञप्तम् । ४ । ४ । ७४ ।**

दमादीनां

णौ क्तान्तानां

एते

वा निपात्यन्ते ।

दान्तः—दमितः ।

शान्तः—शमितः ।

पूर्णः—पूरितः ।

दस्तः—दासितः ।

*स्पष्टः—स्पाशितः*

छन्नः—छादितः ।

ज्ञप्तः—ज्ञापितः ॥ ७४ ॥

**श्वस-जप-वम-रुष-त्वर-संघुषाऽऽस्वनाऽमः**

। ४ । ४ । ७५ ।

एभ्यः क्तयोः

आदिः इट्

वा न स्यात् ।

श्वस्तः-श्वसितः ।

विश्वस्तवान्—विश्वसितवान् ।

जप्तः—जपितः ।

जप्तवान्—जपितवान् ।

वान्तः—वमितः ।

वान्तवान्—वमितवान् ।

रुष्टः—रुषितः ।

रुष्टवान्—रुषितवान् ।

तूर्णः—त्वरितः ।

तूर्णवान्—त्वरितवान् ।

संघुष्टौ—संघुषितौ दम्यौ ।

संघुष्टवान्—संघुषितवान् ।

आस्वान्तः—आस्वनितः ।

आस्वान्तवान्—आस्वनितवान् ।

अभ्यान्तः—अभ्यमितः

अभ्यान्तवान् अभ्यमितवान् ॥ ७५ ॥

## हृषेः केश-लोम-विस्मय-प्रतिघाते

। ४ । ४ । ७६ ।

हृषेः

केशाद्यर्थेषु

क्तयोः

आदिः इट् वा न स्यात् ।

हृष्टाः-हृषिताः केशाः ।

हृष्टं -हृषितं लोमभिः ।

हृष्टो-हृषितश्चैत्रः ।

हृष्टाः-हृषिताः दन्ताः ॥ ७६ ॥

**अपचितः । ४ । ४ । ७७ ।**

अपात् चायः क्तान्तस्य

इडभावः चिश्च

वा निपात्यते ।

अपचितः-अपचायितः ॥७७॥

**सृजि-दृशि-स्कृ-स्वराऽत्वतः तृज्नित्याऽनिटस्थवः । ४ । ४ । ७८ ।**

सृजि-दृशिभ्यां

स्कृगः स्वरान्तात्

अत्वतश्च

तृचि

नित्याऽनिटः विहितस्य

थवः

आदिः

इट् वा न स्यात् ।

ससृष्ट-ससर्जिथ ।

दद्रष्ठ-ददर्शिथ ।

सञ्चस्कर्थ-सञ्चस्करिथ ।

ययाथ-ययिथ ।

पपक्थ-पेचिथ ।

तृज्-नित्यानिट इति किम् ?

ररन्धिथ, शिश्रयिथ ।

विहितविशेषणं किम् ? चकर्षिथ ॥७८॥

**ऋतः । ४ । ४ । ७९ ।**

ऋदन्तात्

तृज्-नित्यानिटः

विहितस्य थवः

आदिः इट् न स्यात् ।

जहर्थ ।

तृज्नित्यानिटः इत्येव ?

सस्वरिथ ॥ ७९ ॥

**ऋ-वृ-व्येऽद इट् । ४ । ४ । ८० ।**

एभ्यः परस्य थवः आदिः इट् स्यात् ।

आरिथ, ववरिथ संविव्ययिथ, आदिथ ॥ ८० ॥

**स्कृ-अस्रृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः । ४ । ४ । ८१ ।**

स्कृगः स्रादिवर्जेभ्यश्च सर्वधातुभ्यः परस्याः परोक्षायाः व्यञ्जनादेः इट् स्यात् ।

संचस्करिव, ददिव चिच्यिवहे ।

स्कृ-इति किम् ? चकृव ।

स्रादिवर्जनं किम् ?

सस्रुव, वव्रुव, वव्रुवहे,

बभर्थ, तुष्टोथ,

दुद्रोथ, शुश्रोथ, सुस्रोथ ॥८१॥

**घसेकस्वराऽऽतः क्वसोः । ४ । ४ । ८२ ।**

घसेः

एकस्वराद्

आदन्ताच्च

धातोः परस्य

क्वसोः

परोक्षायाः

आदिः इट् स्यात् ।

जक्षिवान्,

आदिवान्,

ययिवान् ।

परोक्षाया इत्येव ? विद्वान् ॥ ८२ ॥

**गम-हन-विद्ऌ-विश-दृशो वा । ४ । ४ । ८३ ।**

एभ्यः परस्य

क्वसोः

आदिः इट् वा स्यात् ।

जग्मिवान्-जगन्वान् ।

जघ्निवान्-जघन्वान् ।

विविदिवान्-विविद्वान् ।

ददृशिवान्-ददृश्वान् ॥ ८३ ॥

## सिचोऽञ्जेः । ४ । ४ । ८४ ।

अञ्जेः

सिचः

आदिः इट् स्यात् ।

आञ्जीत् ॥ ८४ ॥

## धूग्-सुस्तोः परस्मै । ४ । ४ । ८५ ।

एभ्यः

परस्मैपदे

सिचः

आदिः इट् स्यात् ।

अधावीत्, असावीत्, अस्तावीत् ।

परस्मै इति किम्? अधोष्ट ॥ ८५ ॥

## यमि-रमि-नम्यातः सोऽन्तश्च ।४ ४।८६।

एभ्यः
आदन्तेभ्यश्च
परस्मैपदे
सिचः
आदिः इट् स्यात् ।
एषां च स् अन्तः
अयंसीत्,
व्यरंसीत्,
अनंसीत्,
अयासिष्टाम् ॥ ८६ ॥

**ई-शीङः से-ध्व-स्व-ध्वमोः ।४।४।८७।**

आभ्यां
वर्त्तमाना-से-ध्वयोः,
पञ्चमी-स्व-ध्वमोश्च
आदिः इट स्यात् ।
ईषेशि. ईशिध्वे,
ईशिष्व, ईशिध्वम्,
ईडिषे, ईडिध्वे,
ईडिष्व, ईडिध्वम् ॥ ८७ ॥

## रुत्पञ्चकात् शिदयः । ४ । ४ । ८८ ।

रुदादेः पञ्चतः परस्य
व्यञ्जनादेः
शितः
अ-यादेः
आदिः इट् स्यात् ।
रोदिषि, स्वपिषि,
प्राणिति, श्वसिति,
जक्षिति ।
अ-यः इति किम् ? रुद्यात् ।
शितः इति किम् ?
रुत्स्यति, स्वप्स्यति ॥ ८८ ॥

## दि-स्योरीट् । ४ । ४ । ८९ ।

रुत्पञ्चकात्
दि-स्योः
शितोः
आदिः ईट् स्यात् ।
अरोदीत् , अरोदीः ॥ ८९ ॥

**अदश्चाऽट् । ४ । ४ । ९० ।**

अत्तेः

रुत्पञ्चकाच्च

दि-स्योः

शितः आदि इट् स्यात् ।

आदत्, आदः,

अरोदत्, अरोदः ॥ ९० ॥

**सं-परेः कृगः स्सट् । ४ । ४ । ९१ ।**

आभ्यां परस्य

कृगः

आदिः

स्सट् स्यात् ।

संस्करोति कन्याम्,

परिष्करोति ॥ ९१ ॥

**उपाद् भूषा-समवाय-प्रतियत्न-विकार-वाक्या-ऽध्याहारे । ४ । ४ । ९२ ।**

उपात् परस्य कृगः

भूषादिषु अर्थेषु

आदिः सट् स्यात् ।
कन्यां उपस्करोति,
तत्र न उपस्कृतम्,
एधो-दकमुपस्कुरुते,
उपस्कृतं भुङ्क्ते,
सोपस्कारं सूत्रम् ॥ १२ ॥

**किरो लवने । ४ । ४ । १३ ।**

उपात् किरतेः
सट् आदिः स्यात्,
लवनविषयार्थश्चेत् ।
उपस्कीर्य मद्रका लुनन्ति ।
लवन इति किम् ?
उपकिरति, पुष्पम् ॥ १३ ॥

**प्रतेश्च वधे । ४ । ४ । १४ ।**

प्रतेः उपाच्च किरतेः
हिंसायां विषयेऽर्थे
स्सट् आदिः स्यात् ।

प्रतिकीर्णम् , उपस्कीर्णम् ,

वा ह ते वृषल भूयात् ,

प्रतिचस्करे नखैः ।

वध इति किम् ?

प्रतिकीर्णं बीजम् ॥ ९४ ॥

## अपात्-चतुष्पात् पक्षि-शुनि हृष्टाऽन्नाऽऽश्रयाऽर्थे । ४ । ४ । ९५ ।

अपात् किरतेः

चतुष्पदि

पक्षिणि

शुनि च

कर्तरि

यथासङ्ख्यं

हृष्टे

अन्नार्थिनि

आश्रयार्थिनि

स्सट् आदिः स्यात् ।

अपस्किरते—

गौः हृष्टः,

कुक्कुटः भक्ष्यार्थी,
आश्रयार्थी वा श्वा ॥ ९५ ॥

**वौ विष्करो वा । ४ । ४ । ९६ ।**

पक्षिणि वाच्ये
वि-किरतेः
स्सट् वाऽऽदिः स्यात् ।
विष्किरः-विकिरो वा पक्षी ॥ ९६ ॥

**प्रात् तुम्पतेर्गवि । ४ । ४ । ९७ ।**

प्रात् तुम्पतेः
गवि कर्त्तरि
स्सट् आदिः स्यात् ।
प्रस्तुम्पति गौः ।
गवि इति किम् ?
प्रतुम्पति तरुः ॥ ९७ ॥

**उदितः स्वराद् नोऽन्तः । ४ । ४ । ९८ ।**

उदितः धातोः
स्वरात् परः

नू अन्तः स्यात् ।

नन्दति, कुण्डा ॥ ९८ ॥

**मुचादि-तृफ-दृफ-गुफ-शुभो-भः शे । ४ । ४ । ९९ ।**

एषां

शे परे

स्वराद्

नोऽन्तः स्यात् ।

मुञ्चति, पिंशति,

तृम्फति, दृम्फति,

गुम्फति,

शुम्भति उम्भति ॥ ९९ ॥

**जभः स्वरे । ४ । ४ । १०० ।**

जभेः

स्वरात् परः

स्वरादौ प्रत्यये

नोऽन्तः स्यात्

जम्भः ॥ १०० ॥

रध इटि तु परोक्षायामेव ।४।४।१०१।

रधः

स्वरात् परः

स्वरादौ प्रत्यये

नोऽन्तः स्यात् ,

इडादौ तु-

परोक्षायामेव ।

रन्धः, ररन्धिव ।

परोक्षायामेव इति किम्? रधिता ॥१०१॥

रभोऽपरोक्षा-शवि । ४ । ४ । १०२ ।

रभेः

स्वरात् परः

परोक्षा-शव्वर्जे

स्वरादौ प्रत्यये

न् अन्तः स्यात् ।

आरम्भः ।

अ-परोक्षा-शवि इति किम् ?

आरेभे, आरभते ॥ १०२ ॥

**लभः । ४ । ४ । १०३ ।**

लभः

स्वरात् परः

परोक्षा-शव्वर्जे

स्वरादौ प्रत्यये

न् अन्तः स्यात् । लम्भकः ॥१०३॥

**आङो यि । ४ । ४ । १०४ ।**

आङ परस्य

लभः

स्वरात् परः

यादौ प्रत्यये

न् अन्तः स्यात् ।

आलम्भ्या गौः ।

यि इति किम् ? आलभ्या ॥१०४॥

**उपात् स्तुतौ । ४ । ४ । १०५ ।**

उपात् परस्य

लभः

स्वरात् परः

यादौ प्रत्यये
स्तुतौ गम्यायां
न् अन्तः स्यात् ।

उपलम्भ्या विद्या ।
स्तुतौ इति किम् ?
उपलभ्या वार्त्ता ॥ १०५ ॥

**ञि-ख्णमोर्वा । ४ । ४ । १०६ ।**

ञौ ख्णमि च
लभः
स्वरात् परः

न् अन्तो वा स्यात् ।
अलाभि-अलम्भि
लम्भं-लम्भम्,
लाभ-लाभम् ॥ १०६ ॥

**उपसर्गात् खल्-घञोश्च ।४।४।१०७।**

उपसर्गात् लभः
स्वरात् परः

खल्-घञोः जि-ख्णमोश्च परयोः
न् अन्तः स्यात् ।
दुष्प्रलम्भम् , प्रलम्भः,
प्रालम्भि,
प्रलम्भं-प्रलम्भम् ।
उपसर्गात् इति किम् ? लाभः ॥१०७॥

**सु-दुर्भ्यः । ४ । ४ । १०८ ।**

आभ्यां समस्त-व्यस्ताभ्यां
उपसर्गात् पराभ्यां
परस्य
लभः
स्वरात् परः
खल्-घञोः
नोऽन्तः स्यात् ।
अतिसुलम्भम् , अतिदुर्लम्भम् ,
अतिसुलम्भः, अतिदुर्लम्भः,
अतिसुदुर्लम्भम् , अतिसुदुर्लम्भः ।
उपसर्गात् इत्येव ? सुलभम् ॥१०८॥

**नशो धुटि । ४ । ४ । १०९ ।**

नशेः

स्वरात् परः

धुडादौ प्रत्यये

न् अन्तः स्यात् । नंष्टा ।

धुटि इति किम् ? नशिता ॥१०९॥

**मस्जेः सः । ४ । ४ । ११० ।**

मस्जेः

स्वरात् परस्य सस्य

धुडादौ प्रत्यये

न् अन्तः स्यात् ।

मङ्क्ता ॥ ११० ॥

**अः सृजि-दृशोऽकिति । ४ । ४ । १११ ।**

अनयोः

स्वरात् परः

धुडादौ प्रत्यये

अत् अन्तः स्यात् ।

न तु किति ।

स्रष्टा, द्रष्टुम् ।

अ-क्ङिति इति किम् ? सृष्टः ॥ १११ ॥

**स्पृशादि-सृपो वा । ४ । ४ । ११२ ।**

स्पृश-मृश-कृष-तृप-दृपां
सृपश्च
स्वरात् परः
धुडादौ प्रत्यये
अत् अन्तो वा स्यात्,
अ-क्ङिति ।

स्प्रष्टा-स्पर्ष्टा ।
म्रष्टा-मर्ष्टा ।
क्रष्टा-कर्ष्टा ।
त्रप्ता-तर्प्ता ।
द्रप्ता-दर्प्ता ।
स्रप्ता-सर्प्ता ॥ ११२ ॥

**ह्रस्वस्य तः पित्कृति ।४।४।११३।**

ह्रस्वान्तस्य धातोः
पिति कृति
त् अन्तः स्यात् ।
जगत् ।
ह्रस्वस्य इति किम् ? ग्रामणीः ।
कृति इति किम् ? अजुहवुः ॥११३॥

**अतो म आने । ४ । ४ । ११४ ।**

धातोः विहिते आने
अतः
मोऽन्तः स्यात् ।
पचमानः ।
अतः इति किम् ? शयानः ॥११४॥

**आसीनः । ४ । ४ । ११५ ।**

आस्तेः परस्य
आनस्य
आदेः ईः निपात्यते ।
आसीनः, उदासीनः ॥११५॥

**ऋतां क्ङितीर् । ४ । ४ । ११६ ।**

ऋदन्तस्य धातोः
किङति प्रत्यये
ऋतः इर् स्यात् ।
तीर्णम् , किरति ॥ ११६ ॥

**ओष्ठयादुर् । ४ । ४ । ११७ ।**

धातोः ओष्ठ्यात् परस्य
ऋतः किङति
उर् स्यात् ।
पूः. बुभूर्षति, बुवूर्षते ॥ ११७ ॥

**इस् आसः शासोऽङ्-व्यञ्जने । ।४।११८।**

शास्तेः आसः
अङि
किङति व्यञ्जनादौ च परे
इस् स्यात् ।
अशिषत् , शिष्टः ।
अङ्-व्यञ्जन इति किम् ? शासति ॥११८॥

**क्वौ । ४ । ४ । ११९ ।**

शासः
आसः
क्वौ
इस् स्यात् । मित्रशीः ॥ ११९ ॥

आङः । ४ । ४ । १२० ।

आङः परस्य
शासः
आसः
क्वौ एव
इस् स्यात् । आशीः
क्वौ इत्येव ? आशास्ते ॥१२०॥

य्वोः प्व-य्-व्यञ्जने लुक् । ४ । ४ । १२१ ।

पौ
य्-वर्जव्यञ्जनादौ च परे
य्वोः
लुक् स्यात् ।
क्नोपयति,
क्ष्मातम् ,

देदिवः

कण्डूः ।

य्-जंनं किम्

क्नूयते ॥ १२१ ॥

कॄतः कीर्त्तिः । ४ । ४ । १२२ ।

कॄतणः

कीर्त्तिः स्यात् । कीर्त्तयति ॥१२२॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ
चतुर्थस्याध्यायस्य
चतुर्थः पादः समाप्तः

आख्यातवृत्तिः समाप्ता

॥ श्री वर्धमानस्वामिने नमः ॥

कृत्–प्रकरणम्

पञ्चमाध्यायस्य

# प्रथमः पादः

## आ तुमोऽत्यादिः कृत् । ५ । १ । १ ।

धातोः विधीयमानः

त्यादिवर्जः

वक्ष्यमाणः प्रत्ययः

तुम् अभिव्याप्य

कृत् स्यात् ।

घनघात्यः ।

अ-त्यादिः इति किम् ।

प्रणिस्ते ॥ १ ॥

## बहुलम् । ५ । १ । २ ।

कृत्-निर्दिष्टात् अर्थाद्
अन्यत्राऽपि
बहुलं स्यात् ।
पादहारकः,
मोहनीयं कर्म,
संप्रदानम् ॥ २ ॥

## कर्त्तरि । ५ । १ । ३ ।

कृदर्थविशेषोक्ति विना
कर्त्तरि स्यात् ।
कर्त्ता ॥ ३ ॥

## व्याप्ये घुर-केलिम-कृष्टपच्यम् । ५ । १ । ४ ।

घुर-केलिमौ प्रत्ययौ
कृष्टपच्यश्च
व्याप्ये कर्त्तरि स्युः ।
भङ्गुरं काष्ठम्,
पचेलिमा माषाः
कृष्टपच्याः शालयः ॥ ४ ॥

संगतेऽजर्यम् । ५ । १ । ५ ।

संगमनं=संगतम् ।

तस्मिन् कर्त्तरि

नञ्पूर्वात् जृषो

यः निपात्यते ।

अ-जर्यं=आर्य-संगतम् ।

संगत इति किम् ? अ-जरः पटः ॥५॥

रुच्याऽव्यथ्य-वास्तव्यम् । ५ । १ । ६ ।

एते

कर्त्तरि

निपात्यन्ते ।

रुच्यः,

अव्यथ्यः,

वास्तव्यः ॥ ६ ॥

भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं

नवा । ५ । १ । ७ ।

एते कर्त्तरि वा निपात्यन्ते । भव्यः, गेयः साम्नाम् जन्यः, रम्यः, आपात्यः, आप्लाव्यः । पक्षे-भव्यम्, गेयानि सामानि, जन्यम्, रम्यम्, आपात्यम्, आप्लाव्यम् ॥ ७ ॥

**प्रवचनीयाऽऽदयः । ५ । १ । ८ ।**

एते अनीय-प्रत्ययान्ताः कर्त्तरि वा निपात्यन्ते । प्रवचनीयो गुरुः शास्त्रस्य, प्रवचनीयं गुरुणा शास्त्रम्,

उपस्थानीयः शिष्यः गुरोः,
उपस्थानीयः शिष्येण गुरुः ॥८॥

**श्लिष-शीङ्-स्थाऽऽस-वस-जन-रुह-जॄ-भजेः क्तः । ५ । १ । ९ ।**

एभ्यः क्तः यः विहितः
सः
कर्त्तरि
वा स्यात् ।

आश्लिष्टः कान्तां चैत्रः–
–आश्लिष्टा कान्ता चैत्रेण ।

अतिशयितो गुरुं शिष्यः–
–अतिशयितो गुरुः शिष्यैः ।

उपस्थितो गुरुं शिष्यः–
–उपस्थितो गुरुः शिष्यैः

उपासिता गुरुं ते–
–उपासितो गुरुस्तैः ।

अनूषिता गुरुं ते,
–अनूषितो गुरुस्तैः ।

अनुजातास्तां ते-

-अनुजाता सा तैः ।

आरूढोऽश्वं सः-

-आरूढोऽश्वस्तैः ।

अनुजीर्णास्तां ते-

-अनुजीर्णा सा तैः ।

विभक्ता स्वं ते-

-विभक्तं स्वं तैः ॥ ९ ॥

**आरम्भे । ५ । १ । १० ।**

आरम्भार्थाद् धातोः

भूतादौ यः क्तः विहितः

सः

कर्त्तरि वा स्यात् ।

प्रकृताः कटं ते- प्रकृतः कटस्तैः ॥१०॥

**गत्यर्था-ऽकर्मक-पिब-भुजेः । ५ । १ । ११ ।**

भूतादौ

यः क्तः विहितः

सः

एभ्यः

कर्त्तरि वा स्यात् ।

गतोऽसौ ग्रामम्-गतोऽसौ तैः ।

आसितोऽसौ-आसितं तैः ।

पीताः पयः-पीतं पयः ।

भुक्तास्ते-इदं तैर्भुक्तम् ॥ ११ ॥

**अद्यर्थात् चाऽऽधारे । ५ । १ । १२ ।**

आहारार्थात् धातोः

गत्यर्थादेश्च यः क्तः

सः

आधारे

वा स्यात् ।

इदमेषां जग्धम्-तैर्जग्धम् ।

इदं तेषां यातम्- इदं तैर्यातम् ।

इदमेषां शयितम्-इदं तैः शयितम् ।

इदं गवां पीतम्-इदं गोभिः पीतम् ।

इदं तेषां भुक्तम्-इदं तैर्भुक्तम् ॥१२॥

**क्त्वा-तुम्-अम्-भावे । ५ । १ । १३ ।**

एते
धात्वर्थमात्रे
स्युः ।
कृत्वा--कर्त्तुम्--कारंकारं याति ॥ १३ ॥

**भीमादयोऽपादाने । ५ । १ । १४ ।**

एते
अपादाने
स्युः ।
भीमः, भयानकः ॥ १४ ॥

**संप्रदानात् चाऽन्यत्रोणादयः ।५।१।१५।**

संप्रदानात्
अपादानात् च
अन्यत्र अर्थे
उणादयः स्युः ।
कारुः, कषिः ॥ १५ ॥

**अ-सरूपोऽपवादे वोत्सर्गः प्राक् क्तेः । ५ । १ । १६ ।**

इतः सूत्रात् आरभ्य

"स्त्रियां क्तिः" (५-३-९१) इत्यतः प्राक्

यःअपवादः,

तद्विषये

अपवादेना-असमानरूपः

औत्सर्गिकः प्रत्ययः

वा स्यात्।

अवश्यलाव्यम्, अवश्यलवितव्यम्।

अ-सरूप इति किम्?

ध्यणि यो न स्यात्।

कार्यम्।

प्राक्क्तेः इति किम्?

कृतिः, चिकीर्षा ॥ १६ ॥

**ऋवर्ण-व्यञ्जनाद् ध्यण्। ५। १। १७।**

ऋवर्णान्ताद्

व्यञ्जनान्ताच्च धातोः

ध्यण् स्यात्।

कार्यम्, पाक्यम् ॥ १७ ॥

**पाणि-समवाभ्यां सृजः। ५। १। १८।**

आभ्यां परात्
सृजेः
घ्यण् स्यात् ।
पाणिसर्ग्या-समवसर्ग्या
रज्जुः ॥ १८ ॥

**उवर्णादावश्यके । ५ । १ । १९ ।**

अवश्यम्भावे द्योत्ये
धातोः
उवर्णान्ताद्
घ्यण् स्यात् ।
लाव्यम्, अवश्यपाव्यम् ॥ १९ ॥

**आसु-यु-वपि-रपि-लपि-त्रपि-डिपि-दभि-चम्या-नमः । ५ । १ । २० ।**

आङ्पूर्वाभ्यां सुग्-नम्भ्यां
यौत्यादेश्च
घ्यण् स्यात् ।
आसाव्यम्, याव्यम्
वाप्यम्, राप्यम्, लाप्यम्,

अपत्राप्यम्,
डेप्यम्, दाभ्यम्,
आचाम्यम्, आनाम्यम् ॥ २० ॥

**वाऽऽधारेऽमावस्या । ५ । १ । २१ ।**

अमापूर्वाद् वसतेः
आधारे
घ्यण्,
धातोर्वा ह्रस्वश्च निपात्यते ।
अमावस्या-अमावास्या ॥ २१ ॥

**संचाय्य-कुण्डपाय्य-राजसूयं क्रतौ । ५ । १ । २२ ।**

एते
क्रतौ अर्थे
घ्यणन्ता निपात्यन्ते ।
संचाय्यः-कुण्डपाय्यः-राजसूयः
क्रतुः ॥ २२ ॥

**प्रणाय्यो निष्कामाऽसंमते । ५ । १ । २३ ।**

प्राद् नियः

ध्य -आयादेशौ स्यातां,

निष्कामे असंमते चार्थे ।

प्रणाय्यः-शिष्यश्चौरो वा ॥२३॥

धाय्या-पाय्य-सान्नाय्य-निकाय्यम्

ऋक्-मान-हविष्-निवासे । ५ । १ । २४।

एते

ऋगादिषु

यथासङ्ख्यं

ध्यणन्ताः

निपात्यन्ते ।

धाय्या ऋक्,

पाय्यं मानम्,

सान्नाय्यं हविः,

निकाय्यो निवासः ॥ २४ ॥

परिचाय्यो-पचाय्या-ऽऽनाय्य-समूह्य-

चित्यं अग्नौ । ५ । १ । २५ ।

एते
अग्नौ
निपात्यन्ते ।
परिचाय्यः—उपचाय्यः
आनाय्यः—समूह्यः,
चित्यो वा
अग्निः ॥ २५ ॥

**याज्या दानर्चि । ५ । १ । २६ ।**

यजेः
करणदानर्चि
घ्यण् स्यात् ।
याज्या ॥ २६ ॥

**तव्याऽनीयौ । ५ । १ । २७ ।**

एतौ
धातोः
स्याताम् ।
कर्त्तव्यः, करणीयः ॥ २७ ॥

## य एत् चाऽऽतः । ५ । १ । २८ ।

स्वरान्ताद् धातोः
य: स्यात्,
आत एच्च ।
चेयम्, नेयम्,
देयम्, धेयम् ॥ २८ ॥

## शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात् । ५ । १ । २९ ।

एभ्यः
पवर्गान्ताच्च
यः स्यात् ।
शक्यम्, तक्यम्,
चत्यम् यत्यम्,
शस्यम्, सह्यम्,
यज्यम्, भज्यम्,
तप्यम्, गम्यम् ॥ २९ ॥

## यमि-मदि-गदोऽनुपसर्गात् । ५ । १ । ३० ।

एभ्यः
अनुपसर्गेभ्यः
यः स्यात् ।
गम्यम्, मद्यम्, गद्यम् ।
अनुपसर्गात् इति किम्?
आयाम्यम् ॥ ३० ॥

**चरेः, आङस्त्वगुरौ । ५ । १ । ३१ ।**

अनुपसर्गात् चरेः
आङ्पूर्वात् तु अ-गुरौ
यः स्यात् ।
चर्यः, आचर्यो देशः ।
अ-गुरौ इति किम्? आचार्यः ॥३१॥

**वर्यो-पसर्या-ऽवद्य-पण्यं उपेय-ऋतुमती-गर्ह्य-विक्रेये । ५ । १ ३२ ।**

एते
उपेयादिषु
यथासङ्ख्यं

यान्ताः

निपात्यन्ते ।

वर्या कन्या,

उपसर्या गौः,

अवद्यं गर्ह्यम्,

पण्या गौः ॥ ३२ ॥

**स्वामि-वैश्येऽर्यः । ५ । १ । ३३ ।**

अर्त्तेः

स्वामि-वैश्ययोः यः स्यात् ।

अर्यः-स्वामी वैश्यो वा । आर्योऽन्यः ॥ ३३ ॥

**वह्यं करणे । ५ । १ । ३४ ।**

वहेः

करणे

यः स्यात् ।

वह्यं शकटम् ॥ ३४ ॥

**नाम्नो वदः क्यप् च । ५ । १ । ३५ ।**

अनुपसर्गात् नाम्नः परात्

वदेः

क्यप्यौ स्याताम् ।

ब्रह्मोद्यम्, ब्रह्मवद्यम् ।

नाम्नः इति किम् । वाद्यम् ?

अनुपसर्गात् इत्येव ? प्रवाद्यम् ॥३५॥

## हत्या-भूयं भावे । ५ । १ । ३६ ।

अनुपसर्गाद्

नाम्नः परौ

हत्या-भूयौ

भावे

क्यबन्तौ साधू स्तः ।

ब्रह्महत्या,

देवभूयं गतः ।

भाव इति किम् ? श्व-घात्या सा ॥३६॥

## अग्निचित्या । ५ । १ । ३७ ।

अग्नेः परात् चेः

स्त्री भावे

क्यप् स्यात् ।

अग्निचित्या ॥ ३७ ॥

खेय-मृषोद्ये ।५।१।३८।

एतौ क्यबन्तौ साधू स्तः । निखेयम्, मृषोद्यम ॥ ३८ ॥

कुप्य-भिद्योध्य-सिध्य-तिष्य-पुष्य-युग्याऽऽज्य-सूर्यं नाम्नि ।५।१।३९।

एते क्यबन्ताः संज्ञायां निपात्यन्ते । कुप्यं धनम, भिद्यम. ऊध्यो नदः, सिध्यः, तिष्यः, पुष्यः, युग्यं वाहनम, आज्यं घृतम्, सूर्यो रविः ॥ ३९ ॥

दृ-वृग-स्तु-जुषेति-शासः ५ । १ । ४० ।

एभ्यः

क्यप् स्यात् ।

आहत्यः, प्रावृत्यः,

अवश्यस्तुत्यः ।

जुष्यः, इत्यः, शिष्यः ॥ ४० ॥

**ऋदुपान्त्याद् अ-कृपि-चृत्-ऋचः**

**। ५ । १ । ४१ ।**

ऋदुपान्त्याद् धातोः

कृपि—चृति—ऋचिवर्जात्

क्यप् स्यात् ।

वृत्यम् ।

अ-कृपि—चृदृचः—इति किम्?

कल्प्यम् , चर्त्यम् , अर्च्यम् ॥ ४१ ॥

**कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा**

**। ५ । १ । ४२ ।**

एभ्यः

क्यप्

वा स्यात् ।

कृत्यम्-कार्यम् ।

वृष्यम्-वर्ष्यम् ।

मृज्यम्-मार्ग्यम् ।

शस्यम्-शंस्यम् ।

गुह्यम्-गोह्यम् ।

दुह्यम्-दोह्यम् ।

जप्यम्-जाप्यम् ॥ ४२ ॥

## जि-विपू-न्यो हलि-मुञ्ज-कल्के

। ५ । १ । ४३ ।

नेः वि-पूर्वाभ्यां च पू-नीभ्यां यथासङ्ख्यं हलि-मुञ्ज-कल्केषु कर्मसु क्यप् स्यात् ।

जित्यो हलिः

विपूयो मुञ्जः,

विनीयः कल्कः ।

हलि-मुञ्ज-कल्क इति किम् ?

जेयम्, विपव्यम् , विनेयम् ॥४३॥

## पद्याऽस्वैरि-बाह्या-पक्ष्ये ग्रहः । ५ । १ । ४४ ।

एषु अर्थेषु
ग्रहेः
क्यप् स्यात् ।
प्रगृह्यं=पदम् ,
गृह्याः=परतन्त्राः,
ग्रामगृह्या=बाह्येत्यर्थः,
गुणगृह्या=गुणपक्ष्याः ॥ ४४ ॥

## भृगोऽसंज्ञायाम् । ५ । १ । ४५ ।

भृगः असंज्ञायां
क्यप् स्यात् ।
भृत्यः=पोष्यः ।
अ-संज्ञायां इति किम् ?
भार्या पत्नी ॥ ४५ ॥

## समो वा । ५ । १ । ४६ ।

संपूर्वाद् भृगः
क्यप् वा स्यात् ।
संभृत्यः-संभार्यः ॥ ४६ ॥

ते कृत्याः । ५ । १ । ४७ ।

ध्यण्-तव्या-ऽनीय-य-क्यप्प्रत्ययाः
कृत्याः स्युः ॥ ४७ ॥

णक-तृचौ । ५ । १ । ४८ ।

धातोरेतौ
कर्त्तरि स्याताम् ।
पाचकः, पक्ता ॥ ४८ ॥

अच् । ५ । १ । ४९ ।

धातोः अच् स्यात् ।
करः, हरः ॥ ४९ ॥

लिहादिभ्यः । ५ । १ । ५० ।

एभ्यः
अच स्यात् ।
लेहः, शेषः ॥ ५० ॥

ब्रुवः । ५ । १ । ५१ ।

ब्रूगः अचि
ब्रुवः स्यात् ।
ब्राह्मणब्रुवः ॥ ५१ ॥

नन्द्यादिभ्योऽनः । ५ । १ ५२ ।

एभ्यः

नामगणदृष्टेभ्यः

अनः स्यात् ।

नन्दनः, वसनः,

सहनः, संक्रन्दनः,

सर्वदमनः, नर्दनः ॥५२॥

ग्रहादिभ्यो णिन् । ५ । १ । ५३ ।

एभ्यः

णिन् स्यात् ।

ग्राही, स्थायी ॥ ५३ ॥

नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः

। ५ । १ । ५४ ।

नाम्युपान्त्येभ्यः धातुभ्यः

क्र्यादिभ्यश्च

कः स्यात् ।

विक्षिपः,
प्रियः,
किरः, गिरः,
ज्ञः ॥ ५४ ॥

गेहे ग्रहः । ५ । १ । ५५ ।

गेहेऽर्थे
ग्रहेः
कः स्यात् ।
गृहम्, गृहाः ॥ ५५ ॥

उपसर्गाद् आतो डोऽ-श्यः । ५ । १ । ५६ ।

उपसर्गात् परात्
श्यैङ्वर्जात्
आकारान्ताद् धातोः
डः स्यात् ।
आह्वः ।
उपसर्गात् इति किम् ? दायः ।
अ-श्यः इति किम् ? अवश्यायः ॥५६॥

व्याघ्राऽऽघ्रे प्राणि-नसोः । ५ । १ । ५७ ।

एतौ यथासङ्ख्यं प्राणिनि नासिकायां च अर्थे घ्रः डे निपात्यते । व्याघ्रः, आघ्रा ॥ ५७ ॥

**घ्रा-ध्मा-पा-ट्धे-दृशः शः । ५ । १ । ५८ ।**

एभ्यः शः स्यात् । जिघ्रः, उद्धमः पिबः, उद्धयः, उत्पश्यः ॥ ५८ ॥

**साहि-साति-वेद्यु-देजि-धारि-पारि-चेतेरनुपसर्गात् । ५ । १ । ५९ ।**

एभ्यः अनुपसर्गेभ्यः ण्यन्तेभ्यः शः स्यात् ।

साह्वयः, सातयः
वेदयः, उदेजयः,
धारयः, पारयः,
चेतयः ।
अनुपसर्गात् इति किम् ?
प्रसाहयिता ॥ ५९ ॥

**लिम्प-विन्दः । ५ । १ । ६० ।**

आभ्यां
अनुपसर्गाभ्यां
शः स्यात् ।
लिम्पः विन्दः ॥ ६० ॥

**नि-गवादेर्नाम्नि । ५ । १ । ६१ ।**

यथासङ्ख्यं
नि-पूर्वात् लिम्पेः
गवादिपूर्वाच्च विन्देः
संज्ञायां
शः स्यात् ।
निलिम्पाः देवाः,

गोविन्दः, कुविन्दः ।

नाम्नि इति किम् ? निलिपः ॥ ६१ ॥

## वा ज्वलादि-दु-नी-भू-ग्रहाऽऽस्रोर्णः । ५ । १ । ६२ ।

ज्वलादेर्धातोः

दुनोत्यादेः

आस्रोश्च

अनुपसर्गात्

णो वा स्यात्

ज्वलः-ज्वालः ।

चलः-चालः ।

दवः-दावः ।

नियः-नायः ।

भवः-भावः ।

ग्राहो-मकरादिः

ग्रहः-सूर्यादिः ।

आस्रवः-आस्रावः ।

अनुपसर्गात् इति किम्, प्रज्वलः ॥ ६२ ॥

**अव-हृ-सा-संस्रोः । ५ । १ । ६३ ।**

अवपूर्वाभ्यां हृ-साभ्यां,
संपूर्वाच्च
स्रः णः स्यात् ।
अवहारः, अवसायः, संस्रावः ॥ ६३ ॥

**तन्-व्यधि-इण्-श्वसातः । ५ । १ । ६४ ।**

एभ्यः
आदन्तेभ्यश्च धातुभ्यः
णः स्यात् ।
तानः, व्याधः,
प्रत्यायः, श्वासः,
अवश्यायः ॥ ६४ ॥

**नृत्-खन्-रञ्जः शिल्पिन्यकट् । ५ । १ । ६५ ।**

एभ्यः
शिल्पिनि कर्तरि
अकट् स्यात् ।
नर्त्तकी, खनकः, रजकः ।
शिल्पिनि इति किम्? नर्त्तिका ॥६५॥

**गस्थकः । ५ । १ । ६६ ।**

गः
शिल्पिनि कर्त्तरि
थकः स्यात् ।
गाथकः ॥ ६६ ॥

**टनण् । ५ । १ । ६७ ।**

गः
शिल्पिनि
टनण् स्यात् ।
गायनी ॥ ६७ ॥

**हः काल-व्रीह्योः । ५ । १ । ६८ ।**

हाकः हाङः वा
काल-व्रीह्योः
टनण् स्यात् ।
हायनो वर्षम्,
हायना व्रीहयः,
हाताऽन्यः ॥ ६८ ॥

**प्र-स्रु-ल्वोऽकः साधौ । ५ । १ । ६९ ।**

एभ्यः

साध्वर्थेभ्यः

अकः स्यात् ।

प्रवकः, सरकः, लवकः ।

साधौ इति किम्? प्रावकः ॥ ६९ ॥

**आशिष्यकन् । ५ । १ । ७० ।**

आशिषि गम्यायां

धातोः

अकन् स्यात् ।

जीवकः ।

आशिषि इति किम्? जीविका ॥७०॥

**तिक्कृतौ नाम्नि । ५ । १ । ७१ ।**

आशीर्विषये

संज्ञायां गम्यमानायां

धातोः तिक् कृतश्च स्युः ।

शान्तिः, वीरभूः, वर्द्धमानः ॥७१॥

## कर्मणोऽण् । ५ । १ । ७२ ।

कर्मणः परात्
धातोः
अण् स्यात् ।
कुम्भकारः ॥ ७२ ॥

## शीलि-कामि-भक्ष्या-चरी-क्षि-क्षमो णः । ५ । १ । ७३ ।

कर्मणः परेभ्यः
एभ्यः
णः स्यात् ।
धर्मशीला,
धर्मकामा,
वायुभक्षा,
कल्याणाऽऽचारा ।
सुखप्रतीक्षा ।
बहुक्षमा ॥ ७३ ॥

## गायोऽनुपसर्गात् टक् । ५ । १ । ७४ ।

कर्म्मणः परात्
अनुपसर्गाद् गायतेः
टक् स्यात् ।
वक्रगी ।
अनुपसर्गात् इति किम्? खरुसंगायः ॥७४॥

## सुरा-सीधोः पिबः । ५ । १ । ७५ ।

आभ्यां कर्मभ्यां परात्
अनुपसर्गात् पिबतेः
टक् स्यात् ।
सुरापी, सीधुपी ॥ ७५ ॥

## आतो डोऽह्वा-वा-मः । ५ । १ । ७६ ।

कर्मणः परात्
अनुपसर्गाद् ह्वा-वा-मावर्जाद्
आदन्तात्
धातोः
डः स्यात् ।
गोदः ।
अ-ह्वा-वाम इति किम्?
स्वर्गह्वायः, तन्तुवायः धान्यमायः ॥७६॥

समः ख्यः । ५ । १ । ७७ ।

कर्मणः परात्

सं-पूर्वात् ख्यः

डः स्यात् ।

गोसङ्ख्यः ॥७७॥

दश्चाऽङः । ५ । १ । ७८ ।

कर्मणः परात्

अङ्पूर्वाद्

दागः ख्यश्च

डः स्यात् ।

दायादः ।

स्त्र्याख्यः ॥ ७८ ॥

प्राद् ज्ञश्च । ५ । १ । ७९ ।

कर्मणः परात्

प्रपूर्वाद्

ज्ञो दागश्च

डः स्यात् । पथिप्रज्ञ, प्रपाप्रदः ॥ ७९ ॥

आशिषि हनः । ५ । १ । ८० ।

कर्मणः परात्
हन्तेः
आशिषि
डः स्यात् । शत्रुहः ॥ ८० ॥

**क्लेशाऽऽदिभ्योऽपात् । ५ । १ । ८१ ।**

क्लेशादिकर्मणः परात्
हन्तेः
डः स्यात् ।
क्लेशापहः, तमोऽपहः ॥ ८१ ॥

**कुमार-शीर्षात् णिन् । ५ । १ । ८२ ।**

आभ्यां कर्मभ्यां परात्
हन्तेः
णिन् स्यात् ।
कुमारघाती, शीर्षघाती ॥ ८२ ॥

**अचित्ते टक् । ५ । १ । ८३ ।**

कर्मणः परात् हन्तेः
अचित्तवति कर्त्तरि
टक् स्यात् ।

वातघ्नं तैलम् ।

अचित्त इति किम् ?

पापघातो यतिः ॥ ८३ ॥

## जाया-पतेश्चिह्नवति । ५ । १ । ८४ ।

आभ्यां कर्मभ्यां पराद्

हन्तेः

चिह्नवति कर्त्तरि

टक् स्यात् ।

जायाघ्नो ब्राह्मणः,

पतिघ्नी कन्या ॥ ८४ ॥

## ब्रह्माऽऽदिभ्यः । ५ । १ । ८५ ।

एभ्यः कर्मभ्यः परात्

हन्तेः

टक् स्यात् ।

ब्रह्मघ्नः—गोघ्नः पापी ॥८५॥

## हस्ति-बाहु-कपाटात् शक्तौ । ५ । १ । ८६ ।

एभ्यः कर्मभ्यः पराद्

हन्तेः

शक्तौ गम्यायां

टक् स्यात् ।

हस्तिघ्नः, बाहुघ्नः, कपाटघ्नः ।

शक्तौ इति किम् ?

हस्तिघातो विषदः ॥ ८६ ॥

**नगराद् अ-गजे । ५ । १ । ८७ ।**

नगरात् कर्मणः परात्

हन्तेः

अ-गजे कर्त्तरि

टक् स्यात् ।

नगरघ्नो व्याघ्रः ।

अ-गज इति किम् ?

नगरघातो हस्ती ॥ ८७ ॥

**राजघः । ५ । १ । ८८ ।**

राज्ञः कर्मणः पराद्

हन्तेः टक्,

घाऽऽदेशश्च

निपात्यते ।

राजघः ॥ ८८ ॥

पाणिघ-ताडघौ शिल्पिनि । ५ । १ । ८९ ।

एतौ शिल्पिनि टगन्तौ निपात्यते । पाणिघः, ताडघः । शिल्पिनि इति किम् ? पाणिघातः, ताडघातः ॥ ८९ ॥

कुक्ष्या-त्मो-दरात् भृगः खिः ।५।१।९०।

एभ्यः कर्मभ्यः परात् भृगः खिः स्यात् । कुक्षिम्भरिः, आत्मम्भरिः, उदरम्भरिः ॥ ९० ॥

अर्होऽच् । ५ । १ । ९१ ।

कर्मणः परात्
अर्हः
अच् स्यात् ।
पूजाऽर्हा साध्वी ॥ ९१ ॥

**धनुष्-दण्ड-त्सरु-लाङ्गलाऽङ्कुश-ऋष्टि-यष्टि-शक्ति-तोमर-घटाद् ग्रहः ।५।१।९२।**

एभ्यः कर्मभ्यः परात्
ग्रहः
अच् स्यात् ।
धनुर्ग्रहः, दण्डग्रहः,
त्सरुग्रहः, लाङ्गलग्रहः,
अङ्कुशग्रहः, ऋष्टिग्रहः,
यष्टिग्रहः, शक्तिग्रहः,
तोमरग्रहः, घटग्रहः ॥ ९२ ॥

**सूत्राद् धारणे । ५ । १ । ९३ ।**

सूत्रात् कर्मणः परात्
ग्रहः

ग्रहणपूर्वक-धारणार्थाद्

अच् स्यात् ।

सूत्रग्रहः प्राज्ञः-सूत्रधारो वा ।

धारण इति किम् ? सूत्रग्राहः ॥९३॥

## आयुधाऽऽदिभ्यो धृगोऽदण्डादेः । ५ । १ । ९४ ।

दण्डादिवर्जाद्

आयुधादेः

कर्मणः पराद्

धृगः

अच् स्यात् ।

धनुर्द्धरः, भूधरः ।

अ-दण्डादेः इति किम् ?

दण्डधारः । कुण्डधारः ॥९४॥

## हृगो वयोऽनुद्यमे । ५ । १ । ९६ ।

कर्मणः पराद् हृगः

वयसि अनुद्यमे च गम्ये

अच् स्यात् ।

अस्थिहरः श्वशिशुः ।

उद्यमः=

=उत्क्षेपणं आकाशे धारणं वा,

तदभावे ।

अंशहरो दायादः,

मनोहरा माला ।

वयो-ऽनुद्यम इति किम् ? भारहारः ॥९५॥

## आङः शीले । ५ । १ । ९६ ।

कर्मणः परात

आङ्पूर्वाद्

हृग

शीले गम्ये

अच् स्यात्

पुष्पाहरः ।

शील इति किम् ? पुष्पाहारः ॥९६॥

## दृति-नाथात् पशौ इः ५ । १ । ९७ ।

आभ्यां कर्मभ्यां

परात्

हृगः

पशौ कर्त्तरि
इः स्यात् ।
दृतिहरिः श्वा,
नाथहरिः सिंहः ॥ ९७ ॥

**रजस्-फले-मलाद् ग्रहः । ५ । १ । ९८ ।**

एभ्यः कर्मभ्यः पराद्
ग्रहेः
इः स्यात् ।
रजोग्रहिः,
फलेग्रहिः,
मलग्रहिः ॥ ९८ ॥

**देव-वाताद् आपः । ५ । १ । ९९ ।**

आभ्यां कर्मभ्यां परात्
आपेः
इः स्यात् ।
देवाऽऽपिः, वाताऽऽपिः ॥ ९९ ॥

**शकृत्-स्तम्बाद् वत्स-व्रीहौ कृगः । ५ । १ । १०० ।**

आभ्यां कर्मभ्यां परात्
क्रगः
यथासङ्ख्यं
वत्स-व्रीह्योः कर्त्रोः
इः स्यात् ।
शकृत्करिः वत्सः,
स्तम्बकरिः व्रीहिः ॥ १०० ॥

किम्-यत्-तद्-बहोरः । ५ । १ । १०१ ।

एभ्यः कर्मभ्यः परात्
कृगः
अः स्यात् ।
किंकरा, यत्करा,
तत्करा, बहुकरा ॥ १०१ ॥

सङ्ख्या-ऽह-दिवा-विभा-निशा-प्रभा-भास्-चित्र-कर्तृ-आदि-अन्ता-ऽनन्त-कार-बाहु-अरुष्-धनुष्-नान्दी-लिपि-लिवि-बलि-भक्ति-क्षेत्र-जङ्घा-क्षपा-क्षणदा-रजनि-दोषा-दिन-दिवसात् टः ।५।१।१०२।

सङ्ख्या इति अर्थप्रधानं अपि,
एभ्यः कर्मभ्यः परात्
कृगः
टः स्यात् ।
सङ्ख्याकरः, द्विकरः
अहस्करः, दिवाकरः
विभाकरः, निशाकरः,
प्रभाकरः भास्करः
चित्रकरः, कर्तृकरः,
आदिकरः,
अन्तकरः
अनन्तकरः,
कारकरः, वाहुकरः,
अरुष्करः, धनुष्करः,
नान्दीकरः,
लिपिकरः लिविकरः,
बलिकरः, भक्तिकरः,
क्षेत्रकरः, जङ्घाकरः,

क्षपाकरः, क्षणदाकरः,

रजनिकरः, दोषाकरः,

दिनकरः, दिवसकरः ॥१०२॥

## हेतु-तच्छीलाऽनुकूलेऽ-शब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-अन्त्र-पदात् । ५ । १ । १०३ ।

एषु कर्तृषु

शब्दादिवर्जात् कर्मणः परात्

कृगः

टः स्यात् ।

यशस्करी विद्या,

श्राद्धकरः, प्रेषणकरः ।

## भृतौ कर्मणः । ५ । १ । १०४ ।

कर्मशब्दात्

कर्मणः परात्

कृगः
भृतौ गम्यायां
टः स्यात् ।
कर्मकरी दासी ॥ १०४ ॥

क्षेम-प्रिय-मद्र-भद्रात् खाऽण् ।५।१।१०५।

एभ्यः कर्मभ्यः परात्
कृगः
खाऽणौ स्याताम् ।
क्षेमङ्करः–क्षेमकारः
प्रियङ्करः–प्रियकारः,
मद्रङ्करः–मद्रकारः,
भद्रङ्करः–भद्रङ्कारः ॥ १०५ ॥

मेघ-र्त्ति-भया-ऽभयात् खः ।५।१।१०६।

एभ्यः कर्मभ्यः परात्
कृगः
खः स्यात् ।
मेघङ्करः, ऋतिङ्करः,
भयङ्करः, अभयङ्करः ॥१०६॥

**प्रिय-वशाद् वदः । ५ । १ । १०७ ।**

आभ्यां कर्मभ्यां पराद्

वदः

खः स्यात् ।

प्रियम्वदः, वशम्वदः ॥ १०७ ॥

**द्विषन्तप-परन्तपौ । ५ । १ । १०८ ।**

द्विषत्—पराभ्यां कर्मभ्यां परात्

ण्यन्तात् तपेः

खः

ह्रस्वः

द्विषतः अनच्

निपात्यते ।

द्विषन्तपः, परन्तपः ॥ १०८ ॥

**परिमाणार्थ-मित-नखात् पचः । ५ । १ । १०९ ।**

प्रस्थादि-मित-नखेभ्यः

कर्मभ्यः परात्

पचेः

खः स्यात् ।

प्रस्थम्पचः,

मितम्पचः,

नखम्पचः ॥ १०९ ॥

## कूलाऽभ्र-करीषात् कषः । ५ । १ । ११० ।

एभ्यः कर्मभ्यः

कषेः

खः स्यात् ।

कूलङ्कषा,

अभ्रङ्कषा,

करीषङ्कषा ॥ ११० ॥

## सर्वात् सहश्च । ५ । १ । १११ ।

सर्वात् कर्मणः परात्

सहेः कषेश्च

खः स्यात् ।

सर्वंसहः, सर्वङ्कषाः ॥ १११ ॥

## भृ-वृ-जि-तृ-तप-दमेश्च नाम्नि

## । ५ । १ । ११२ ।

कर्मणः परेभ्यः एभ्यः,

सहेश्च

संज्ञायां

खः स्यात् ।

विश्वम्भरा भूः,

पतिम्वरा कन्या,

शत्रुञ्जयोऽद्रिः,

रथन्तरं साम,

शत्रन्तपो राजा,

बलिन्दमः कृष्णः,

शत्रुसहो राजा ।

नाम्नि इति किम् ?

कुटुम्बभारः ॥ ११२ ॥

**धारेर्धर् च । ५ । १ । ११३ ।**

कर्मणः पराद्

धारेः

संज्ञायां

खः स्यात्,

धारेश्च धर् ।

वसुन्धरा भूः ॥ ११३ ॥

**पुरन्दर-भगन्दरौ । ५ । १ । ११४ ।**

एतौ

संज्ञायां

खान्तौ

निपात्येते ।

पुरन्दरः शक्रः

भगन्दरो व्याधिः ॥ ११४ ॥

**वाचंयमो व्रते । ५ । १ । ११५ ।**

व्रते गम्यमाने

वाचः कर्मणः परात्

यमेः खः,

वाचोऽम् अन्तश्च

स्यात् ।

वाचंयमो व्रती ॥ ११५ ॥

**मन्यात् णिन् । ५ । १ । ११६ ।**

कर्मणः पराद्

मन्यतेः

णिन् स्यात् ।

पण्डितमानी बन्धोः ॥ ११६ ॥

**कर्तुः खश् । ५ । १ । ११७ ।**

प्रत्ययार्थात् कर्तुः

कर्मणः पराद्

मन्यतेः

खश् स्यात् ।

पण्डितम्मन्यः ।

कर्तुः इति किम् ?

पटुमानी चैत्रस्य ॥ ११७ ॥

**एजेः । ५ । १ । ११८ ।**

कर्मणः परात्

एजयतेः

खश् स्यात् ।

अरिमेजयः ॥ ११८ ॥

शुनी-स्तन-मुञ्ज-कूलाऽऽस्य-पुष्पात् ट्धेः । ५ । १ । ११९ ।

एभ्यः कर्मभ्य ट्धेः खश् स्यात् । शुनिन्धयः, स्तनन्धयः, मुञ्जन्धयः, कूलन्धयः, आस्यन्धयः, पुष्पन्धयः ॥ ११९ ॥

नाडी-घटी-खरी-मुष्टि-नासिका-वाताद् ध्मश्च । ५ । १ । १२० ।

एभ्यः कर्मभ्यः पराद् ध्मः ट्धेश्च खश् स्यात् । नाडिन्धमः, नाडिन्धयः ।

घटिन्धमः, घटिन्धयः ।

खरिन्धमः, खरिन्धयः,

मुष्टिन्धमः, मुष्टिन्धयः ।

नासिकन्धमः. नासिकन्धयः ।

वातन्धमः वातन्धयः ॥१२०॥

## पाणि-करात् । ५ । १ । १२१ ।

आभ्यां कर्मभ्यां परात्

ध्मः

खश् स्यात् ।

पाणिन्धमः, करन्धमः ॥ १२१ ॥

## कूलाद् उद्रुजो-द्वहः । ५ । १ । १२२ ।

कूलात् कर्मणः पराभ्यां

आभ्यां

खश् स्यात् ।

कूलमुद्रुजः, कूलमुद्वहः ॥ १२२॥

## वहा-ऽभ्रात् लिहः । ५ । १ । १२३ ।

आभ्यां कर्मभ्यां परात्

लिहः

खश् स्यात् ।

वहंलिहः, अभ्रंलिहः ॥ १२३ ॥

**बहु-विध्व-रुष्-तिलात् तुदः । ५ । १ । १२४ ।**

एभ्यः कर्मभ्यः परात् तुदेः खश् स्यात् ।

बहुन्तुदः, विधुन्तुदः, अरुन्तुदः, तिलन्तुदः ॥ १२४ ॥

**ललाट-वात-शर्द्धात् तपा-ऽज-हाकः । ५ । १ । १२५ ।**

एभ्यः कर्मभ्यः परेभ्यः यथासङ्ख्यं तपा-ऽज-हाग्भ्यः खश् स्यात् ।

ललाटन्तपः, वातमजः, शर्द्धञ्जहः ॥ १२५ ॥

अ-सूर्यो-ग्राद् दृशः । ५ । १ । १२६ ।

आभ्यां कर्मभ्यां पराद्

दृशेः

खश् स्यात् ।

अ-सूर्यम्पश्यः, उग्रम्पश्यः ॥ १२६ ॥

इरम्मदः । ५ । १ । १२७ ।

इरापूर्वाद्

मदेः

खश् स्यात् ।

इरम्मदः ॥ १२७ ॥

नग्न-पलित-प्रिया-ऽन्ध-स्थूल-सुभगाऽऽढ्य-तदन्ताऽच्व्यर्थेऽच्वे र्भुवः खिष्णु-खुकञौ । ५ । १ । १२८ ।

नग्नादिभ्यः केवलेभ्यः

तदन्तेभ्यश्च अच्व्यन्तेभ्यः

च्व्यर्थवृत्तिभ्यः पराद्

भुवः

खिष्णु-खुकञौ स्याताम् ।

नग्नम्भविष्णुः, नग्नम्भावुकः,

पलितम्भविष्णुः, पलितम्भावुकः

प्रियम्भविष्णुः, प्रियम्भावुकः,

अन्धम्भविष्णुः, अन्धम्भावुकः,

स्थूलम्भविष्णुः, स्थूलम्भावुकः,

सुभगम्भविष्णुः, सुभगम्भावुकः

आढ्यम्भविष्णुः, आढ्यम्भावुकः

तदन्तः-

सुनग्नम्भविष्णुः, सुनग्नभावुक इत्यादि

अ-च्वेः इति किम् ?

आढ्यो भविता ॥ १२८ ॥

**कृगः खनट् करणे । ५ । १ । १२९ ।**

नग्नादिभ्यः

अ-च्व्यन्तेभ्यः

च्व्यर्थवृत्तिभ्यः परात्

कृगः

करणे

खनट् स्यात् ।

नग्नङ्करणं द्यूतम्,

पलितङ्करणम्, प्रियङ्करणम्,

अन्धङ्करणम्, स्थूलङ्करणम्,

सुभगङ्करणम्, आढ्यङ्करणम्,

सुनग्नङ्करणम् ।

च्व्यर्थ इति किम्?

नग्नं करोति द्यूतेन ॥१२९॥

## भावे चाऽऽशिताद् भुवः खः ।५।१।१३०।

आशितात् परात् भुवः

भाव–करणयोः

खः स्यात् ।

आशितम्भवः ते,

आशितम्भव ओदनः ॥ १३० ॥

## नाम्नो गमः खड्-डौ च, विहायसस्तु विहः । ५ । १ । १३१ ।

नाम्नः पराद् गमेः

खड–ड–खाः स्युः,

विहायसो विहश्च ।

तुरङ्गः, तुरगः ।

विहङ्गः, विहगः ।

तुरङ्गमः, विहङ्गमः,

सुतङ्गमो मुनिः ॥ १३१ ॥

**सुग-दुर्गमाऽऽधारे । ५ । १ । १३२ ।**

सु—दुर्भ्यां परात् गमेः

आधारे

डः स्यात् ।

सुगः—दुर्गः पन्थाः ॥ १३२ ॥

**निर्गो देशे । ५ । १ । १३३ ।**

निस्पूर्वाद् गमेः

आधारे देशे

डः स्यात् ।

निर्गो देशः ॥ १३३ ॥

**शमो नाम्नि अः । ५ । १ । १३४ ।**

शमो नाम्नः परात्

धातोः संज्ञायां

अः स्यात् ।

शम्भवः अर्हन् ।

नाम्नि इति किम् ।

शङ्करी दीक्षा ॥ १३४ ॥

## पार्श्वाऽऽदिभ्यः शीङः । ५ । १ । १३५ ।

एभ्यो नामभ्यः परात्

शीङः

अः स्यात् ।

पार्श्वशयः ॥ १३५ ॥

## उदूर्ध्वाऽऽदिभ्यः कर्तुः । ५ । १ । १३६ ।

एभ्यः कर्तृवाचिभ्यः परात्

शीङः

अः स्यात् ।

ऊर्ध्वशयः, उत्तानशयः ॥ १३६ ॥

## आधारात् । ५ । १ । १३७ ।

आधाराद्

नाम्नः परात्

शीङः

अः स्यात् ।

खशयः ॥ १३७ ॥

**चरेष्टः । ५ । १ । १३८ ।**

आधारात् परात्

चरेः

टः स्यात् ।

कुरुचरी ॥ १३८ ॥

**भिक्षा-सेना-ऽऽदायात् । ५ । १ । १३९ ।**

एभ्यः परात्

चरेः

टः स्यात् ।

भिक्षाचरी,

सेनाचरः,

आदायचरः ॥ १३९ ॥

**पुरो-ऽग्रतो-ऽग्रे सर्त्तेः । ५ । १ । १४० ।**

एभ्यः परात्

सर्त्तेः

टः स्यात् ।

पुरःसरी,

अग्रतःसरः,

अग्रेसरः ॥ १४० ॥

## पूर्वात् कर्तुः । ५ । १ । १४१ ।

पूर्वात् कर्तुवृत्तेः परात्

सर्त्तेः

टः स्यात् ।

पूर्वसरः ।

कर्तुः इति किम् । पूर्वसारः ॥१४१॥

## स्था-पा-स्ना-त्रः कः । ५ । २ । १४२ ।

नाम्नः परेभ्य एभ्यः

कः स्यात् ।

समस्थः कच्छपः,

नदीष्णः, धर्मत्रम् ॥ १४२ ॥

## शोकापनुद-तुन्दपरिमृज-स्तम्बेरम-कर्णेजप प्रियाऽलस-हस्ति-सूचके । ५ । १ । १४३ ।

एते

यथासङ्ख्यं

प्रियादिषु

अर्थेषु

काऽन्ताः

निपात्यन्ते ।

शोकापनुदः=प्रियः,

तुन्दपरिमृजः=अलसः,

स्तम्बेरमः=हस्ती,

कर्णेजपः=अतिखलः ।

एषु इति किम् ?

शोकापनोदः धर्माचार्यः ॥ १४३ ॥

## मूलविभुजाऽऽदयः । ५ । १ । १४४ ।

एते काऽन्ताः

यथादर्शनं

निपात्यन्ते ।

मूलविभुजो रथः,

कुमुदं कैरवम् ॥ १४४ ॥

दुहेर्डुघः । ५ । १ । १४५ ।

नाम्नः परात्

दुहेः डुघः स्यात् ।

कामदुघा ॥ १४५ ॥

भजो ञ्विण् । ५ । १ । १४६ ।

नाम्नः परात्

भजेः विण् स्यात् ।

अर्द्धभाक् ॥ १४६ ॥

मन्-वन्-क्वनिप्-विच् क्वचित् । ५ । १ । १४७ ।

नाम्नः परात्

धातोः

एते

यथालक्ष्यं स्युः ।

मन्-इन्द्रशर्मा ।

वन्-विजावा ।

क्वनिप्-सुधीवा ।

विच्-शुभंयाः ॥ १४७ ॥

क्विप् । ५ । १ । १४८ ।

नाम्नः परात्

धातोः

यथालक्ष्यं

क्विप् स्यात् ।

उखास्रत् ॥ १४८ ॥

स्पृशोऽनुदकात् । ५ । १ । १४९ ।

उदकवर्जाद्

नाम्नः परात्

स्पृशेः

क्विप् स्यात् ।

घृतस्पृक् ।

अनुदकात् इति किम् ? उदकस्पर्शः ॥१४९॥

अदोऽनन्नात् । ५ । १ । १५० ।

अन्नवर्जाद् नाम्नः परात्

अदेः

क्विप् स्यात् ।

आमात् ।

अनन्नात् इति किम् ? अन्नादः ॥१५०॥

**क्रव्यात्-क्रव्यादौ आम-पक्वाऽऽदौ । ५ । १ । १५१ ।**

एतौ

यथासङ्ख्यं

आमात्-पक्वादर्थौ

क्विब्-णन्तौ

साधू-स्तः

क्रव्यात्=आममांसभक्षः,

क्रव्यादः=पक्व-मांसभक्षः ॥ १५१ ॥

**त्यदाद्य-न्यसमानादुपमानाद् व्याप्ये दृशः टक्-सकौ च । ५ । १ । १५२ ।**

एभ्यः

उपमानेभ्यः

व्याप्येभ्यः पराद्

दृशेः

व्याप्य एव

टक्-सकौ क्विप् च

स्युः ।

त्यादृशः, त्यादृक्षः, त्यादृक्,

अन्यादृशः अन्यादृक्षः, अन्यादृक्ः,

सदृशः, सदृक्षः सदृक् ।

व्याप्य इति किम् ?

तेनेव दृश्यते ॥ १५२॥

## कर्तुर्णिन् । ५ । १ । १५३ ।

कर्त्रर्थात् उपमानात् पराद्

धातोः

णिन स्यात् ।

उष्टकोशी ॥ १५३॥

## अ-जातेः शीले । ५ । १ । १५४ ।

अ-जात्यर्थात्

नाम्नः परात्

शीलार्थात् धातोः

णिन् स्यात् ।

उष्णभोजी, प्रस्थायी ।

अ-जातेः इति किम् ?

शालीन् भोक्ता ।

शील इति किम् ?

उष्णभोजो मन्दः ॥ १५४ ॥

साधौ । ५ । १ । १५५ ।

नाम्नः परात्

साध्वर्थात् धातोः

णिन् स्यात् ।

साधुकारी ॥ १५५ ॥

ब्रह्मणो वदः । ५ । १ । १५६ ।

ब्रह्मणः पराद्

वदः

णिन् स्यात् ।

ब्रह्मवादी ॥ १५६ ॥

व्रताऽऽभीक्ष्ण्ये । ५ । १ । १५७ ।

अनयोः गम्यमानयोः

नाम्नः परात् धातोः

णिन् स्यात् ।

स्थण्डिलवर्त्ती,

क्षीरपायिणः उशीनराः ॥ १५७ ॥

करणाद् यजो भूते । ५ । १ । १५८ ।

करणार्थाद्

नाम्नः पराद्

भूतार्थात्

यजेः

णिन् स्यात् ।

अग्निष्टोमयाजी ॥ १५८ ॥

**निन्द्ये व्याप्यात् इन् वि-क्रियः ।५।१।१५९।**

व्याप्याद् नाम्नः परात्

भूतार्थाद् वि-क्रियः

कुत्स्ये कर्त्तरि

इन् स्यात् ।

सोमविक्रयी ।

निन्द्य इति किम् ? धान्यविक्रायः ॥१५९॥

**हनो णिन् । ५ । १ । १६० ।**

व्याप्यात् पराद्

भूतार्थाद्

हन्तेः

निन्द्ये कर्त्तरि

णिन् स्यात्

पितृघाती ॥ १६० ॥

ब्रह्म-भ्रूण-वृत्रात् क्विप् । ५ । १ । १६१ ।

एभ्यः कर्मभ्यः परात्

भूतार्थात्

हन्तेः

क्विप् स्यात् ।

ब्रह्महा, भ्रूणहा, वृत्रहा ॥ १६१ ॥

कृगः सु-पुण्य-पाप-कर्म-मन्त्र-पदात्

। ५ । १ । १६२ ।

सोः

पुण्यादेश्च

कर्मणः परात्

भूतार्थात् कृगः

क्विप् स्यात् ।

सुकृत्,

पुण्यकृत्, पापकृत्,
कर्मकृत्, मन्त्रकृत्,
पदकृत् ॥ १६२ ॥

**सोमात् सुगः । ५ । १ । १६३ ।**

सोमात् व्याप्यात् पराद्
भूतार्थात् सुगः
क्विप् स्यात् ।
सोमसुत् ॥ १६३ ॥

**अग्नेश्चेः । ५ । १ १६४ ।**

अग्नेः व्याप्यात् पराद्
भूतार्थात् चेः
क्विप् स्यात् ।
अग्निचित् ॥१६४॥

**कर्मण्यग्न्यर्थे । ५ । १ । १६५ ।**

कर्मणः पराद्
भूतार्थात् चेः
कर्मणि अग्न्यर्थे
क्विप् स्यात् ।
श्येनचित् ॥ १६५ ॥

**दृशः क्वनिप् । ५ । १ । १६६ ।**

व्याप्यात् पराद्
भूतार्थाद् दृशेः
क्वनिप् स्यात् ।
बहुदृश्वा ॥१६६॥

**सह-राजभ्यां कृग्-युधेः ।५।१।१६७।**

आभ्यां कर्मभ्यां पराद्
भूतार्थात
कृगः युधेश्च
क्वनिप् स्यात् ।
सहकृत्वा, सहयुध्वा,
राजकृत्वा राजयुध्वा ॥१६७॥

**अनोर्जनेर्डः । ५ । १ । १६८ ।**

कर्मणः परात
अनुपूर्वात् भूतार्थाद्
जनेः
डः स्यात ।
पुमनुजः ॥ १६८ ॥

**सप्तम्याः । ५ । १ । १६९ ।**

सप्तम्यन्ताद्

भूतार्थात् जनेः

डः स्यात् ।

मन्दुरजः ॥ १६९ ॥

**अ-जातेः पञ्चम्याः । ५ । १ । १७० ।**

पञ्चम्यन्तात्

जात्यर्थाद्

भूतार्थाद्

जनेः

डः स्यात् ।

बुद्धिजः ।

अ-जातेः इति किम् ?

गजात् जातः ॥ १७० ॥

**क्वचित् । ५ । १ । १७१ ।**

उक्तात् अन्यत्रापि

यथालक्ष्यं

डः स्यात् ।

किञ्जः, अनुजः,

अजः, स्त्रीजः,

ब्रह्मज्यः, वराहः, आखः ॥ १७१ ॥

सु-यजोर्ङ्वनिप् । ५ । १ । १७२ ।

आभ्यां भूतार्थाभ्यां
ङ्वनिप् स्यात् ।
सुत्वानौ, यज्वा ॥ १७२ ॥

जॄषोऽतृः । ५ । १ । १७३ ।

जॄषेः भूतार्थात्
अतृः स्यात् ।
जरती ॥ १७३ ॥

क्त-क्तवतू । ५ । १ । १७४ ।

भूतार्थाद् धातोः
एतौ स्यातम् ।
कृतः, कृतवान् ॥ १७४ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ
पञ्चमस्याध्यायस्य
प्रथमः पादः समाप्तः

॥ श्री वर्धमानस्वामिने नमः ॥

पञ्चमाध्यायस्य

# द्वितीयः पादः

## श्रु-सद-वस्भ्यः परोक्षा वा

। ५ । २ । १ ।

एभ्यः

भूतार्थेभ्यः

परोक्षा

वा स्यात् ।

उपशुश्राव, उपससाद, अनूवास-

पक्षे-

उपाश्रौषीत्-उपाशृणोत्,

उपासदत्-उपासीदत् ।

अन्ववात्सीत्-अन्ववसत् ॥ १ ॥

## तत्र क्वसु-कानौ तद्वत् । ५ । २ । २ ।

परोक्षामात्रविषये धातोः परौ क्वसुकानौ स्यातां, तौ च परोक्षेव । शुश्रुवान्, सेदिवान्, ऊषिवान्, पेचिवान्, पेचानः ॥ २ ॥

## वा ईयिवत्–अनाश्वत्–अनूचानम् । ५ । २ । ३ ।

एते भूतेऽर्थे क्वसु-कानान्ताः कर्त्तरि वा निपात्यन्ते । समीयिवान् अनाश्वान्, अनूचानः ।

पक्षे–

अगात्, उपैत् उपेयाय,

नाशीत्, नाश्नात्, नाश,
अन्ववोचत्, अन्ववक्,
अन्वब्रवीत्, अनूवाच ॥ ३ ॥

**अद्यतनी । ५ । २ । ४ ।**

भूतार्थात्
धातोः
अद्यतनी स्यात् ।
अकार्षीत् ॥ ४ ॥

**विशेषाऽविवक्षाऽव्यामिश्रे । ५ । २ । ५ ।**

अनद्यतनादिविशेषाऽविवक्षायां
व्यामिश्रणे च सति
भूतार्थाद् धातोः
अद्यतनी स्यात् ।
रामो वनमगमत् ।
अद्य ह्यो वाऽभुक्ष्महि ॥ ५ ॥

**रात्रौ वसोऽन्त्ययामाऽस्वप्तरि अद्य । ५ । २ । ६ ।**

रात्रौ भूतार्थवृत्तेः
वसतेः
अद्यतनी स्यात् ।
स चेत् अर्थो यस्यां रात्रौ भूतः
तस्याः एव अन्त्ययामं व्याप्य
अस्वप्तरि कर्त्तरि
स्यात् ।
अद्यतनेनैव
अन्त्ययामेन
अवच्छिन्ने
अद्यतने चेत् प्रयोगोऽस्ति
नाऽद्यतनान्तरे ।
अमुत्राऽवात्सम् ।
रात्रौअन्त्ययामे तु मुहूर्त्तमपि स्वापे-
अमुत्र अवसम् इति ॥ ६ ॥

**अनद्यतने ह्यस्तनी । ५ । २ । ७ ।**

आ न्याय्याद् उत्थानात्
आन्याय्यात् च संवेशनात्
अहरुभयतः
सार्द्धरात्रं वा
अद्यतनः

तस्मिन्
असति
भूतार्थाद् धातोः
ह्यस्तनी स्यात् ।
अकरोत् ॥ ६ ॥

**ख्याते दृश्ये । ५ । २ । ८ ।**

लोकविज्ञाते
प्रयोक्तुः शक्यदर्शने
भूताऽनद्यतने
अर्थे
वर्त्तमानाद् धातोः
ह्यस्तनी स्यात् ।
अरुणत् सिद्धराजोऽवन्तीम् ।
ख्यात इति किम् ? चकार कटम् ।
दृश्य इति किम्?
जघान कंसं किल वासुदेवः ॥ ८ ॥

**अ-यदि स्मृत्यर्थे भविष्यन्ती ।५।२।९।**

स्मृत्यर्थे धातौ

उपपदे

भूताऽनद्यतनाऽर्थवृत्तेः

धातोः

भविष्यन्ती स्यात्,

अ-यद्योगे ।

स्मरसि साधो ! स्वर्गे स्थास्यामः ।

अ-यदि इति किम् ?

अभिजानासि मित्र ! यत्

कलिङ्गेष्ववसाम ॥ ९ ॥

**वा काङ्क्षायाम् । ५ । २ । १० ।**

स्मृत्यर्थे धातौ

उपपदे

प्रयोक्तुः

क्रियान्तर-काङ्क्षायां सत्यां

भूतानद्यतनार्थाद् धातोः

भविष्यन्ती वा स्यात् ।

स्मरसि मित्र !
कश्मीरेषु वत्स्यामः
अवसाम वा-
तत्र ओदनं
भोक्ष्यामहे-अभुञ्जमहि वा ॥ १० ॥

कृताऽस्मरणा-ऽतिनिह्नवे परोक्षा
। ५ । २ । ११ ।

कृतस्यापि
चित्तविक्षेपादिना
अस्मरणे
अत्यन्तनिह्नवे वा गम्ये
भूताऽनद्यतनार्थाद्
धातोः
परोक्षा स्यात् ।
सुप्तोऽहं किल विललाप ।
कलिङ्गेषु ब्राह्मणो हतस्त्वया,
नाऽहं कलिङ्गान् जगाम ॥ ११ ॥

परोक्षे । ५ । २ । १२ ।

भूतानद्यतने
परोक्षाऽर्थाद्
धातोः
परोक्षा स्यात् ।
धर्म्मं दिदेश तीर्थङ्करः ॥ १२ ॥

## ह-शश्वद्-युगान्तः-प्रच्छ्ये ह्यस्तनी च । ५ । २ । १३ ।

हे शश्वति च प्रयुक्ते
पञ्चवर्षमध्यप्रच्छ्ये च
भूताऽनद्यतने
परोक्षेऽर्थे
वर्त्तमानाद् धातोः
ह्यस्तनी-परोक्षे स्याताम् ।
इति ह अकरोत्,
इति ह चकार
शश्वदकरोत्,
शश्वत् चकार.
किमगच्छः त्वं मथुराम् ?
किं जगन्थ त्वं मथुराम् ? ॥ १३ ॥

## अविवक्षिते । ५ । २ । १४ ।

भूताऽनद्यतने

परोक्षे

परोक्षत्वेनाऽविवक्षितेऽर्थे

वर्त्तमानाद् धातोः

ह्यस्तनी स्यात् ।

अहन् कंसं किल वासुदेवः ॥१४॥

## वाऽद्यतनी पुराऽऽदौ । ५ । २ । १५ ।

भूतानद्यतने

परोक्षे

परोक्षत्वेनाऽविवक्षितेऽर्थे

वर्त्तमानाद् धातोः

पुरादौ उपपदे

अद्यतनी वा स्यात् ।

अवात्सुः इह पुरा छात्राः-

पक्षे-

अवसन्-ऊषुर्वा ।

तदाऽभाषिष्ट राघवः-

पक्षे,-

अभाषत-बभाषे वा ॥१५॥

**स्मे च वर्त्तमाना । ५ । २ । १६ ।**

भूताऽनद्यतने

अर्थे वर्त्तमानात्

धातोः

स्मे पुराऽऽदौ च

उपपदे

वर्त्तमाना स्यात् ।

पृच्छति स्म पुरोधसम्,

वसन्ति इह पुरा छात्राः,

अथ आह वर्णी ॥ १६ ॥

**ननौ पृष्टोक्तौ सद्वत् । ५ । २ । १७ ।**

ननौ उपपदे

पृच्छति-वचने

भूतेऽर्थे वर्त्तमानाद्

धातोः

वर्त्तमानेव वर्त्तमाना स्यात् ।

किमकार्षीः कटं चैत्रः ।

ननु करोमि भोः ।

ननु कुर्वन्तं मां पश्य ॥ १७ ॥

**न-न्वोर्वा । ५ । २ । १८ ।**

नन्वोः उपपदयोः

पृष्टोक्तौ

भूतेऽर्थे वर्त्तमानाद्

धातोः

वर्त्तमाना वा स्यात्,

सा च सद्वत् ।

किमकार्षीः कटं चैत्र ?

न करोमि भोः–

*न कुर्वन्तं मां पश्य,–*

नाकार्षम्–

नु करोमि भोः ?

नु कुर्वाणं मां पश्य
नु अकार्षम् ॥ १८ ॥

सति । ५ । २ । १९ ।

वर्त्तमानार्थाद् धातोः
वर्त्तमाना स्यात् ।
अस्ति, कूरं पचति,
मांसं न भक्षयति,
इह अधीमहे,
तिष्ठन्ति पर्वताः ॥ १९ ॥

शत्रानशौ एष्यति तु स-स्यौ ।५।२।२०।

सदर्थात् धातोः
शत्रानशौ स्याताम्,
भविष्यन्तीविषयेऽर्थे स्य-युक्तौ ।
यान्, शयानः,
यास्यन्, शयिष्यमाणः ॥२०॥

तौ माङ्याक्रोशेषु । ५ । २ । २१ ।

माङि उपपदे
आक्रोशे गम्ये
तौ-शत्रानशौ स्याताम् ।

मा पचन् वृषलो ज्ञास्यति ।

मा पचमानोऽसौ मर्तुकामः ॥२१॥

वा वेत्तेः क्वसुः । ५ । २ । २२ ।

सदर्थात्

वेत्तेः

क्वसुर्वा स्यात् ।

तत्त्वं विद्वान्-विदन् ॥२२॥

पूङ्-यजः शानः । ५ । २ । २३ ।

आभ्यां

सदर्थाभ्यां परः

शानः स्यात् ।

पवमानः, यजमानः ॥ २३ ॥

वयः-शक्ति-शीले । ५ । २ । २४ ।

एषु गम्येषु

सदर्थात्

धातोः

शानः स्यात् ।

स्त्रियं-
गच्छमानाः
समश्नानाः
परान् निन्दमानाः ॥२४॥

धारी-ङो-ऽकृच्छ्रेऽतृश् । ५ । २ । २५ ।

सुखसाध्ये
सति अर्थे वर्त्तमानाद्
धारेः इङश्च
परः
अतृश् स्यात् ।
धारयन् आचाराङ्गम्,
अधीयन् द्रुमपुष्पीयम् ॥ २५ ॥

सुग्-द्विषाऽर्हः सत्रि-शत्रु-स्तुत्ये ।५।२।२६।

सदर्थेभ्य एभ्यः
यथासङ्ख्यं
सत्रिणि शत्रौ स्तुत्ये च
कर्त्तरि अतृश् स्यात् ।
सर्वे सुन्वन्तः,

चौरं द्विषन्,

पूजामर्हन् । एषु इति किम् ?

सुरां सुनोति ॥ २६ ॥

## तृन् शील-धर्म-साधुषु । ५ । २ । २७ ।

शीलादिषु

सदर्थाद्

धातोः

तृन् स्यात् ।

कर्त्ता कटम्,

वधूं ऊढां मुण्डयितारः

श्राविष्टायनाः,

गन्ता खेलः ॥ २७ ॥

## भ्राजि-अलङ्कृग्-निराकृग्-भू-सहि-रुचि-वृति-वृधि-चरि-प्रजनाऽपत्रप इष्णुः । ५ । २ । २८ ।

एभ्यः

शीलादि-सदर्थेभ्यः

इष्णुः स्यात् ।

भ्राजिष्णुः,
अलङ्करिष्णुः, निराकरिष्णुः,
भविष्णुः, सहिष्णुः,
रोचिष्णुः, वर्त्तिष्णुः,
वर्द्धिष्णुः, चरिष्णुः
प्रजनिष्णुः, अपत्रपिष्णुः ॥२८॥

## उदः पचि-पति-पदि-मदेः । ५ । २ । २९ ।

उत्पूर्वेभ्यः
एभ्यः
शीलादि-सदर्थेभ्यः
इष्णुः स्यात् ।
उत्पचिष्णुः,
उत्पतिष्णुः,
उन्मदिष्णुः ॥ २९ ॥

## भू-जेः ष्णुक् । ५ । २ । ३० ।

आभ्यां
शीलादि-सदर्थाभ्यां

ष्णुक् स्यात् ।

भूष्णुः, जिष्णुः ॥ ३० ॥

**स्था-ग्ला-म्ला-पचि-परिमृजि-क्षेः स्नुः । ५ । २ । ३१ ।**

एभ्यः

शीलादि-सदर्थेभ्यः

स्नुः स्यात् ।

स्थास्नुः,

ग्लास्नुः, म्लास्नुः,

पक्ष्णुः,

परिमाक्ष्णुः,

क्षेष्णुः ॥ ३१ ॥

**त्रसि-गृधि-धृषि-क्षिपः क्नुः । ५ । २ । ३२ ।**

एभ्यः

शीलादि-सदर्थेभ्यः

क्नुः स्यात् ।

त्रस्नुः, गृध्नुः,

धृष्णुः, क्षिप्नुः ॥ ३२ ॥

सन्-भिक्षाऽऽशंसेरुः । ५ । २ । ३३ ।

शीलादि-सदर्थात्

सन्नन्त द्

भिक्षाऽऽशंसिभ्यां च

उः स्यात् ।

लिप्सुः

भिक्षुः, आशंसुः ॥ ३३ ॥

विन्दु-इच्छू । ५ । २ । ३४ ।

शीलादि-सदर्थाभ्यां

वेत्ती-च्छतिभ्याम्

उः,

यथासङ्ख्यं

नुपान्त्य-च्छान्तादेशौ च निपात्येते ।

विन्दुः, इच्छुः ॥ ३४ ॥

शॄ-वन्देरारुः । ५ । २ । ३५ ।

आभ्यां

शीलादि-सदर्थाभ्यां

आरुः स्यात् ।

विशरारुः, वन्दारुः ॥ ३५ ॥

## दा-ट्धे-सि-शद-सदो रुः ।५।२।३६।

शीलादि—सदर्थेभ्यः

दारूप—ट्धे—सि—शद्—सद्भ्यः

रुः स्यात् ।

दारुः, धारुः सेरुः,

शद्रुः, सद्रुः ॥ ३६ ॥

## शीङ्-श्रद्धा-निद्रा-तन्द्रा-दयि-पति-गृहि-स्पृहे-रालुः । ५ । २ । ३७ ।

एभ्यः

शीलादि—सदर्थेभ्यः

आलुः स्यात् ।

शयालुः, श्रद्धालुः,

निद्रालुः दयालुः,

तन्द्रालुः पतयालुः,

गृहयालुः, स्पृहयालुः ॥ ३७ ॥

## ङौ सासहि-वावहि-चाचलि-पापतिः । ५ । २ । ३८ ।

शीलादि-सदर्थानां
सहि-वहि-चलि-पतां
यङन्तानां
ङौ सति
यथासङ्ख्यं
एते निपात्यन्ते ।
सासहिः, वावहिः,
चाचलिः, पापतिः ॥ ३८ ॥

## सस्रि-चक्रि-दधि-जज्ञि-नेमिः ।५।२।३९।

एते
शीलादौ
सदर्थाद्
द्युक्तिमन्तः
ङ्यन्ताः
निपात्यन्ते ।
सस्रिः, चक्रिः,

दधिः, जज्ञिः,

नेमिः ॥ ३९ ॥

शॄ-कम-गम-हन-वृष-भू-स्थ उकण्

। ५ । २ । ४० ।

शीलादि-सदर्थेभ्यः

एभ्यः

उकण् स्यात् ।

शारुकः, कामुकः,

आगामुकः, घातुकः

वार्षुकः, भावुकः,

स्थायुकः ॥ ४० ॥

लष-पत-पदः । ५ । २ । ४१ ।

शीलादि-सदर्थेभ्यः

एभ्यः

उकण् स्यात् ।

अभिलाषुकः,

प्रपातुकः,

उपपादुकः ॥ ४१ ॥

**भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुच-श्चाऽनः । ५ । २ । ४२ ।**

भूषार्थेभ्यः

क्रोधार्थेभ्यः

ज्वलादेः

लषादेश्च

शीलादि-सदर्थेभ्यः

अनः स्यात् ।

भूषणः,

क्रोधनः, कोपनः,

जवनः, सरणः,

गर्द्धनः, ज्वलनः,

शोचनः, अभिलषणः,

पतनः,

अर्थस्य पदनः ॥ ४२ ॥

**चल-शब्दार्थादकर्मकात् । ५ । २ ४३ ।**

चलार्थात्

शब्दार्थाच्च

धातोः

शीलादि-सदर्थात्
अकर्मकात्
अनः स्यात् ।
चलनः, रवणः ।
अकर्मकाद् इति किम् ?
पठिता विद्याम् ॥ ४३ ॥

## इ-ङितो व्यञ्जनाऽऽद्यन्तात् ।५।२।४४।

व्यञ्जनमादिः अन्तश्च यस्य
तस्माद्
उदितः ङितश्च
धातोः
शीलादि-सदर्थात्
अनः स्यात् ।
स्पर्द्धनः, वर्त्तनः ।
व्यञ्जनाद्यन्तात् इति किम् ?
एधिता, शयिता ।
अकर्मकाद् इत्येव ?
वसिता वस्त्रम् ॥ ४४ ॥

## न णिङ्-य-सूद-दीप-दीक्षः । ५ । २ । ४५ ।

णिङन्ताद्

यन्तात्

सूदादिभ्यश्च

शीलादि–सदर्थेभ्यः

अनः न स्यात् ।

भावयिता,

क्षमायिता,

सूदिता,

दीपिता, दीक्षिता ॥ ४५ ॥

## द्रम–क्रमो यङः । ५ । २ । ४६ ।

शीलादि–सदर्थाभ्यां

यङन्ताभ्यां

आभ्यां

अनः स्यात् ।

दन्द्रमणः, चङ्क्रमणः ॥ ४६ ॥

मुमुक्षूणां अध्येतॄणां ध्येयम्

मोह संस्काराणां अपसर्पण-

विधया ज्ञानस्य साफल्यम् ।

यजि-जपि-दंशि-वदादूकः ।५।२।४७।

एभ्यः

यङन्तेभ्यः

शीलादि-सदर्थेभ्यः

ऊकः स्यात् ।

यायजूकः, जञ्जपूकः,

दन्दशूकः, वावदूकः ॥४७॥

जागुः । ५ । २ । ४८ ।

शीलादि-सदर्थाद्

जागुः

ऊकः स्यात् ।

जागरूकः ॥ ४८ ॥

शमष्टकाद् घिनण् । ५ । २ । ४९ ।

शालादि-सदर्थेभ्यः

शमादिभ्यः

अष्टभ्यः

घिनण् स्यात् ।

शमी, दमी,

तमी, श्रमी,
भ्रमी, क्षमी,
प्रमादी, क्लमी ॥ ४९ ॥

**युज-भुज-भज-त्यज-रञ्ज-द्विष-दुष-द्रुह-दुहाऽभ्याहनः । ५ । २ । ५० ।**

शीलादि-सदर्थेभ्यः एभ्यः
घिनण् स्यात् ।
योगी, भोगी, भागी,
त्यागी, रागी, द्वेषी,
दोषी, द्रोहि, दोही,
अभ्याघाती ।
अकर्मकात् इत्येव ? गां दोग्धा ॥ ५० ॥

**आङः क्रीड-मुषः । ५ । २ । ५१ ।**

शीलादि-सदर्थाभ्यां
आभ्यां
आङ्पूर्वाभ्यां
घिनण् स्यात् ।
आक्रीडी, आमोषी ॥ ५१ ॥

**प्रात् च यम-यसः । ५ । २ । ५२ ।**

शीलादि–सदर्थाभ्यां
आङः प्राच्च पराभ्यां
आभ्यां
घिनण् स्यात् ।
प्रयामी, आयामी
प्रयासी, आयासी ॥ ५२ ॥

**मथ–लपः । ५ । २ । ५३ ।**

प्रात् पराभ्यां
आभ्यां
शीलादि–सदर्थाभ्यां
घिनण् स्यात् ।
प्रमाथी, प्रलापी ॥ ५३ ॥

**वेश्च द्रोः । ५ । २ । ५४ ।**

वेः प्राच्च परात्
द्रोः
शीलादि–सदर्थात्

घिनण् स्यात् ।

विद्रावी, प्रद्रावी ॥ ५४ ॥

**वि-परि-प्रात् सर्त्तेः । ५ । २ । ५५ ।**

एभ्यः परात्

शीलादि-सदर्थात्

सर्त्तेः

घिनण् स्यात्

विसारी, परिसारी, प्रसारी ॥५५॥

**समः पृचैप्-ज्वरेः । ५ । २ । ५६ ।**

शीलादि-सदर्थाभ्यां

समः पराभ्यां

पृणक्ति-ज्वरिभ्यां

घिनण् स्यात् ।

संपर्की, संज्वरी ॥ ५६ ॥

**सं-वेः सृजः । ५ । २ । ५७ ।**

शीलादि-सदर्थात्

सं-विभ्यां परात्

सृजेः

घिनण् स्यात् ।

संसर्गी विसर्गी ॥ ५७ ॥

## सं-परि-व्यनु-प्राद् वदः । ५ । २ । ५८ ।

शीलादि-सदर्थात्

एभ्यः पराद्

वदेः घिनण स्यात् ।

संवादी, परिवादी,

विवादी, अनुवादी,

प्रवादी ॥ ५८ ॥

## वेर्विच-कत्थ-स्रम्भ-कष-कस-लस-हनः । ५ । २ । ५९ ।

शीलादि-सदर्थेभ्यः विपूर्वेभ्यः

एभ्यः

घिनण् स्यात् ।

विवेकी, विकत्थी,

विस्रम्भी, विकाषी,

विकासी विलासी

विघाती ॥ ५९ ॥

व्य-पाऽभेर्लषः । ५ । १ । ६० ।

एभ्यः परात्
लषेः
शीलादि-सदर्थाद्
घिनण् स्यात् ।
विलाषी, अपलाषी, अभिलाषी ॥६०॥

सं-प्राद् वसात् । ५ । २ । ६१ ।

आभ्यां पराद्
वसतेः
शीलादि-सदर्थाद्
घिनण् स्यात् ।
संवासी, प्रवासी ॥ ६१ ॥

सम-त्य-पा-ऽभि व्यभेश्चरः । ५ । २ । ६२ ।

एभ्यः परात्
चरेः
शीलादि-सदर्थाद्
घिनण् स्यात् ।

सञ्चारी,

अतिचारी, अपचारी,

अभिचारी, व्यभिचारी ॥६२॥

## सम-नु-व्य-वाद् रुधः । ५ । २ । ६३ ।

एभ्यः परात्

शीलादि-सदर्थाद्

रुधः

घिनण् स्यात् ।

संरोधी, अनुरोधी,

विरोधी, अवरोधी ॥ ६३ ॥

## वेर्दहः । ५ । २ । ६४ ।

विपूर्वात्

शीलादि-सदर्थाद्

दहेः

घिनण् स्यात् ।

विदाही ॥ ६४ ॥

## परेर्देवि-मुहश्च । ५ । २ । ६५ ।

परिपूर्वाभ्यां
शीलादि-सदर्थाभ्यां
आभ्यां,
दहेश्च
घिनण् स्यात् ।
परिदेवी,
परिमोही,
परिदाही ॥ ६५ ॥

**क्षिप-रटः । ५ । २ । ६६ ।**

परिपूर्वाभ्यां
आभ्यां
शीलादि-सदर्थाभ्यां
घिनण् स्यात्
परिक्षेपी, परिराटी ॥ ६६ ॥

**वादेश्च णकः । ५ । २ । ६७ ।**

परिपूर्वात्
शीलादि-सदर्थाद्
वादयतेः

क्षिप-रटिभ्यां च णकः स्यात्। परिवादकः परिक्षेपकः, परिराटकः ॥ ६७ ॥

**निन्द-हिंस-क्लिश-खाद-विनाशि-व्याभाषा-ऽसूयाऽनेकस्वरात् । ५ । २ । ६८ ।**

एभ्यः शीलादि-सदर्थेभ्यः णकः स्यात् । निन्दकः, हिंसकः, क्लेशकः, खादकः, विनाशकः, व्याभाषकः, असूयकः, चकासकः ॥ ६८ ॥

**उपसर्गाद् देवृ-देवि-क्रुशः । ५ । २ । ६९ ।**

उपसर्गात् परेभ्यः शीलादि-सदर्थेभ्यः एभ्यः

णकः स्यात् ।

आदेवकः,

परिदेवकः,

आक्रोशकः ॥ ६९ ॥

वृङ्-भिक्षि-लुण्टि-जल्पि-कुट्टात् टाकः

। ५ । २ । ७० ।

एभ्यः

शीलादि–सदर्थेभ्यः

टाकः स्यात् ।

वराकी,

भिक्षाकः,

लुण्टाकः

जल्पाकः, कुट्टाकः ॥ ७० ॥

प्रात् सू–जोरिन् । ५ । २ । ७१ ।

आभ्यां

प्रात् पराभ्यां

शीलादि–सदर्थाभ्यां

इन् स्यात् ।

प्रसवी, प्रजवी ॥ ७१ ॥

## जि-इण्-दृ-क्षि-विश्रि-परिभू-वमाऽभ्यमाऽव्यथः । ५ । २ । ७२ ।

एभ्यः

शीलादि-सदर्थेभ्यः

इन् स्यात् ।

जयी,

अत्ययी, आदरी,

क्षयी,

विश्रयी, परिभवी,

वमी,

अभ्यमी, अव्यथी ॥ ७२ ॥

## सृ-घस्य-दो मरक् । ५ । २ । ७३ ।

एभ्यः

शीलादि-सदर्थेभ्यः

मरक् स्यात् ।

सृमरः, घस्मरः, अद्मरः ॥७३॥

भञ्जि-भासि-मिदो घुरः । ५ । २ । ७४ ।

एभ्यः

शीलादि-सदर्थेभ्यः

घुरः स्यात् ।

भङ्गुरम्, भासुरम्, मेदुरम् ॥ ७४ ॥

वेत्ति-च्छिद-भिदः कित् । ५ । २ । ७५ ।

एभ्यः

शीलादि-सदर्थेभ्यः

किद् घुरः स्यात् ।

विदुरः, छिदुरः, भिदुरः ॥ ७५ ॥

भियो रु-रुक-लुकम् । ५ । २ । ७६ ।

शीलादि-सदर्थाद्

भियः

कितः एते स्युः ।

भीरुः, भीरुकः, भीलुकः ॥ ७६ ॥

सृ-जि-इण्-नशः ट्वरप् । ५ । २ । ७७ ।

एभ्यः
शीलादि-सदर्थेभ्यः
क्वित् ट्वरप् स्यात् ।
सृत्वरी, जित्वरी,
इत्वरः, नश्वरः ॥ ७७ ॥

**गत्वरः । ५ । २ । ७८ ।**

गमेः
ट्वरप्
मश्च त्
निपात्यते ।
गत्वरी ॥ ७८ ॥

**स्मि-अजस्-हिंस-दीप-कम्प-कम-नमो रः । ५ । २ । ७९ ।**

एभ्यः
शीलादि-सदर्थेभ्यः
रः स्यात् ।
स्मेरम्, अजस्रम्,
हिंस्रः, दीप्रः,
कम्प्रः, कम्रः, नम्रः ॥ ७९ ॥

**तृषि-धृषि-स्वपो नजिङ् । ५ । २ । ८० ।**

एभ्यः
शीलादि–सदर्थेभ्यः
नजिङ् स्यात् ।
तृष्णक्, धृष्णक्, स्वप्नजौ ॥ ८० ॥

**स्थे-श-भास-पिस-कसो वरः । ५ । २ । ८१ ।**

एभ्यः
शीलादि–सदर्थेभ्यः
वरः स्यात् ।
स्थावरः, ईश्वरः,
भास्वरः, पेस्वरः,
विकस्वरः ॥ ८१ ॥

**यायावारः । ५ । २ । ८२ ।**

यातेः
यङन्तात्
शीलादि–सदर्थाद्
वरः स्यात् ।
यायावरः ॥ ८२ ॥

**दिद्युद्-ददृद्-जगद्-जुहू-वाक्-प्राट्-धी-श्री-द्रु-स्रू-जू-आयतस्तू-कटप्रू-परिव्राट्-भ्राजादयः क्विप् । ५ । २ । ८३ ।**

एते क्विबन्ताः शीलादौ सत्यर्थे निपात्यन्ते । दिद्युत्, ददृत्, जगत्, जुहूः वाक्, तत्त्वप्राट्, धीः, श्रीः, शतद्रूः, स्रूः, जूः, आयतस्तूः, कटप्रूः, परिव्राट्, विभ्राट्, भाः ॥ ८३ ॥

## शं-सं-स्वयं-वि-प्राद् भुवो डुः ।५।२।८४।

एभ्यः, पराद्
भुवः सदर्थाद्
डुः स्यात् ।
शम्भुः, सम्भुः,
स्वयम्भुः,
विभुः, प्रभुः ॥ ८४ ॥

## पुव इत्रो दैवते । ५ । २ । ८५ ।

सदर्थात् पुवः
दैवते कर्त्तरि
इत्रः स्यात् । पवित्रोऽर्हन् ॥८५॥

## ऋषि-नाम्नोः करणे । ५ । २ । ८६ ।

ऋषिसंज्ञयोः
सदर्थात् पुवः
करणे
इत्रः स्यात् ।
पवित्रोऽयमृषिः,
दर्भः पवित्रः ॥८६॥

लू-धू-सू-खनि-चर-सहाऽर्तेः । ५ । २ । ८७ ।

एभ्यः

सदर्थेभ्यः

करणे

इत्रः स्यात् ।

लवित्रम्, धवित्रम्.

सवित्रम्, खनित्रम्,

चरित्रम्, सहित्रम्,

अरित्रम् ॥ ८७ ॥

नी-दाव्-शसू-यु-युज-स्तु-तुद-सि-सिच-मिह-पत्-पा-नहः स्त्रट् ।५।२।८८।

एभ्यः

सदर्थेभ्यः

करणे

त्रट् स्यात् ।

नेत्रम्, दात्रम्, शस्त्रम्,

योत्रम्, योक्त्रम्,

स्तोत्रम्, तोत्त्रम्,

सेत्रम्, सेक्त्रम्,

मेढ्रम्

पत्त्रम्, पात्री,

नध्री ॥ ८८ ॥

## हल-क्रोडाऽऽस्ये पुवः । ५ । २ । ८९ ।

सदर्थात् पुवः

हल-क्रोडयोः

मुखे करणे

त्रट् स्यात् ।

पोत्रम् ॥ ८९ ॥

## दंशेस्त्रः । ५ । २ । ९० ।

सदर्थाद्

दंशेः

करणे

त्रः स्यात् ।

दंष्ट्रा ॥ ९० ॥

## धात्री । ५ । २ । ९१ ।

टृधेः धागो वा कर्म्मणि त्रट् वा स्यात् । धात्री ॥ ९१ ॥

## ज्ञानेच्छाऽर्चाऽर्थ-ञीत्-शील्यादिभ्यः क्तः । ५ । २ । ९२ ।

ज्ञाने-च्छा-ऽर्चाऽर्थेभ्यः ञीद्भ्यः शील्यादिभ्यश्च सदर्थेभ्यः क्तः स्यात् । राज्ञां ज्ञातः, राज्ञामिष्टः, राज्ञां-पूजितः, भिन्नः-शीलितः रक्षितः ॥ ९२ ॥

उणादयः । ५ । २ । ९३ ।

सदर्थाद् धातोः

उणादयः

बहुलं स्युः ।

कारुः, ईडुः ॥ ९३ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ
पञ्चमस्याध्यायस्य
द्वितीयः पादः समाप्तः

सद्गुरूपास्तिबलेन
परिकर्मितविवेकमतिमन्तरा
व्याकरणादिज्ञानं न हितावहम् ।

॥ श्री वर्धमानस्वामिने नमः ॥

पञ्चमाध्यायस्य

# तृतीयः पादः

## वर्त्स्यति गम्यादिः । ५ । ३ । १ ।

गम्यादयः
भविष्यति अर्थे
इन्नाद्यन्ताः
साधवः स्युः ।
गमी ग्रामम्, आगामी ॥ १ ॥

## वा हेतुसिद्धौ क्तः । ५ । ३ । २ ।

वर्त्स्यदर्थाद् धातोः
धात्वर्थहेतोः

सिद्धौ सत्यां
क्तो वा स्यात् ।
मेघश्चेद् वृष्टः-
सम्पन्नाः-सम्पत्स्यन्ते वा शालयः ॥ २ ॥

कषोऽनिटः । ५ । ३ । ३ ।

कषेः कृच्छ्र-गहनयोः
अनिड्धातोः
वत्स्यदर्थात्
क्तः स्यात् ।
कष्टम्,
कष्टाः दिशस्तमसा ।
अनिट इति किम् ?
कषिताः शत्रवः ॥ ३ ॥

भविष्यन्ती । ५ । ३ । ४ ।

वत्स्यदर्थाद् धातोः
भविष्यन्ती स्यात् ।
भोक्ष्यते ॥ ४ ॥

अनद्यतने श्वस्तनी । ५ । ३ । ५ ।

नास्ति अद्यतनो यत्र
तस्मिन्
वत्स्यत्यर्थे वर्त्तमानाद्
धातोः
श्वस्तनी स्यात् ।
कर्त्ता ।
अनद्यतन इति किम् ?
अद्य श्वो वा गमिष्यति ॥ ५ ॥

परिदेवने । ५ । ३ । ६ ।

अनुशोचने गम्ये
वत्स्यदर्थाद् धातोः
श्वस्तनी स्यात् ।
इयं तु कदा गन्ता,
या एवं पादौ निधत्ते ॥ ६ ॥

पुरा- यावतोर्वर्त्तमाना । ५ । ३ । ७ ।

अनयोः उपपदयोः
वत्स्यदर्थाद् धातोः
वर्त्तमाना स्यात् ।

पुरा भुङ्क्ते,
यावद् भुङ्क्ते ॥ ७ ॥

## कदा-कर्ह्योर्नवा । ५ । ३ । ८ ।

अनयोः
उपपदयोः
वत्स्यर्दर्थात्
धातोः
वर्त्तमाना वा स्यात् ।
कदा भुङ्क्ते,
कदा भोक्ष्यते,
कदा भोक्ता,
कर्हि भुङ्क्ते,
कर्हि भोक्ष्यते,
कर्हि भोक्ता ॥ ८ ॥

## किंवृत्ते लिप्सायाम् । ५ । ३ । ९ ।

विभक्ति-डतर-डतमान्तस्य
किमो वृत्तं=किंवृत्तम्

तस्मिन् उपपदे

प्रष्टुः लिप्सायां गम्यमानायां

वर्त्स्यदर्थाद् धातोः

वर्त्तमाना वा स्यात् ।

को भवतां भिक्षां-

ददाति-दास्यति, दाता वा ।

एवं-

कतरः-कतमः ।

किंवृत्त इति किम् ?

भिक्षां दास्यति ।

लिप्सायां इति किम् ?

कः पुरं यास्यति ? ॥ ९ ॥

**लिप्स्यसिद्धौ । ५ । ३ । १० ।**

लब्धुमिष्यमाणाद् भक्तादेः

सिद्धौ=फलावाप्तौ गम्यायां

वर्त्स्यदर्थाद्

धातोः

वर्त्तमाना वा स्यात् ।

यो भिक्षां-

ददाति–दास्यति–दाता वा
स स्वर्गलोकं–
याति–यास्यति–याता वा ॥१०॥

**पञ्चम्यर्थहेतौ । ५ । ३ । ११ ।**

पञ्चम्यर्थः प्रैषादिः,
तस्य हेतुः
उपाध्यायाऽऽगमनादिः ।
तस्मिन्नर्थे
वर्त्स्यति वर्त्तमानाद्
धातोः
वर्त्तमाना वा स्यात् ।
उपाध्यायश्चेद्–
आगच्छति–आगमिष्यति–आगन्ता वा,
अथ त्वं सूत्रमधीष्व ॥ ११ ॥

**सप्तमी चोर्ध्वमौहूर्त्तिके । ५ । ३ । १२ ।**

ऊर्ध्वमुहूर्त्ताद्भवः=ऊर्ध्वमौहूर्त्तिकः
तस्मिन्
पञ्चम्यर्थहेतौ

वत्स्यर्त्यर्थे वर्त्तमानाद्

धातोः

सप्तमी वर्त्तमाना च

वा स्यात् ।

ऊर्ध्वं मुहूर्त्तात्

उपाध्यायश्चेद्

आगच्छेत्–आगच्छति–आगन्ता वा,

अथ त्वं ।

तर्कमधीष्व ॥ १२ ॥

**क्रियायां क्रियार्थायां तुम् णकच् भविष्यन्ती । ५ । ३ । १३ ।**

यस्माद् धातोः

तुमादिविधिः

तद्वाच्या क्रिया

अर्थः=प्रयोजनं यस्याः

तस्यां क्रियायां

उपपदे

वत्स्यर्दर्थात्

धातोः

तुमादयः स्युः ।

कर्तुम्, कारकः, करिष्यामि

इति वा याति ।

क्रियायाम् इति किम् ?

भिक्षिष्ये इत्यस्य जटाः ।

क्रियार्थायाम् इति किम् ?

धावतस्ते पतिष्यति वासः ॥ १३ ॥

**कर्मणोऽण् । ५ । ३ । १४ ।**

क्रियार्थां क्रियार्थायां

उपपदे

कर्म्मणः परात्

वत्स्यदर्थात्

धातोः

अण् स्यात् ।

कुम्भकारो याति ॥ १४ ॥

**भाववचनाः । ५ । ३ । १५ ।**

भाववचनाः घञ्क्त्यादयः,

ते क्रियायां क्रियार्थायां

उपपदे

वर्त्स्यदर्थात्

धातोः स्युः ।

पाकाय पक्तये पचनाय वा याति ॥१६॥

## पद-रुज-विश-स्पृशो घञ् ।५।३।१६।

एभ्यः

घञ् स्यात ।

पादः, रोगः,

वेशः, स्पर्शः ॥ १६ ॥

## सर्त्तेः स्थिर-व्याधि-बल-मत्स्ये ।५।३।१७।

सर्त्तेः

एषु कर्तृषु

घञ् स्यात् ।

सारः स्थिरः,

अतीसारो व्याधिः,

सारो बलम्,

विसारो मत्स्यः ॥१७॥

**भावाऽकर्त्रोः । ५ । ३ । १८ ।**

भावे कर्तृवर्जे च कारके
धातोः
घञ् स्यात् ।
पाकः, आकारः,
दायो, दत्तः ॥ १८ ॥

**इङोऽपादाने तु टिद्वा ।५।३।१९।**

इङः
भावाकर्त्रोः
घञ् स्यात्,
स च
अपादाने वा टित् ।
अध्यायः, उपाध्यायी—उपाध्यायः ॥१९॥

**श्रो वायु-वर्ण-निवृत्ते ।५।३।२०।**

श्रः
भावा-कर्त्रोः
एषु अर्थेषु

घञ् स्यात् ।

शारो वायु-र्वर्णो वा,

नीशारः प्रावरणम् ॥ २० ॥

**निरभेः पू-ल्वः । ५ । ३ । २१ ।**

निरभिभ्यां

यथासङ्ख्यम्

आभ्यां भावा-कर्त्रोः

घञ् स्यात् ।

निष्पावः, अभिलावः ॥ २१ ॥

**रोरुपसर्गात् । ५ । ३ । २२ ।**

उपसर्गपूर्वाद् रौतेः

भावा-कर्त्रोः

घञ् स्यात् ।

संरावः ॥ २२ ॥

**भूश्र्य-दोऽल् । ५ । ३ । २३ ।**

एभ्यः उपसर्गपूर्वेभ्यः

भावा-कर्त्रोः

अल् स्यात् ।

प्रभवः, संश्रयः, विघसः ।
उपसर्गात् इत्येव ?
भावः, आयः, घासः ॥२३॥

**न्यादो नवा । ५ । ३ । २४ ।**

निपूर्वात् अदेः अलि घस्लभावः अतः दीर्घश्च वा स्यात् ।
न्यादः निघसः ॥ २४ ॥

**सं-नि-व्युपाद् यमः । ५ । ३ । २५ ।**

एभ्यः उपसर्गेभ्यः पराद् यमेः भावा-कर्त्रोः अल् वा स्यात् ।
संयमः-संयामः ।
नियमः-नियामः ।
वियमः-वियामः ।
उपयमः-उपयामः ॥ २५ ॥

**नेर्नद-गद-पठ-स्वन-क्वणः । ५ । ३ । २६ ।**

नेः उपसर्गात् परेभ्यः एभ्यः भावा-कर्त्रोः अल् वा स्यात् । निनदः,-निनादः । निगदः-निगादः । निपठः-निपाठः । निस्वनः-निस्वानः । निक्वणः-निक्वाणः ॥ २६ ॥

**वैणे क्वणः । ५ । ३ । २७ ।**

वीणायां भवो वैणः । तदर्थात् उपसर्गपूर्वात् क्वणेः भावा-कर्त्रोः अल् वा स्यात् । प्रक्वणः-प्रक्वाणो वीणायाः ।

वैण इति किम् ?

प्रक्वाणः शृङ्खलस्य ॥ २७ ॥

युवर्ण-वृ-दृ-वश-रण-गम्-ऋद्ग्रहः ।५।३।२८।

इवर्णोवर्णान्तेभ्यः

वादेः

ऋदन्तेभ्यो

ग्रहेश्च

भावा कर्त्रोः

अल् स्यात् ।

चयः, क्रयः, रवः,

लवः,

वरः,

आदरः,

वशः, रणः,

गमः, करः, ग्रहः ॥२८॥

वर्षादयः क्लीबे । ५ । ३ । २९ ।

एते

अलन्ताः

क्लीबे

यथादर्शनं

भावा-कर्त्रोः

निपात्यन्ते ।

वर्षम्, भयम् ॥ २९ ॥

**समुदोऽजः पशौ । ५ । ३ । ३० ।**

आभ्यां परात्

अजः पशुविषयाऽर्थवृत्तेः

भावा-कर्त्रोः

अल् स्यात् ।

समजः पशूनाम् ।

उदजः पशूनाम्

पशौ इति किम् ?

समाजो नृणाम् ॥ ३० ॥

**सृ-ग्लहः प्रजनाऽक्षे । ५ । ३ । ३१ ।**

आभ्यां

यथासङ्ख्यं

प्रजनाऽक्षविषयाऽर्थवृत्तिभ्यां

भावा-कर्त्रोः

अल् स्यात् ।

गवाम् उपसरः,

अक्षाणां ग्लहः ।

प्रजानाऽक्ष इति किम् ?

उपसारो भृत्यै राज्ञाम् ॥३१॥

**पणेर्माने । ५ । ३ । ३२ ।**

पणेः

मानार्थाद्

भावा-कर्त्रोः

अल् स्यात् ।

मूलकपणः ।

मान इति किम् ? पाणः ॥३२॥

**संमद-प्रमदौ हर्षे । ५ । ३ । ३३ ।**

एतौ

भावा-कर्त्रोः

हर्षेऽर्थे

अलतौ स्याताम् ।

संमदः,-प्रमदो वा स्त्रीणाम् ।

हर्ष इति किम् ?

संमादः, प्रमादः ॥ ३३ ॥

## हनोऽन्तर्घनाऽन्तर्घणौ देशे ।५।३।३४।

अन्तःपूर्वाद् हन्तेः

अल्,

घन-घणादेशौ च

निपात्येते,

देशेऽर्थे

भावा-कर्त्रोः ।

अन्तर्घनः-अन्तर्घणो वा देशः ।

अन्तर्घातोऽन्यः ॥ ३४ ॥

## प्रघण-प्रघाणौ गृहांशे ।५।३।३५।

प्र-पूर्वाद् हन्तेः

गृहांशेऽर्थे अल्

घण-घाणादेशौ च निपात्येते ।

प्रघणः-प्रघाणो वा द्वारालिन्दकः ।

प्रघातोऽन्यः ॥ ३५ ॥

निघो-द्घ-सङ्घो-ऽद्घना-पघनो-पघ्नं निमितप्रशस्त-गणाऽत्याधानाऽङ्गाऽऽसन्नम्

। ५ । ३ । ३६ ।

हन्तेः
निघादयः
यथासङ्ख्यं
निमिताद्यर्थेषु
कृतघत्वादयः
अलन्ताः
निपात्यन्ते ।
समन्ततो मितं=निमितम् ।
निघाः वृक्षाः,
उद्घः प्रशस्तः,
सङ्घः प्राणिसमूहः ।
अत्याधीयन्ते च्छेदनार्थं कुट्टनार्थं वा
काष्ठादीनि यत्र
तत् अत्याधानम् ।
उद्घनः,

अपघनः शरीरावयवः,
उपघ्न आसन्नः ॥ ३६ ॥

**मूर्त्ति-निचिताऽभ्रे घनः । ५ । ३ । ३७ ।**

हन्तेः
मूर्त्यादौ अर्थे
अल्,
घनादेशश्च
निपात्यते ।
मूर्तिः=काठिन्यम्
अभ्रस्य घनः ।
निचितं=निरन्तरम्-
घनाः केशाः ।
अभ्रं मेघः-घनः ॥ ३७ ॥

**व्ययो-द्रोः करणे । ५ । ३ । ३८ ।**

एभ्यः पराद्
हन्तेः
करणे
अल्

घनादेशश्च निपात्यते । त्रिघनः, अयोघनः, द्रुघनः ॥३८॥

**स्तम्बाद् घ्नश्च । ५ । ३ । ३९ ।**

स्तम्बात् परात् हन्तेः अल-घ्न-घनादेशौ च निपात्येते, करणे । स्तम्बघ्नो दण्डः, स्तम्बघनो यष्टिः ॥ ३९ ॥

**परेर्घः । ५ । ३ । ४० ।**

परिपूर्वात् हन्तेः अल्, घादेशश्च करणे निपात्यते । परिघोऽर्गला ॥ ४० ॥

## ह्वः समाह्वयाऽऽह्वयौ द्यूत-नाम्नोः । ५ । ३ । ४१ ।

द्यूते नाम्नि च अर्थे यथासङ्ख्यं समा-ऽऽङ्पूर्वाद् आङ्पूर्वाच्च ह्वो अल् ह्वयादेशश्च निपात्यते । समाह्वयः प्राणिद्यूतम्, आह्वयः संज्ञा ॥ ४१ ॥

## न्यभ्युप-वेर्वा श्चोत् । ५ । ३ । ४२ ।

एभ्यः पराद् ह्वः भावा-कर्त्रोः अल् स्यात्, तद्योगे वा उश्च ।

निहवः, अभिहवः
उपहवः, विहवः ॥ ४२ ॥

## आङो युद्धे । ५ । ३ । ४३ ।

आङः ह्वः
युद्धेऽर्थे
भावा-कर्त्रोः
अल् स्यात्,
वा उश्च ।
आहवः=युद्धम् ।
युद्ध इति किम् ? आह्वायः ॥४३॥

## आहावो निपानम् । ५ । ३ । ४४ ।

निपानं=पश्वादिपानार्थः जलाधारः ।
तस्मिन्
अर्थे
आङ् पूर्वाद् ह्वः
भावा-कर्त्रोः
अल्,

आह्वावादेशश्च निपात्यते । आह्वावो वीनाम् ॥ ४४ ॥

**भावेऽनुपसर्गात् । ५ । ३ । ४५ ।**

अनुपसर्गाद् भावे ह्वः अल् स्यात्, वा उश्च । हवः । भाव इति किम् ? व्याप्ये- ह्वायः । अनुपसर्गात् इति किम् ? आह्वायः ॥ ४५ ॥

**हनो वा वध् च । ५ । ३ । ४६ ।**

अनुपसर्गाद् हन्तेः भावे अल् वा स्यात्,

तद्योगे च हनो वध् ।

वधः, घातः ॥ ४६ ॥

**व्यध-जप-मद्भ्यः । ५ । ३ । ४७ ।**

एभ्यः

अनुपसर्गेभ्यः

भावाकर्त्रोः

अल् स्यात् ।

व्यधः जपः, मदः ॥ ४७ ॥

**नवा क्वण-यम-हस-स्वनः । ५ । ३ । ४८ ।**

अनुपसर्गेभ्यः एभ्यः

भावा-कर्त्रोः

अल् वा स्यात् ।

क्वणः-क्वाणः ।

यमः-यामः ।

हसः-हासः ।

स्वनः-स्वानः ॥ ४८ ॥

**आङो रु-प्लोः । ५ । ३ । ४९ ।**

आङः पराभ्यां

रु-प्लुभ्यां
भावा-कर्त्रोः
अल् वा स्यात् ।
आरवः—आरावः ।
आप्लवः—आप्लावः ॥ ४९ ॥

**वर्ष-विघ्नेऽवाद् ग्रहः । ५ । ३ । ५० ।**

अवपूर्वाद् ग्रहेः
वर्ष-विघ्नेऽर्थे
भावा-कर्त्रोः
अल् वा स्यात् ।
अवग्रहः—अवग्राहः ।
वर्ष-विघ्ने इति किम् ?
अवग्रहः अर्थस्य ॥ ५० ॥

**प्राद् रश्मि-तुलासूत्रे । ५ । ३ । ५१ ।**

प्र-पूर्वाद् ग्रहेः
रश्मौ तुलासूत्रे अर्थे
भावा-कर्त्रोः
अल् वा स्यात् ।
प्रग्रहः—प्रग्राहः ॥ ५१ ॥

**वृगो वस्त्रे । ५ । ३ । ५२ ।**

प्र-पूर्वाद् वृगः

वस्त्रविशेषे अर्थे

भावा-कर्त्रोः

अल् वा स्यात् ।

प्रवरः-प्रावारः ।

वस्त्र इति किम् ?

प्रवरो यतिः ॥ ५२ ॥

**उदः श्रेः । ५ । ३ । ५३ ।**

उत्पूर्वात् श्रेः

भावा-कर्त्रोः

अल् वा स्यात् ।

उच्छ्रयः-उच्छ्रायः ॥ ५३ ॥

**यु-पू-द्रोर्घञ् । ५ । ३ । ५४ ।**

उत्पूर्वेभ्यः

एभ्यः

भावा-कर्त्रोः

घञ् स्यात् ।

उद्यावः, उत्पावः, उद्द्रावः ॥ ५४ ॥

**ग्रहः । ५ । ३ । ५५ ।**

उत्पूर्वात्
ग्रहेः
भावा-कर्त्रोः
घञ् स्यात् ।
उद्ग्राहः ॥ ५५ ॥

**न्य-वात् शापे । ५ । १ । ५६ ।**

आभ्यां परात्
ग्रहेः
आक्रोशे गम्ये
भावा-कर्त्रोः
घञ् स्यात् ।
निग्राहः-अवग्राहो वा
ते जाल्म ? भूयात् ।
शाप इति किम् ?
निग्रहश्चौरस्य ॥ ५६ ॥

**प्रात् लिप्सायाम् । ५ । ३ । ५७ ।**

प्र-पूर्वाद् ग्रहेः
लिप्सायां गम्यायां
भाव-कर्त्रोः
घञ् स्यात् ।
पात्र-प्रग्राहेण चरति
पिण्ड-पातार्थी भिक्षुः ।
लिप्सायामिति किम् ?
स्रुवः प्रग्रहः शिष्यस्य ॥ ५७ ॥

**समो मुष्टौ । ५ । ३ । ५८ ।**

सम्पूर्वाद् ग्रहेः
मुष्टिविषये
धात्वर्थे
भाव-कर्त्रोः
घञ् स्यात् ।
संग्राहो मल्लस्य ।
मुष्टौ इति किम् ?
संग्रहः शिष्यस्य ॥ ५८ ॥

**यु-दु-द्रोः । ५ । ३ । ५९ ।**

सम्पूर्वेभ्यः एभ्यः
भावा-कर्त्रोः
घञ् स्यात् ।
संयावः, संदावः, संद्रावः. ॥ ५९ ॥

## नियश्चाऽनुपसर्गाद् वा । ५ । ३ । ६० ।

अनुपसर्गात् नियः
यु-दु-द्रोश्च
भावा-कर्त्रोः
घञ् वा स्यात् ।
नयः-नायः ।
यवः-यावः ।
दवः-दावः ।
द्रवः-द्रावः ।
अनुपसर्गात् इति किम् ?
प्रणयः ॥ ६० ॥

## वोदः । ५ । ३ । ६१ ।

उत्पूर्वात् नियः
भावा-कर्त्रोः

घञ् वा स्यात् ।

उन्नायः-उन्नयः ॥ ६१ ॥

**अवात् । ५ । ३ । ६२ ।**

अवपूर्वात् नियः

भावा-कर्त्रोः

घञ् स्यात् ।

अवनायः ॥ ६२ ॥

**परेर्द्यूते । ५ । ३ । ६३ ।**

परिपूर्वात् नियः

द्यूतविषयाऽर्थात्

भावा-कर्त्रोः

घञ् स्यात् ।

परिणायेन शारीन् हन्ति ।

द्यूत इति किम् ?

परिणयोऽस्याः ॥ ६३ ॥

**भुवोऽवज्ञाने वा । ५ । ३ । ६४ ।**

परिपूर्वाद् भुवः

अवज्ञानार्थाद्

भावा-कर्त्रोः

घञ् वा स्यात् ।

परिभावः-परिभवः ।

अवज्ञान इति किम् ?

समन्ताद् भूतिः=परिभवः ॥६४॥

**यज्ञे ग्रहः । ५ । ३ । ६५ ।**

परिपूर्वाद् ग्रहेः

यज्ञ विषये

भावा-कर्त्रोः

घञ् स्यात् ।

पूर्वपरिग्राहः ।

यज्ञ इति किम् ?

परिग्रहः अर्थस्य ॥ ६५ ॥

**संस्तोः । ५ । ३ । ६६ ।**

सम्-पूर्वात् स्तौतेः

भावा-कर्त्रोः

घञ् स्यात्,

यज्ञविषये ।

संस्तावः छन्दोगानाम् ॥ ६६ ॥

प्रात् स्नु-द्रु-स्तोः । ५ । ३ । ६७ ।

प्रात् परेभ्यः एभ्यः

भावा-कर्त्रोः

घञ् स्यात् ।

प्रस्नावः, प्रद्रावः, प्रस्तावः ॥ ६७ ॥

अ-यज्ञे स्त्रः । ५ । ३ । ६८ ।

प्र-पूर्वात् स्त्रः

भावा कर्त्रोः

घञ् स्यात् ,

न चेद् यज्ञविषयः ।

प्रस्तारः ।

अ-यज्ञ इति किम् ?

बर्हिष्प्रस्तरः ॥ ६८ ॥

वेरशब्दे प्रथने । ५ । ३ । ६९ ।

वेः परात् स्त्रः

अशब्द-विषये

विस्तीर्णत्वेऽर्थे

घञ् स्यात् ।

विस्तारः पटस्य ।

प्रथन इति किम् ?

तृणस्य विस्तरः ।

अ-शब्द इति किम् ?

वाक्यविस्तरः ॥ ६९ ॥

छन्दोनाम्नि । ५ । ३ । ७० ।

वि-पूर्वात् स्त्रः

गायत्र्यादिसंज्ञाविषये

भावा-कर्त्रोः

घञ् स्यात ।

विष्टारपङ्क्तिः ॥ ७० ॥

क्षु-श्रोः । ५ । ३ । ७१ ।

विपूर्वाभ्यां

आभ्यां

भावा-कर्त्रोः

घञ् स्यात् ।

विक्षावः, विश्रावः ॥ ७१ ॥

न्युदो ग्रः । ५ । ३ । ७२ ।

आभ्यां पराद् ग्रः

भावा-कर्त्रोः

घञ् स्यात् ।

निगारः, उद्गारः ॥ ७२ ॥

किरो धान्ये । ५ । ३ । ७३ ।

नि-उत् पूर्वात् किरतेः

धान्यविषयाऽर्थात्

भावा-कर्त्रोः

घञ् स्यात् ।

निकारः-उत्कारो धान्यस्य ।

धान्य इति किम् ?

फलनिकरः ॥ ७३ ॥

नेर्वुः । ५ । ३ । ७४ ।

नि-पूर्वाद्

वृणोतेः

वृणातेर्वा

धान्यविशेषेऽर्थे
भावा-कर्त्रोः
घञ्-स्यात् ।
नीवारा व्रीहयः ॥ ७४ ॥

इणोऽभ्रेषे । ५ । ३ । ७५ ।

स्थितेः अचलनं=अभ्रेषः,
तद्विषयार्थात्
निपूर्वात् इणः
भावा-कर्त्रोः
घञ् स्यात् ।
न्यायः ।
अभ्रेष इति किम् ?
न्ययं गतश्चौरः ॥ ७५ ॥

परेः क्रमे । ५ । ३ । ७६ ।

क्रमः-परिपाटिः,
तद्विषयार्थात्
परिपूर्वात् इणः

भावा-कर्त्रोः
घञ् स्यात ।
तव पर्यायो भोक्तुम् ।
क्रम इति किम् ?
पर्ययो गुरोः ॥ ७६ ॥

**व्युपात् शीङः । ५ । ३ । ७७ ।**

आभ्यां परात्
क्रमविषयार्थात्
शीङः
भावा-कर्त्रोः
घञ् स्यात् ।
तव राजविशायः,
मम राजोपशायः ।
क्रम इति किम्? विशयः ॥ ७७ ॥

**हस्तप्राप्ये चेर-स्तेये । ५ । ३ । ७८ ।**

हस्तेन प्राप्तुं शक्यं=हस्तप्राप्यम्,
तद्विषयात् चिगः
भावा-कर्त्रोः

घञ् स्यात्,
न चेत्
चेः अर्थः चौर्येण ।

पुष्पप्रचायः ।

हस्तप्राप्य इति किम् ?
पुष्पप्रचयं करोति वृक्षाग्रे ।

अ स्तेय इति किम् ?
स्तेयेन–
पुष्पप्रचयं करोति ॥ ७८ ॥

## चिति-देहाऽऽवासो-पसमाधाने कश्चाऽऽदेः

। ५ । ३ । ७९ ।

एषु अर्थेषु
चेः
भावा-कर्त्रोः
घञ् स्यात्,
तद्योगे च चेः आदेः कः ।
चीयत इति चितिः

यज्ञेऽग्निविशेषः

तदाधारो वा ।

आकायं अग्निं चिन्वीत,

काय: देहः,—

ऋषिनिकायः ।

उपसमाधानं—उपर्युपरि राशीकरणम्—

गोमयनिकायः ॥ ७९ ॥

सङ्घेऽनूर्ध्वे । ५ । ३ । ८० ।

नास्ति कुतश्चिद्

ऊर्ध्वं उपरि

किञ्चिद् यस्मिन्

सः

अनूर्ध्वः

तस्मिन् प्राणिसमुदायेऽर्थे

भावा-कर्त्रोः

घञ् स्यात,

तद्योगे

चेः आदेः कः ।

तार्किकनिकायः ।

सङ्घ इति किम् ?

सारसमुच्चयः ।

अनूर्ध्व इति किम् ?

शूकरनिचयः ॥ ८० ॥

**माने । ५ । ३ । ८१ ।**

माने गम्ये

धातोः

भावा-कर्त्रोः

घञ् स्यात्

एको निष्पावः समित्संग्राहः ।

मान इति किम् ? निश्चयः ॥८१॥

**स्थाऽऽदिभ्यः कः । ५ । ३ । ८२ ।**

एभ्यः

भावा-कर्त्रोः

कः स्यात् ।

आखूत्थो वर्त्तते,

प्रस्थः, प्रपा ॥ ८२ ॥

## ट्वितोऽथुः । ५ । ३ । ८३ ।

ट्वितः

धातोः

भावा-कर्त्रोः

अथुः स्यात् ।

वेपथुः ॥ ८३ ॥

## ड्वितस्त्रिमक् तत्कृतम् । ५ । ३ । ८४ ।

ड्वितः धातोः

भावा-कर्त्रोः

त्रिमक् स्यात्,

तेन धात्वर्थेन कृतं इत्यर्थे ।

पक्त्रिमम् ॥ ८४ ॥

## यजि-स्वपि-रक्षि-यति-प्रच्छो नः । ५ । ३ । ८५ ।

एभ्यः

भावा-कर्त्रोः

नः स्यात् ।

यज्ञः, स्वप्नः,
रक्ष्णः, यत्नः, प्रश्नः ॥ ८५ ॥

**विच्छो नङ् । ५ । ३ । ८६ ।**

विच्छेः
भावा-कर्त्रोः
नङ् स्यात् ।
विश्नः ॥ ८६ ॥

**उपसर्गाद् दः किः । ५ । ३ । ८७ ।**

उपसर्गपूर्वाद्
दासंज्ञाद् धातोः
भावा-कर्त्रोः
किः स्यात् ।
आदिः, निधिः ॥ ८७ ॥

**व्याप्यादाधारे । ५ । ३ । ८८ ।**

व्याप्यात् पराद्
दासंज्ञात् धातोः
आधारे
किः स्यात् ।
जलधिः ॥ ८८ ॥

**अन्तर्द्धिः । ५ । ३ । ८९ ।**

अन्तः पूर्वाद् धागः
भावा-कर्त्रोः
किः स्यात् ।
अन्तर्द्धिः ॥ ८९ ॥

**अभिव्याप्तौ भावेऽन-ञिन् ।५।३।९०।**

अभिव्याप्तौ गम्यायां
धातोः
भावे
अनञ्-इनौ स्याताम् ।
संरवणम् , सांराविणम् ।
अभिव्याप्तौ इति किम् ?
संरावः ॥ ९० ॥

**स्त्रियां क्तिः । ५ । ३ । ९१ ।**

धातोः
भावा-कर्त्रोः
स्त्रियां

क्तिः स्यात् ।
कृतिः ।
स्त्रियां इति किम् ? कारः ॥ ९१ ॥

श्वादिभ्यः ५ । ३ । ९२ ।

एभ्यः धातुभ्यः
भावा-कर्त्रोः
स्त्रियां
क्तिः स्यात् ।
श्रुतिः प्रतिश्रुत्,
संपत्तिः, संपत् ॥ ९२ ॥

समिणासुगः । ५ । ३ । ९३ ।

सम्पूर्वात् इणः,
आङ्पूर्वात् सुगश्च
भावा-कर्त्रोः
*स्त्रियां*
क्तिः स्यात् ।
समितिः, आसुतिः ॥ ९३ ॥

साति-हेति-यूति-जूति-ज्ञप्ति-कीर्त्तिः

। ५ । ३ । ९४ ।

एते

भावा—कर्त्रोः

क्त्यन्ताः

निपात्यन्ते ।

सातिः, हेतिः,

यूतिः, जूतिः,

ज्ञप्तिः, कीर्त्तिः ॥ ९४ ॥

गा-पा-पचो-भावे । ५ । ३ । ९५ ।

एभ्यः

भावे

स्त्रियां

क्तिः स्यात् ।

सङ्गीतिः, प्रपीतिः, पक्तिः ॥ ९५ ॥

स्थो वा । ५ । ३ । ९६ ।

स्थः

भावे

स्त्रियां

क्तिः
वा स्यात् ।
प्रस्थितिः, आस्था ॥ ९६ ॥

## आस्य-टि-व्रज्-यजः क्यप् ।५।३।९७।

एभ्यः
भावे
स्त्रियां
क्यप् स्यात् ।
आस्या, अट्या,
व्रज्या, इज्या ॥ ९७ ॥

## भृगो नाम्नि । ५ । ३ । ९८ ।

भृगः
भावे
स्त्रियां
संज्ञायां
क्यप् स्यात् ।
भृत्या ।
नाम्नि इति किम् ? भृतिः ॥ ९८ ॥

**समज-निपत्-निषद्-शीङ्-सुग्-विदि-चरि-मनीणः । ५ । ३ । ९९ ।**

एभ्यः भावा—कर्त्रोः स्त्रियां नाम्नि क्यप् स्यात् । समज्या, निपत्या, निषद्या, शय्या, सुत्या, विद्या, चर्या, मन्या, इत्या । नाम्नि इत्येव ? संवीतिः ॥ ९९ ॥

**कृगः श च वा । ५ । ३ । १०० ।**

कृगः भावा-कर्त्रोः स्त्रियां

शौ वा स्यात्,

क्यप् च ।

क्रिया, कृत्या, कृतिः ॥ १०० ॥

**मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धाऽन्तर्द्धा । ५ । ३ । १०१ ।**

एते

स्त्रियां

निपात्यन्ते ॥ १०१ ॥

**परेः सृ-चरेर्यः । ५ । ३ । १०२ ।**

परिपूर्वाभ्यां

आभ्यां

भावा-कर्त्रोः

स्त्रियां

यः स्यात् ।

परिसर्या, परिचर्या ॥१०२॥

**वाऽटाट्यात् । ५ । ३ । १०३ ।**

अटेः यङन्तात्

स्त्रियां

भावा-कर्त्रोः

यो वा स्यात् ।

अटाय्या, अटाटा ॥ १०३ ॥

**जागुरश्च । ५ । ३ । १०४ ।**

जागुः

स्त्रियां

भावा-कर्त्रोः

अः यश्च स्यात् ।

जागरा, जागर्या ॥ १०४ ॥

**शंसि-प्रत्ययात् । ५ । ३ । १०५ ।**

शंसेः

प्रत्ययान्तात् च

भावा-कर्त्रोः

स्त्रियां

अः स्यात् ।

प्रशंसा, गोपाया ॥ १०५ ॥

**क्तेटो गुरोर्व्यञ्जनात् । ५ । ३ । १०६ ।**

क्तस्य इट् यस्मात्

ततः

गुरुमतः

व्यञ्जनान्ताद् धातोः
भावा-कर्त्रोः
स्त्रियां
अः स्यात् ।
ईहा ।
स्फेटः इति किम् ?
स्रस्तिः ।
गुरोः इति किम्? स्फूर्त्तिः ।
व्यञ्जनात् इति किम् ?
संशीतिः ॥ १०६ ॥

## षितोऽङ् । ५ । ३ । १०७ ।

षितः धातोः
भावा-कर्त्रोः
स्त्रियां
अङ् स्यात्
पचा, जरा ॥ १०७ ॥

## भिदादयः । ५ । ३ । १०८ ।

एते
भावा-कर्त्रोः
स्त्रियां
अङन्ताः
यथालक्ष्यं
निपात्यन्ते ।
भिदा, छिदा ॥ १०८ ॥

**भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः ।५।३।१०९।**

एभ्यः
ण्यन्तेभ्यः
स्त्रियां
भावा-कर्त्रोः
अङ् स्यात् ।
भीषा, भूषा,
चिन्ता, पूजा,
कथा, कुम्बा,
चर्चा, स्पृहा,
तोला, दोला ॥ १०९ ॥

उपसर्गादातः । ५ । ३ । ११० ।

उपसर्गपूर्वाद्

आदन्तात्

स्त्रियां

भावा-कर्त्रोः

अङ् स्यात् ।

उपदा ।

उपसर्गात् इति किम् ? दत्तिः ॥ ११० ॥

णि-वेत्त्यास-श्रन्थ-घट्ट-वन्देरनः ।५।३।१११।

ण्यन्ताद्

वेत्त्यादिभ्यश्च

स्त्रियां

भावा-कर्त्रोः

अनः स्यात् ।

कारणा, वेदना,

आसना, श्रन्थना,

घट्टना, वन्दना ॥ १११ ॥

इषोऽनिच्छायाम् । ५ । ३ । ११२ ।

अनिच्छार्थात् इषेः
स्त्रियां
भाव-कर्त्रोः
अनः स्यात् ।
अन्वेषणा ।
अनिच्छायां इति किम्? इष्टिः ॥११२॥

## पर्यधेर्वा । ५ । ३ । ११३ ।

आभ्यां परात्
अनिच्छार्थाद् इषेः
भाव-कर्त्रोः
स्त्रियां
अनः वा स्यात् ।
पर्येषणा, परीष्टिः ।
अध्येषणा, अधीष्टिः ॥ ११३ ॥

## क्रुध्-संपदादिभ्यः क्विप् ।५।३।११४।

क्रुधादिभ्यः
अनुपसर्गेभ्यः,
पदादिभ्यश्च

समादिपूर्वेभ्यः
स्त्रियां
भावा-कर्त्रोः
क्विप् स्यात् ।
स्रुत्, युत्,
संपत्, विपत् ॥ ११४ ॥

**स्यादिभ्यो वा । ५ । ३ । ११५ ।**

एभ्यः
स्त्रियां
भावा-कर्त्रोः
क्विप् वा स्यात् ।
भीः, भीतिः
ह्रीः, ह्रीतिः ॥ ११५ ॥

**व्यतिहारेऽनीहादिभ्यो ञः ।५।३।११६।**

व्यतिहारविषयेभ्यः
ईहादिवर्जेभ्यः धातुभ्यः
स्त्रियां

अः स्यात् ,
बाहुलकाद् भावे ।
व्यावक्रोशी ।
अनीहादिभ्य इति किम् ?
व्यतीहा, व्यतीक्षा ॥ ११६ ॥

**नञोऽनिः शापे । ५ । ३ । ११७ ।**

नञः परात्
धातोः
शापे गम्ये
भावा-कर्त्रोः
स्त्रियां
अनिः स्यात् ।
अ-जननिस्ते भूयात् ।
शाप इति किम् ?
अ-कृतिः पटस्य ॥ ११७ ॥

**ग्ला-हा-ज्यः । ५ । ३ । ११८ ।**

एभ्यः
स्त्रियां
भावा-कर्त्रोः

अनिः स्यात् ।

ग्लानिः हानिः ज्यानिः ॥ ११८ ॥

प्रश्नाऽऽख्याने वेञ् । ५ । ३ । ११९ ।

प्रश्ने आख्याने च गम्ये

स्त्रियां

भावा-कर्त्रोः

धातोः

इञ् वा स्यात् ।

कां-

कारिं,

कारिकां,

क्रियां,

कृत्यां,

कृतिं वा-

अकार्षीः ?

सर्वां-

कारिं,

कारिकां,

क्रियां,

कृत्यां
कृतिं वा-
अकार्षम् ॥ ११९ ॥

**पर्याया-ऽर्ह-र्णोत्पत्तौ च णकः ।५।३।१२०।**

एषु अर्थेषु
प्रश्ना-ऽऽख्यानयोश्च
गम्ययोः
स्त्रियां
भावा-कर्त्रोः
धातोः
णकः स्यात् ।
भवतः आसिका,
भवतः शायिका,
अर्हसि त्वं इक्षुभक्षिकाम् ,
ऋणे-इक्षुभक्षिकां मे धारयसि ?
इक्षुभक्षिका उदपादि,
कां कारिकां-अकार्षीः ?
सर्वां कारिकां अकार्षम् ॥ १२० ॥

**नाम्नि पुंसि च । ५ । ३ । १२१ ।**

धातोः परः
भावा-कर्त्रोः
स्त्रियां
संज्ञायां
णकः स्यात्
यथालक्ष्यं
पुंसि च ।
प्रच्छर्दिका,
शालभञ्जिका,
अरोचकः ॥ १२१ ॥

**भावे । ५ । ३ । १२२ ।**

धात्वर्थनिर्देशे
स्त्रियां
धातोः
णकः स्यात् ।
शायिका ॥ १२२ ॥

**क्लीबे क्तः । ५ । ३ । १२३ ।**

नपुंसके

भावे

धातोः

क्तः स्यात् ।

हसितं तव ।

क्लीबे इति किम्? हासः ॥ १२३ ॥

**अनट् । ५ । ३ । १२४ ।**

क्लीबे

भावे अर्थे

धातोः

अनट् स्यात् ।

गमनम् ॥ १२४ ॥

**यत्कर्मस्पर्शात् कर्त्रङ्गसुखं ततः । ५ । ३ । १२५ ।**

येन कर्मणा संस्पृष्टस्य

कर्त्तुः अङ्गस्य सुखं स्यात्

ततः पराद् धातोः

क्लीबे

भावे

अनट् स्यात् ।

पयःपानं सुखम् ।

कर्म इति किम् ?

तूलिकाया उत्थानं सुखम् ।

स्पर्शात् इति किम् ?

अग्निकुण्डस्य उपासनं सुखम् ।

कर्तृ इति किम् ?

शिष्येण गुरोः स्थापनं सुखम् ।

अङ्ग इति किम् ?

पुत्रस्य परिष्वञ्जनं सुखम् ।

सुखं इति किम् ?

कण्टकानां मर्दनम् ।

नित्यसमासार्थम् इदम् ॥ १२५ ॥

**रम्यादिभ्यः कर्त्तरि । ५ । ३ । १२६ ।**

एभ्यः

कर्त्तरि

अनट् स्यात् ।

रमणी, कमनी ॥१२६॥

कारणम् । ५ । ३ । १२७ ।

क्रगः

कर्त्तरि

अनट् वृद्धिश्च स्यात् ।

कारणम् ॥ १२७ ॥

भुजि-पत्यादिभ्यः कर्माऽपादाने । ५ । ३ । १२८ ।

भुज्यादेः

कर्म्मणि,

पत्यादेश्च

अपादाने

अनट् स्यात् ।

भोजनम् , निरदनम् ,

प्रपतनः, अपादानम् ॥ १२८ ॥

करणाऽऽधारे । ५ । ३ । १२९ ।

अनयोः अर्थयोः

धातोः

अयट् स्याद् ।

एषणी, सक्तुधानी ॥ १२९ ॥

पुंनाम्नि घः । ५ । ३ । १३० ।

पुंसः

संज्ञायां गम्यायां

धातोः

करणाऽऽधारयोः

घः स्याद् ।

दन्तच्छदः, आकरः ।

पुम् इति किम् ? विचयनी ।

नाम्नि इति किम् ? प्रहरणो दण्डः ॥१३०॥

गोचर-संचर-वह-व्रज-व्यज-खलाऽऽपण-निगम-बक-भग-कषाऽऽकष-निकषम् । ५ । ३ । १३१ ।

एते

करणाऽऽधारयोः

पुन्नाम्नि

घान्ताः

निपात्यन्ते ।

गोचरः, संचरः,

वहः,

व्रजः, व्यजः, खलः,

आपणः, निगमः, बकः ।

बाहुलकात्–

कर्त्तरि–

भगः,

बाहुलकाद्–भगम् ,

कषः, आकषः, निकषः ॥ १३१ ॥

## व्यञ्जनाद् घञ् । ५ । ३ । १३२ ।

व्यञ्जनान्तात् धातोः

पुंनाम्नि

करणाऽऽधारयोः

घञ् स्यात् ।

वेदः ॥ १३२ ॥

## अवात् तॄ-स्तॄभ्याम् । ५ । ३ । १३३ ।

आभ्यां अवपूर्वाभ्यां

करणाऽऽधारयोः

पुन्नाम्नि

घञ् स्यात् ।

अवतारः, अवस्तारः ॥ १३३ ॥

न्याया-ऽवाया-ऽध्यायो-द्याव-संहारा-ऽवहारा-ऽऽधार-दार-जारम् ।५।३।१३४।

एते

पुं-नाम्नि

करणाऽऽधारयोः

घञन्ताः

निपात्यन्ते ।

न्यायः,

अवायः, अध्यायः,

उद्यावः,

संहारः, अवहारः,

आधारः,

दाराः, जारः ॥ १३४ ॥

उदङ्कोऽतोये । ५ । ३ । १३५ ।

उत् पूर्वात् अञ्चेः

पुं-नाम्नि

करणाऽऽधारयोः

घञ् स्यात्,

न चेत्

तोयविषयः धात्वर्थः ।

तैलोदङ्कः ।

अ-तोय इति किम्? उदकोदञ्चनः ॥१३५॥

**आनायो जालम् । ५ । ३ । १३६ ।**

आङ्पूर्वात् नियः

करणाऽऽधारे

पुन्नाम्नि

जाले अर्थे

घञ् स्यात् ।

आनायः मत्स्यानाम् ॥१३६॥

**खनो ड-डर-इक-इकवक-घं च ।५।३।१३७।**

खनेः

पुंनाम्नि

करणाऽऽधारयोः एते

घञ् च

स्युः ।

आखः, आखरः,

आखनिकः,

आखनिकवकः,

आखनः, आखानः ॥ १३७ ॥

## इ-कि-श्तिव् स्वरूपाऽर्थे ।५।३।१३८।

धातोः

स्वरूपे अर्थे च वाच्ये

एते

स्युः ।

भञ्जिः, कृधिः, वेत्तिः ।

अर्थे,–

यजेरङ्गानि,

भुजिः क्रियते,

पचतिः परिवर्त्तते ॥ १३८ ॥

## दुर्-स्वी-षतः कृच्छ्रा-ऽकृच्छ्रार्थात् खल् ।५।३।१३९।

कृच्छ्रवृत्तेः दुरः

अर्थात्,

अ-कृच्छ्रवृत्तिभ्यां च
सु-ईषद्भ्यां परात्
धातोः
खल् स्यात् ।
दुःशयम्, दुष्करः,
सुशयम्, सुकरः,
ईषच्छयम्, ईषत्करः ।
कृच्छ्रार्थे इति किम्?
ईषल्लभ्यं धनम् ॥ १३९ ॥

च्व्यर्थे कर्त्राप्याद् भू-कृगः ।५।३।१४०।

कृच्छ्रा-कृच्छ्रार्थेभ्यः
दुः-सु-ईषद्भ्यः
पराभ्यां
च्व्यर्थवृत्तिकर्तृ-कर्मवाचिभ्यां
यथासङ्ख्यं
भू-कृग्भ्यां
परः
खल् स्यात् ।
दुराढ्यंभवम्-स्वाढ्यंभवम्-ईषदाढ्यंभवं-
भवता,

दुराढ्यंकरः,—स्वाढ्यंकरः—ईषदाढ्यंकरः

चैत्रः त्वया ।

च्व्यर्थ इति किम् ?

दुराढ्येन भूयते ॥ १४० ॥

## शासू-युधि-दृशि-धृषि-मृषाऽऽतोऽनः

। ५ । ३ । १४१ ।

कृच्छ्रा-कृच्छ्रार्थ-दुः सु-ईषत् पूर्वेभ्यः

एभ्यः

आदन्तात् च धातोः

अनः स्यात् ।

दुःशासनः,

सुशासनः,

ईषच्छासनः,

एवं-

दुर्योधनः,

सुयोधनः,
ईषद्योधनः,
दुर्दर्शनः,
दुर्धर्षणः,
दुर्मर्षणः,
दुरुत्थानम् ॥ १४१ ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ
पञ्चमस्याध्यायस्य
तृतीयः पादः समाप्तः

आगमाध्येतॄणां मुनीनां हितावह
शब्दसौष्ठव-तात्पर्यग्रह-भाषाशुद्धि-
प्रभृतिसम्प्रापनाय व्याकरणाध्ययनं
सद्गुरुनिश्रया समुपयोगि ॥

॥ श्री वर्धमानस्वामिने नमः ॥

पञ्चमाध्यायस्य

# चतुर्थः पादः

सत्सामीप्ये सद्वत् वा । ५ । ४ । १ ।

समीपमेव सामीप्यम् ।

वर्त्तमानस्य सामीप्ये

भूते भविष्यति च अर्थे वर्त्तमानात् धातोः

वर्त्तमाना इव प्रत्ययाः

वा स्युः ।

कदा चैत्र ! आगतोऽसि ?

अयमागच्छामि—आगच्छन्तमेव मां विद्धि ।

पक्षे,—

अयमागमम् ,—

एषोऽस्मि आगतः,
कदा चैत्र ! गमिष्यसि ?
एष गच्छामि,-
गच्छन्तमेव मां विद्धि ।
पक्षे,-
एष गमिष्यामि,
गन्ताऽस्मि,-
गमिष्यन्तमेव मां विद्धि ॥ १ ॥

भूतवत् चाऽऽशंस्ये वा । ५ । ४ । २ ।

अनागतस्य अर्थस्य
प्राप्तुमिच्छा=
आशंसा,
तद्विषयः=आशंस्यः ।
तदर्थात् धातोः
भूतवत् सद्वच्च
प्रत्ययाः वा स्युः ।
उपाध्यायः चेत् आगमत्
एते तर्कम् अध्यगीष्महि,

उपाध्यायश्चेदागच्छति

एते तर्कमधीमहे ।

पक्षे,-

उपाध्यायश्चेत्

आगमिष्यति—आगन्ता वा,

एते तर्कम् अध्येष्यामहे-अध्येतास्महे वा,

आशंस्य इति किम् ?

उपाध्यायः आगमिष्यति,

तर्कमध्येष्यते मैत्रः ॥ २ ॥

## क्षिप्राऽऽशंसाऽर्थयोर्भविष्यन्ती-सप्तम्यौ

। ५ । ४ । ३ ।

क्षिप्रार्था-ऽऽशंसार्थयोः

उपपदयोः

आशंस्यार्थाद् धातोः

यथासङ्ख्यं

भविष्यन्ती-सप्तम्यौ स्याताम् ।

उपाध्यायश्चेत्-

आगच्छति-आगमत् ,

आगमिष्यति-आगन्ता

क्षिप्रं आशु एते सिद्धान्तं अध्येष्यामहे,

उपाध्यायः चेत्

आगच्छति-आगमत् ,

आगमिष्यति-आगन्ता वा,

आशंसे-संभावये

युक्तोऽधीयीय ॥ ३ ॥

**सम्भावने सिद्धवत् । ५ । ४ । ४ ।**

हेतोः शक्तिश्रद्धानं=

सम्भावनम् ,

तस्मिन् विषये

असिद्धेऽपि वस्तुनि

सिद्धवत् प्रत्ययाः स्युः ।

समये चेत्

प्रयत्नोऽभूद्

उदभूवन् विभूतयः ॥ ४ ॥

नाऽनद्यतनः प्रबन्धाऽऽसत्त्योः ।५।४।५।

धात्वर्थस्य

प्रबन्धे आसत्तौ च गम्यायां

धातोः

अनद्यतनविहितः प्रत्ययः

न स्यात् ।

यावज्जीवं भृशं अन्नं अदात्-दास्यति वा,

या इयं पौर्णमासी अतिक्रान्ता

एतस्यां जिनमहः प्रावर्त्तिष्ट,

या इयं पौर्णमासी आगामिनी

एतस्यां जिनमहः प्रवर्त्तिष्यते ।।५।।

एष्यत्यवधौ देशस्याऽर्वाग्भागे ।५।४।६।

देशस्य योऽवधिः

तद्वाचिनि उपपदे

देशस्यैव अर्वाग्भागे

यः एष्यन् अर्थः

तद्वृत्तेः

धातोः

अनद्यतनविहितः प्रत्ययो न स्यात्।

योऽयमध्वा गन्तव्यः

आ शत्रुञ्जयात्,

तस्य यत् अवरं वलभ्याः

तत्र द्विः ओदनं भोक्ष्यामहे ।

एष्यति इति किम् ?

योऽयमध्वा अतिक्रान्तः

आ शत्रुञ्जयात्,

तस्य यत् अवरं वलभ्याः

तत्र युक्ताद् द्विः अध्यैमहि ।

अवधौ इति किम् ?

योऽयमध्वा निरवधिको गन्तव्यः,

तस्य यत् अवरं वलभ्या

तत्र द्विरोदनं भोक्तास्महे ।

अर्वाग्भाग इति किम् ?

योऽयमध्वा गन्तव्यः

आ शत्रुञ्जयात्,

तस्य यत् परं वलभ्याः

तत्र द्विः ओदनं भोक्तास्महे ॥ ६ ॥

**कालस्याऽनहोरात्राणाम् । ५ । ४ । ७ ।**

कालस्य योऽवधिः
तद्वाचिनि उपपदे
कालस्यैव अर्वाग्भागे
यः एष्यन् अर्थः
तद्वृत्तेः धातोः
अनद्यतनविहितः प्रत्ययः
न स्यात्,
न चेत् सः अर्वाग्भागः
अहोरात्राणाम् ।
योऽयमागामी संवत्सरः,
तस्य यदवरं आग्रहायण्याः
तत्र जिनपूजां करिष्यामः ।
अनहोरात्राणामिति किम् ?
योऽयं मास आगामी,
तस्य योऽवरः पञ्चदशरात्रः
तत्र युक्तादृद्भिः अध्येतास्महे ॥७॥

**परे वा । ५ । ४ । ८ ।**

कालस्य योऽवधिः तद्वाचिनि उपपदे,
कालस्यैव परे भागेऽनहोरात्रसम्बन्धिनि

य एष्यन् अर्थः
तद्वृत्तेः धातोः
अनद्यतनविहितः प्रत्ययो
वा न स्यात् ।
आगामिनो वत्सरस्य आग्रहायण्याः परस्ताद्
द्विः सूत्रं अध्येष्यामहे—अध्येतास्महे वा ॥ ८ ॥

**सप्तम्यर्थे क्रियाऽतिपत्तौ क्रियाऽति-पत्तिः**

। ५ । ४ । ९ ।

सप्तम्या अर्थः-निमित्तं=हेतु—फलकथनादिसामग्री
कुतश्चिद् वैगुण्यात्
क्रियाया अनभिनिर्वृत्तौ
क्रियातिपत्तौ सत्यां
एष्यदर्थाद् धातोः
सप्तम्यर्थे
क्रियाऽतिपत्तिः स्यात् ।
दक्षिणेन चेद् अयास्यत्
न शकटं पर्याभविष्यत् ॥ ९ ॥

**भूते । ५ । ४ । १० ।**

भूतार्थात् धातोः

क्रियाऽतिपत्तौ सत्यां

सप्तम्यर्थे क्रियाऽतिपत्तिः स्यात् ।

दृष्टो मया तव पुत्रः अन्नार्थी चङ्क्रम्यमाणः,

अपरश्च अतिथ्यर्थी.

यदि स तेन दृष्टोऽभविष्यत्

उत अभोक्ष्यत-अप्यभोक्ष्यत ॥१०॥

**वोतात् प्राक् । ५ । ४ । ११ ।**

" सप्तम्युताऽप्योर्बाढे " (५-४-२१)

इत्यत्र

यदुत-शब्दसंकीर्त्तनं

ततः प्राक्

सप्तम्यर्थे-क्रियातिपत्तौ

भूतार्थात् धातोः

क्रियाऽतिपत्तिः वा स्यात् ।

कथं नाम संयतः सन्

अनागाढे तत्रभवान्

आधाय-कृतं असेविष्यत,

धिग् गर्हामहे ।

पक्षे,–

कथं सेवेत ? कथं सेवते ?

धिग् गर्हामहे ।

उतात् प्रागिति किम् ?

कालो यत् अभोक्ष्यत भवान् ॥११॥

## क्षेपेऽपि-जात्वोर्वर्त्तमाना । ५ । ४ । १२ ।

क्षेपे गम्ये

अपि–जात्वोः उपपदयोः

धातोः

वर्त्तमाना स्यात् ।

अपि तत्र भवान्

जन्तून् हिनस्ति ?

जातु तत्र भवान्=

भूतानि हिनस्ति ?

धिग् गर्हामहे ॥ १२ ॥

## कथमि सप्तमी च वा । ५ । ४ । १३ ।

कथं शब्दे उपपदे

क्षेपे गम्ये

धातोः सप्तमी-वर्त्तमाना च वा स्यात् । कथं नाम तत्र भवान् मांसं भक्षयेत् ?-भक्षयति वा ?-गर्हामहे, अन्याय्यमेतत् ।

पक्षे,-

अबभक्षत्-अभक्षयत्, भक्षयाञ्चकार, भक्षयिता,-भक्षयिष्यति । अत्र सप्तमी निमित्तमस्ति इति भूते क्रियाऽतिपतने वा क्रियाऽतिपत्तिः । कथं नाम तत्रभवान् मांसमभक्षयिष्यत् ? । पक्षे-यथाप्राप्तम् । भविष्यति तु क्रियातिपतने नित्यमेव सा ।

कथं नाम तत्रभवान् मांसमभक्षयिष्यत् ? ॥१३॥

## किंवृत्ते सप्तमी-भविष्यन्त्यौ ।५।४।१४।

किंवृत्ते
उपपदे
क्षेपे गम्ये
धातोः
सप्तमी-भविष्यन्त्यौ स्याताम् ।
किं तत्रभवान् अनृतं ब्रूयाद्-वक्ष्यति वा ?,
को नाम-
कतरो नाम-
कतमो नाम-
यस्मै
तत्रभवान्
अनृतं ब्रूयाद्-वक्ष्यति वा ? ॥१४॥

## अ-श्रद्धाऽ-मर्षेऽन्यत्रापि । ५ । ४ । १५ ।

अ-किंवृत्ते किंवृत्ते च उपपदे
अ-श्रद्धा-ऽमर्षयोः
गम्ययोः
सप्तमी-भविष्यन्त्यौ स्याताम् ।
न श्रद्दधे !
न सम्भावयामि

तत्रभवान् नाम

अदत्तं गृह्णीयात्-ग्रहीष्यति वा,

न श्रद्दधे

किं तत्रभवान्

अदत्तं आददीत-आदास्यते वा ?,

न मर्षयामि ? न क्षमे

तत्रभवान् नाम अदत्तं गृह्णीयात्-ग्रहीष्यति वा ॥१५॥

## किं-किलाऽस्त्यर्थयोर्भविष्यन्ती ।५।४।१६।

किंकिले-अस्त्यर्थे

च उपपदे-ऽश्रद्धा-ऽमर्षयोः

गम्ययोः

भविष्यन्ती स्यात्

न श्रद्दधे,

न मर्षयामि

किं-किल नाम तत्रभवान्-

परदारान् उपकरिष्यते,

न श्रद्दधे,

न मर्षयामि,

अस्ति नाम

भवति नाम

तत्रभवान्

परदारान् उपकरिष्यते ॥ १६ ॥

## जातु-यद्-यदा-यदौ सप्तमी ।५।४।१७।

एषु उपपदेषु

अ-श्रद्धा-ऽमर्षयोः

सप्तमी स्यात् ।

न श्रद्दधे,

न क्षमे,

जातु तत्रभवान्

सुरां पिबेत् ,

एवं

यत् ,

यदा,

यदि-

सुरां पिबेत् ॥ १७ ॥

## क्षेपे च यच्च-यत्रे । ५ । ४ । १८ ।

यच्च–यत्रयोः
उपपद्याः
क्षेपे अश्रद्धाऽमर्षयोश्च गम्ययोः
सप्तमी स्यात् ।
धिग् गर्हामहे
यच्च यत्र वा तत्रभवान्
अस्मान् आक्रोशेत् ,
न श्रद्दधे,
न क्षमे
यच्च यत्र वा
तत्रभवान्
परिवादं कथयेत् ॥ १८ ॥

चित्रे । ५ । ४ । १९ ।

आश्चर्ये गम्ये
यच्च–यत्रयोः
उपपदयोः

सप्तमी स्यात् ।
चित्रमाश्चर्यं
यच्च-यत्र वा
तत्रभवान्
अकल्प्यं सेवेत ॥ १९ ॥

## शेषे भविष्यन्ती अ-यदौ । ५ । ४ । २० ।

यच्च-यत्राभ्यां
अन्यस्मिन् उपपदे
चित्रे गम्ये
भविष्यन्ती स्यात्,
न तु यदिशब्दे
चित्रमाश्चर्यं अन्धो नाम
गिरिमारोक्ष्यति ।
शेष इति किम् ?
यच्च-यत्रयोः
पूर्वेण सप्तम्येव ।
अ-यदौ इति किम् ?
चित्रं यदि स भुञ्जीत ॥ २० ॥

## सप्तम्युताऽप्योर्बाढे । ५ । ४ । २१ ।

बाढार्थयोः
उता-ऽप्योः
उपपदयोः
सप्तमी स्यात् ।
उत अपि वा कुर्यात् ।
बाढे इति किम् ?
उत दण्डः पतिष्यति,
अपि धास्यति द्वारम् ॥ २१ ॥

**सम्भावनेऽलमर्थे तदर्थानुक्तौ ।५।४।२२।**

अलमः अर्थे शक्तौ यत् सम्भावनं,
तस्मिन् गम्ये
अलमर्थार्थस्य
अ-प्रयोगे
सप्तमी स्यात् ।
अपि मासं उपवसेत् ।
अलमर्थ इति किम् ?
निर्देशस्थायी मे
चैत्रः
प्रायेण यास्यति ।

तदर्थानुक्तौ इति किम् ?
शक्तश्चैत्रो धर्मं करिष्यति ॥ २२ ॥

**अ-यदि श्रद्धा-धातौ नवा ।५।४।२३।**

संभावनाऽर्थे धातौ
उपपदे
अलमर्थविषये
संभावने गम्ये
सप्तमी वा स्यात्,
न तु यच्छब्दे ।
श्रद्दधे-संभावयामि
भुञ्जीत भवान् ।
पक्षे-भोक्ष्यते-
अभुङ्क्त-अभुक्त वा ।
अयदि इति किम् ?
सम्भावयामि यद्
भुञ्जीत भवान् ।
श्रद्धाधातौ इति किम् ?
अपि शिरसा
पर्वतं भिन्द्यात् ॥ २३ ॥

**सती-च्छाऽर्थात् । ५ । ४ । २४ ।**

सदर्थात्
इच्छार्थात्
सप्तमी वा स्यात् ।
इच्छेत्-इच्छति ॥ २४ ॥

**वर्त्स्यति हेतु-फले । ५ । ४ । २५ ।**

हेतुभूते-फलभूते च
वर्त्स्यत्यर्थे
वर्त्तमानात्
सप्तमी वा स्यात् ।
यदि गुरूनुपासीत
शास्त्रान्तं गच्छेत्,
यदि गुरूनुपासिष्यते
शास्त्रान्तं सङ्गमिष्यते ।
वर्त्स्यति इति किम् ?
दक्षिणेन चेद् याति
न शकटं पर्याभवति ॥ २५ ॥

**कामोक्तौ अकच्चिति। ५ । ४ । २६ ।**

इच्छा-प्रवेदनगम्ये सप्तमी स्यात्, न तु कच्चित्प्रयोगे । कामो मे भुञ्जीत भवान् । अ-कच्चिति इति किम् ? कच्चित् ! जीवति मे माता ? ॥ २६ ॥

**इच्छाऽर्थे सप्तमी-पञ्चम्यौ ।५।४।२७।**

इच्छाऽर्थे धातौ उपपदे कामोक्तौ गम्यायां सप्तमी-पञ्चम्यौ स्याताम् । इच्छामि भुञ्जीत-भुङ्क्तां वा भवान् ॥ २७ ॥

**विधि-निमन्त्रणाऽऽमन्त्रणाऽधीष्ट-सम्प्रश्न-प्रार्थने । ५ । ४ । २८ ।**

विध्यादिविशिष्टेषु
कर्तृ-कर्मभावेषु
प्रत्ययार्थेषु
सप्तमी-पञ्चम्यौ स्याताम् ।
विधिः=
क्रियायां प्रेरणा-
कटं कुर्यात्-करोतु भवान् ।
प्रेरणायामेव यस्यां प्रत्याख्याने
प्रत्यवायः
तत् निमन्त्रणम् ।
द्विसन्ध्यमावश्यकं कुर्यात्-करोतु ।
यत्र प्रेरणायामेव
प्रत्याख्याने कामचारः
तत् आमन्त्रणम् ।
इहासीत-आस्ताम् ।
प्रेरणैव सत्कारपूर्विका=अधीष्टम् ।
व्रतं रक्षेत्-रक्षतु ।
संप्रश्नः=संप्रधारणा ।
किं नु खलु भो !
व्याकरणं अधीयीय-अध्ययै,

उत सिद्धान्तमधीयीय—अध्ययै ? ।

प्रार्थनं=याञ्चा ।

प्रार्थना मे तर्कमधीयीय—अध्ययै ॥२८॥

**प्रैषाऽनुज्ञाऽवसरे कृत्य-पञ्चम्यौ ।५।४।२९।**

प्रैषादिविशिष्टे

कर्त्रादौ अर्थे

कृत्याः पञ्चमी च स्युः ।

न्यत्कारपूर्विका प्रेरणा=प्रैषः ।

भवता खलु कटः कार्यः,

भवान् कटं करोतु,

भवान् हि प्रेषितः अनुज्ञातः,

भवतोऽवसरः कटकरणे ॥ २९ ॥

**सप्तमी चोर्ध्वमौहूर्त्तिके ।५।४।३०।**

प्रैषादिषु गम्येषु

ऊर्ध्वमौहूर्त्तिकेऽर्थे

वर्त्तमानात्

सप्तमी कृत्य-पञ्चम्यौ च स्युः ।
ऊर्ध्वं मुहूर्त्तात् कटं कुर्यात् भवान्,
भवता कटः कार्यः,
कटं करोतु भवान्,
भवान् हि प्रेषितोऽनुज्ञातः,
भवतोऽवसरः कटकरणे ॥३०॥

## स्मे पञ्चमी । ५ । ४ । ३१ ।

स्मे उपपदे
प्रैषादिषु गम्येषु
ऊर्ध्वमौहूर्त्तिकार्थाद् धातोः
पञ्चमी स्यात् ।
ऊर्ध्वं मुहूर्त्ताद्
भवान् कटं करोतु स्म,
भवान् हि प्रेषितोऽनुज्ञातः,
भवतोऽवसरः कटकरणे ॥ ३१ ॥

## अधीष्टौ । ५ । ४ । ३२ ।

स्मे उपपदे
अध्येषणायां गम्यायं

पञ्चमी स्यात् ।

अङ्ग ! स्म विद्वन् ! अणुव्रतानि रक्ष ॥३२॥

## काल-वेला-समये तुम् वाऽवसरे ।५।४।३३।

एषु

उपपदे

अवसरे गम्ये

धातोः

तुम् वा स्यात् ।

कालो भोक्तुम्,

वेला भोक्तुम्,

समयो भोक्तुम् ।

पक्षे–

कालो भोक्तव्यस्य ।

अवसर इति किम् ?

कालः पचति भूतानि ॥३३॥

## सप्तमी यदि । ५ । ४ । ३४ ।

यत्शब्दप्रयोगे
कालादिषु उपपदेषु
सप्तमी स्यात् ।
कालो यत्
अधीयीत भवान् ,
वेला यद्
भुञ्जीत,
समयो यत्
शयीत ॥ ३४ ॥

शक्तार्हे कृत्याश्च । ५ । ४ । ३५ ।

शक्ते अर्हे च कर्त्तरि गम्ये
कृत्याः सप्तमी च
स्युः ।
भवता खलु भारो वाह्यः-उह्येत,
भवान् भारं वहेत् ,
भवान् हि शक्तः,
भवता खलु कन्या वोढव्या–उह्येत,
भवान् खलु कन्यां वहेत् ,
भवान् एतदर्हति ॥ ३५ ॥

**णिन् चावश्यकाधमर्ण्ये ।५।४।३६।**

अनयोः
गम्ययोः
कर्त्तरि वाच्ये
णिन्-कृत्याश्च
स्युः
अवश्यंकारी, अवश्यंहारी,
अवश्यं गेयो गीतस्य,
शतं दायी,
गेयो गाथानाम् ॥ ३६ ॥

**अर्हे तृच् । ५ । ४ । ३७ ।**

अर्हे कर्त्तरि वाच्ये
तृच् स्यात् ।
भवान् कन्याया वोढा ॥३७॥

**आशिष्याशीः-पञ्चम्यौ । ५ । ४ । ३८ ।**

आशीर्विशिष्टार्थात्
आशीः-पञ्चम्यौ स्याताम् ।
जीयात्-जयतात् ।

आशिषि इति किम् ?

चिरं जीवति मैत्रः ॥ ३८ ॥

**माङ्यद्यतनी । ५ । ४ । ३९ ।**

माङि उपपदे

अद्यतनी स्यात् ।

मा कार्षीत् ॥ ३९ ॥

**स-स्मे ह्यस्तनी च । ५ । ४ । ४० ।**

स्मयुक्ते माङि उपपदे

ह्यस्तनी अद्यतनी च स्यात् ।

मा स्म करोत्-मा स्म कार्षीत् ॥४०॥

**धातोः सम्बन्धे प्रत्ययाः । ५ । ४ । ४१ ।**

धात्वर्थानां संबन्धे

विशेषण-विशेष्यभावे सति

अ-यथाकालमपि प्रत्ययाः

साधवः स्युः ।

विश्वदृश्वा

अस्य पुत्रो भविता,

भावि कृत्यमासीत् ,

गोमान् आसीत् ॥ ४१ ॥

**भृशाऽऽभीक्ष्ण्ये हि-स्वौ यथाविधि त-ध्वमौ च तद्युष्मदि । ५ । ४ । ४२ ।**

भृशा-ऽऽभीक्ष्ण्ये

सर्वकाले अर्थे वर्त्तमानाद्

धातोः

सर्वविभक्तिवचनविषये

हि-स्वौ स्याताम् ,

यथाविधि-

धातोः संबन्धे,

यत एव धातोः

यस्मिन्नेव कारके हि-स्वौ

तस्यैव धातोः

तत्कारकविशिष्टस्यैव सम्बन्धे

अनुप्रयोगे सति,

तथा पञ्चम्या एव त-ध्वमौ,

तयोः सम्बन्धिनि बहुत्वविशिष्टे
युष्मद्यर्थे हि-स्वौ च स्यातां,
यथाविधि धातोः सम्बन्धे ।
लुनीहि लुनीहि इत्येव अयं लुनाति
इत्यादि,
अधीष्व अधीष्व इत्येव
अयं अधीते इत्यादि,
लुनीत लुनीत इत्येवं
यूयं लुनीथ,
लुनीहि, लुनीहि, इत्येवं
यूयं लुनीथ
अधीध्वम् अधीध्वम् इत्येवं
यूयमधीध्वे,
अधीष्व अधीष्व इत्येवं
यूयं अधीध्वे ।
यथाविधि इति किम्?
लुनीहि लुनीहि इत्येव अयं-
लुनाति-
छिनत्ति-
लूयते वा-

इति
धातोः संबन्धे
मा भूत् ॥ ४२ ॥

## प्रचये नवा सामान्यार्थस्य । ५ । ४ । ४३ ।

धात्वर्थानां
समुच्चये गम्ये
सामान्यार्थस्य धातोः
सम्बन्धे सति
धातोः परौ
हि–स्वौ
त–ध्वमौ च
तद्युष्मदि
वा स्याताम् ।

व्रीहीन्
वप
लुनीहि
पुनीहि
इत्येवं यतते–यत्यते वा।

पक्षे–
व्रीहीन्
वपति

लुनाति

पुनाति

इत्येवं यतते-यत्यते वा,

सूत्रमधीष्व,

निर्युक्तिमधीष्व

भाष्यमधीष्व इत्येवं

अधीते-पठ्यते वा ।

पक्षे-

सूत्रमधीते,

निर्युक्तिं अधीते

भाष्यं अधीते

इत्येवं अधीते-पठ्यते वा,

व्रीहीन्

वपत-लुनीत-पुनीत

इत्येवं

यतध्वे,

व्रीहीन्

वप-

लुनीहि

पुनीहि इत्येवं-

चेष्टध्वे ।

पक्षे-

व्राहीन्
वपथ
लुनीथ
पुनीथ इत्येवं-
यतध्वे,

सूत्रं अधीध्वम्
निर्युक्तिं अधीध्वम्
भाष्यं अधीध्वम्
इत्येवं अधीध्वे,

सूत्रं अधीष्व
निर्युक्तिं अधीष्व
भाष्यं अधीष्व
इत्येवं अधीध्वे ।

पक्षे-

सूत्रं अधीध्वे
निर्युक्तिं अधीध्वे
भाष्यं अधीध्वे
इत्येवं अधीध्वे ।

सामान्यार्थ इति किम् ?
व्रीहीन्

वप

लुनीहि

पुनीहि

इत्येवं=

वपति-लुनाति-पुनाति इति मा भूत्॥४३॥

## निषेधेऽलं-खल्वोः क्त्वा ।५।४।४४।

निषेधार्थयोः अलं-खल्वोः उपपद्योः

धातोः क्त्वा वा स्यात् ।

अलंकृत्वा, खलुकृत्वा ।

पक्षे-

अलं रुदितेन ॥ ४४ ॥

## पराऽवरे। ५ । ४ । ४५ ।

परे अवरे च गम्ये

क्त्वा वा स्यात् ।

अतिक्रम्य नदीं गिरिः,

अ-प्राप्य नदीं गिरिः ।

नद्यतिक्रमणे गिरिः,

नद्यप्राप्त्या गिरिः ॥ ४५ ॥

निमील्यादि-मेङस्तुल्यकर्तृके ।५।४।४६।

तुल्यः धात्वर्थान्तरेण कर्त्ता यस्य
तद्वृत्तिभ्यः
निमील्यादिभ्यः,
मेङश्च धातोः
सम्बन्धे
क्त्वा वा स्यात् ।
अक्षिणी निमील्य हसति,
मुखं व्यादाय स्वपिति,
अपमित्य याचते ।

पक्षे-

अपमातुं याचते ।
तुल्य-कर्तृक इति किम् ?
चैत्रस्य अक्षि-निमीलने
मैत्रो हसति ॥ ४६ ॥

प्राक्काले । ५ । ४ । ४७ ।

परकालेन
धात्वर्थेन
तुल्य-कर्तृके
प्राक्काले अर्थे
वर्त्तमानाद्
धातोः
सम्बन्धे
क्त्वा वा स्यात् ।
आसित्वा भुङ्क्ते,
आस्यते भोक्तुम् ।
प्राक्काल इति किम् ?
भुज्यते-पीयते वा ॥ ४७ ॥

ख्णम् चाऽऽभीक्ष्ण्ये । ५ । ४ । ४८ ।

आभीक्ष्ण्ये
परकालेन
तुल्यकर्तृके
प्राक्काले अर्थे
वर्त्तमानात् धातोः
सम्बन्धे

ख्णम्-त्त्वा च स्यात् ।
भोजं-भोजं याति,
भुक्त्वा-भुक्त्वा याति ॥४८॥

**पूर्वाऽग्रे-प्रथमे । ५ । ४ । ४९ ।**

एषु उपपदेषु
परकालेन
तुल्यकर्तृके
प्राक्काले अर्थे
वर्त्तमानात् धातोः
सम्बन्धे
ख्णम्
वा स्यात् ।
पूर्वं भोजं याति,
पूर्वं भुक्त्वा याति ।
एवं अग्रे भोजम्-अग्रे भुक्त्वा ।
प्रथमं भोजम्-प्रथमं भुक्त्वा ।
पूर्वं भुज्यते ततो याति ॥ ४९ ॥

**अन्यथै-वं-कथमि-त्थमः कृगोऽनर्थ-कात् । ५ । ४ । ५० ।**

एभ्यः परात्
तुल्य-कर्तृकार्थात्
कृगः
अनर्थकाद्
धातोः
सम्बन्धे
रुणम्
वा स्यात् ।
अन्यथाकारम्, एवङ्कारम्,
कथङ्कारम्,-इत्थङ्कारं
भुङ्क्ते ।
पक्षे—अन्यथा कृत्वा ।
अनर्थकात् इति किम् ?
अन्यथा कृत्वा शिरो भुङ्क्ते ॥५०॥

## यथा-तथाद् ईर्ष्योत्तरे । ५ । ४ । ५१ ।

आभ्यां तुल्यकर्तृकऽर्थात् अनर्थकात्
कृगः धातोः
सम्बन्धे

ख्णम्
वा स्यात्,
ईर्ष्यश्चेत् उत्तरयति ।
कथं त्वं भोक्ष्यसे ? इति पृष्टः
असूयया तं प्रत्याह-
यथाकारं अहं भोक्ष्ये
तथाकारं अहं भोक्ष्ये
किं तव अनेन ?
ईर्ष्योत्तर इति किम् ?
यथाकृत्वा अहं भोक्ष्ये
तथा द्रक्ष्यसि ॥ ५१ ॥

## शापे व्याप्यात् । ५ । ४ । ५२ ।

कर्मणः परात्
तुल्यकर्तृकार्थात् कृगः धातोः
सम्बन्धे
ख्णम्
वा स्यात्,
आक्रोशे गम्ये ।
चौरङ्कारं आक्रोशति
शाप इति किम् ?
चौरं कृत्वा हेतुभिः कथयति ।

## स्वाद्वर्थाद् अदीर्घात् । ५ । ४ । ५३ ।

स्वाद्वर्थात् अदीर्घान्ताद्
व्याप्यात् परात्
तुल्य-कर्तृकार्थात्
कृगः
धातोः
सम्बन्धे
ख्णम्
वा स्यात् ।
स्वादुङ्कारं भुङ्क्ते, मिष्टङ्कारं भुङ्क्ते
पक्षे,
स्वादुं कृत्वा ।
अ-दीर्घात् इति किम् ?
स्वाद्वीं कृत्वा यवागूं भुङ्क्ते ॥ ५३ ॥

## विद्-दृग्भ्यः कार्त्स्न्ये णम् ।५।४।५४।

कार्त्स्न्यवतः व्याप्यात् परेभ्यः
तुल्य-कर्तृके
प्राक्काले अर्थे

वर्त्तमानेभ्यो
विदिभ्यः दृशेश्च धातोः
सम्बन्धे
णम् वा स्यात् ।
अतिथिवेदं भोजयति,
कन्यादर्शं वरयति,
कार्त्स्न्ये इति किम् ?
अतिथिं विदित्वा भोजयति ॥ ५४ ॥

**यावतो विन्द-जीवः । ५ । ४ । ५५ ।**

कार्त्स्न्यवतो व्याप्याद्
यावतः पराभ्यां
तुल्य-कर्तृकाभ्यां
विन्दति-जीविभ्यां
धातोः
सम्बन्धे
णम् वा स्यात् ।
यावद्वेदं भुङ्क्ते,
यावज्जीवमधीते ॥ ५५ ॥

## चर्मोदरात् पूरेः । ५ । ४ । ५६ ।

आभ्यां
व्याप्याभ्यां परात्
तुल्य—कर्तृकार्थात्
पूरयतेः
धातोः
सम्बन्धे
णम् वा स्यात् ।
चर्मपूरमास्ते,
उदरपूरं शेते ॥ ५६ ॥

## वृष्टिमाने ऊलुक् चास्य वा ।५।४।५७।

व्याप्यात् परात्
पूरयतेः
धातोः
सम्बन्धे
णम् वा स्यात्,
पूरयतेः ऊतो लुक् च वा,

समुदायेन चेद् वृष्टीयत्ता गम्यते ।

गोष्पदप्रम्-गोष्पदपूरं वृष्टो मेघः ॥ ५७ ॥

## चेलार्थात् क्नोपेः । ५ । ४ । ५८ ।

चेलार्थाद् व्याप्यात् परात्

क्नोपयतेः

तुल्य-कर्तृकार्थाद्

वृष्टिमाने गम्ये

धातोः

सम्बन्धे

णम् वा स्यात् ।

चेलक्नोपं वृष्टो मेघः ॥ ५८ ॥

## गात्र-पुरुषात् स्नः । ५ । ४ । ५९ ।

आभ्यां

व्याप्याभ्यां परात्

तुल्य-कर्तृकार्थात्

स्नातेः

वृष्टिमाने

गम्ये

धातोः

सम्बन्धे

णम् वा स्यात् ।

गात्रस्नायं वृष्टः,

पुरुषस्नायं वृष्टः ॥ ५९ ॥

शुष्क-चूर्ण-रूक्षात् पिषस्तस्यैव ।५।४।६०।

एभ्यः

व्याप्येभ्यः परात्

पिषेः

णम् वा स्यात्,

तस्यैव धातोः

सम्बन्धे

शुष्कपेषं पिनष्टि,

एवं-

चूर्णपेषम्-रूक्षपेषम् ॥६०॥

कृग्-ग्रहो-ऽकृत-जीवात् ।५।४।६१।

आभ्यां
व्याप्याभ्यां पराद्
यथासङ्ख्यं
कृगः ग्रहेश्च
तस्यैव सम्बन्धे
णम् वा स्यात् ।
अ-कृतकारं करोति, जीवग्राहं गृह्णाति ॥६१॥

## निमूलात् कषः । ५ । ४ । ६२ ।

निमूलाद्
व्याप्यात् परात्
कषेः
तस्यैव
सम्बन्धे णम् वा स्यात् ।
निमूलकाषं कषति
निमूलस्य काषं कषति ॥ ६२ ॥

## हनश्च समूलात् । ५ । ४ । ६३ ।

स-मूलाद्
व्याप्यात् परात्
हन्तेः कषेश्च,

तस्यैव सम्बन्धे

णम् वा स्यात् ।

समूलघातं हन्ति,

समूलकाषं कषति ॥ ६३ ॥

**करणेभ्यः । ५ । ४ । ६४ ।**

करणार्थात् पराद्

हन्तेः

तस्यैव

सम्बन्धे

णम् वा स्यात् ।

पाणिघातं कुड्यं आहन्ति ॥ ६४ ॥

**स्व-स्नेहनार्थात् पुष-पिषः ।५।४।३५।**

स्व-शब्दार्थात्

स्नेहनार्थाच्च

करणार्थात् पराद्

यथासङ्ख्यं

पुषः

पिषश्च

तस्यैव सम्बन्धे

णम् वा स्यात् ।

स्वपोषं पुष्णाति,

एवं

आत्मपोषं-उदपेषं पिनष्टि,

एवं क्षीरपेषम् ॥ ६५ ॥

**हस्तार्थाद् ग्रह-वर्ति-वृतः ।५।४।६६।**

हस्तार्थात्

करणवाचिनः

परेभ्यः

एभ्यः

तस्यैव सम्बन्धे

णम् वा स्यात् ।

हस्तग्राहं गृह्णाति,

एवं-

करग्राहम्-

हस्तवर्त्तं वर्त्तयति,

पाणिवर्त्तं वर्त्तते ॥ ६६ ॥

**बन्धेर्नाम्नि । ५ । ४ । ६७ ।**

बन्धिः प्रकृतिः

नाम विशेषणं च ।

बन्धेः=बन्धनस्य

यत् नाम=संज्ञा,

तद्विषयात्

करणार्थात् पराद्

बन्धेः

तस्यैव सम्बन्धे

णम् वा स्यात् ।

क्रौञ्चबन्धं बद्धः ॥ ६७ ॥

## आधारात् । ५ । ४ । ६८ ।

आधारार्थात् पराद्

बन्धेः

तस्यैव सम्बन्धे

णम् वा स्यात् ।

चारकबन्धम् बद्धः ॥ ६८ ॥

## कर्तुर्जीव-पुरुषात् नश्-वहः ।५।४।६९।

आभ्यां

कर्तृभ्यां परादू

यथासङ्ख्यं

नशेः वहेश्च

तस्यैव सम्बन्धे

णम् वा स्यात् ।

जीवनाशं नश्यति,

पुरुषवाहं वहति ।

कर्तुः इति किम् ? जीवेन नश्यति, ॥६९॥

## ऊर्ध्वात् पूर्-शुषः । ५ । ४ । ७० ।

कर्तुः ऊर्ध्वात् परात्

पूरः शुषश्च

तस्यैव संबन्धे

णम् वा स्यात् ।

ऊर्ध्वपूरं पूर्यते

ऊर्ध्वशोषं शुष्यति ॥ ७० ॥

## व्याप्याच्च इवात् । ५ । ४ । ७१ ।

व्याप्यात् कर्तुः च

उपमानात् परात् धातोः

तस्यैव सम्बन्धे

णम् वा स्यात् ।

सुवर्णनिधायं निहितः,

काकनाशं नष्टः ॥ ७१ ॥

## उपात् किरो लवने । ५ । ४ । ७२ ।

उपपूर्वात् किरतेः

लवनार्थस्य धातोः

सम्बन्धे

णम् वा स्यात् ।

उपस्कारं मद्रका लुनन्ति ।

लवन इति किम् ?

उपस्कीर्य याति ॥ ७२ ॥

## दंशेस्तृतीयया । ५ । ४ । ७३ ।

तृतीयान्तेन योगे

तुल्य-कर्तृकार्थात्

उपपूर्वाद् दंशेः

धातोः

सम्बन्धे

णम् वा स्यात्

मूलकेनोपदंशं=

मूलकोपदंशम्–

मूलकेन उपदश्य भुङ्क्ते ॥ ७३ ॥

## हिंसाऽर्थाद् एकाऽऽप्यात् । ५ । ४ । ७४ ।

हिंसार्थात् धातोः

धात्वन्तरेण

एकाऽऽप्यात्

तुल्य–कर्तृकार्थात्

तृतीयान्तेन योगे

णम् वा स्यात् ।

दण्डेनोपघातं=दण्डोपघातम्–

दण्डेनोपहत्य च

गाः सादयति ।

एकाप्यात् इति किम् ?

दण्डेनोपहत्य चौरं

गोपालको गाः खेटयति ॥७४॥

उपपीड-रुध-कर्षः तत्सप्तम्या ।५।४।७५।

तया=तृतीयया युक्ता सप्तमी=तत्सप्तमी ।
तदन्तेन योगे
उपपूर्वेभ्यः एभ्यः
तुल्य-कर्तृकार्थेभ्यः
धातोः सम्बन्धे
णम् वा स्यात् ।
पार्श्वाभ्याम् उपपीडं=
पार्श्वोपपीडं शेते,
पार्श्वयोः उपपीडं=
पार्श्वोपपीडं शेते ।
व्रजेनोपरोधं=
व्रजोपरोधम्
व्रजे उपरोधं=
व्रजोपरोधं
गाः स्थापयति ।
पाणिना उपकर्षं=

पाण्युपकर्षम् ,
पाणौ उपकर्षं=पाण्युपकर्षम्-
गृह्णाति ॥ ७५ ॥

**प्रमाण-समासत्त्योः । ५ । ४ । ७६ ।**

आयाममानं=प्रमाणम् ।
समासत्तिः=संरम्भपूर्वकः सन्निकर्षः ।
तयोः गम्ययोः
तृतीयान्तेन सप्तम्यन्तेन च योगे
तुल्यकर्त्तृकार्थाद्
धातोः संबन्धे
णम् वा स्यात् ।
द्व्यङ्गुलेनोत्कर्षम्=
द्व्यङ्गुलोत्कर्षम् ,
द्व्यङ्गुले उत्कर्षम्=
द्व्यङ्गुलोत्कर्षं
गण्डिकाः छिनत्ति,

केशैर्ग्राहं=केशग्राहं
केशेषु ग्राहं=केशग्राहं
युध्यन्ते ।

पक्षे-

द्व्यङ्गुलेनोत्कृष्य
गण्डिकाः
छिनत्ति ॥ ७६ ॥

**पञ्चम्या त्वरायाम् । ५ । ४ । ७७ ।**

त्वरायां गम्यायां
पञ्चम्यन्तेन योगे
तुल्य-कर्तृकार्थात् धातोः
सम्बन्धे
णम् वा स्यात् ।
शय्याया उत्थाय=शय्योत्थायं
धावति ।

पक्षे

शय्याया उत्थाय धावति ।
त्वरायां इति किम् ?
आसनात् उत्थाय याति ॥ ७७ ॥

**द्वितीयया । ५ । ४ । ७८ ।**

द्वितीयान्तेन योगे
त्वरायां गम्यायां
तुल्य-कर्तृकार्थाद्
धातोः सम्बन्धे
णम् वा स्यात् ।
लोष्टान् ग्राहं=
लोष्टग्राहम्-
लोष्टान् गृहीत्वा युध्यन्ते ॥ ७८ ॥

**स्वाङ्गेनाऽध्रुवेण । ५ । ४ । ७९ ।**

यस्मिन् अङ्गे
छिन्ने भिन्ने वा
प्राणी न म्रियते तत् अध्रुवं ।
तेन स्वाङ्गेन
द्वितीयान्तेन योगे
तुल्य-कर्त्तृकार्थाद् धातोः
सम्बन्धे
णम् वा स्यात् ।
भ्रुवौ निक्षेपं=भ्रुविक्षेपम्-

भ्रुवौ विक्षिप्य वा
जल्पति ।
स्वाङ्गेन इति किम् ?
कफं उन्मूल्य जल्पति ।
अ-ध्रुवेण इति किम् ?
शिर उत्क्षिप्य वक्ति ॥ ७९ ॥

**परिक्लेश्येन । ५ । ४ । ८० ।**

परिक्लेश्येन
स्वाङ्गेन
द्वितीयान्तेन योगे
तुल्य-कर्तृकार्थाद्
धातोः सम्बन्धे
णम् वा स्यात् ।
उरांसि प्रतिपेषं=
उरः प्रतिपेषम्-उरांसि प्रतिपेष्य वा
युध्यन्ते ॥ ८० ॥

**विश-पत-पद-स्कन्दो वीप्साऽऽभीक्ष्ण्ये । ५ । ४ । ८१ ।**

द्वितीयान्तेन योगे
तुल्य-कर्तृकार्थाद्
विशादेः
वीप्साऽऽभीक्ष्ण्ययोः गम्ययोः
धातोः सम्बन्धे
णम् वा स्यात् ।

गेहं गेहं अनुप्रवेशं=गेहानुप्रवेशमास्ते,
गेहमनुप्रवेशमनुप्रवेशं=गेहानुप्रवेशं
आस्ते ।

गेहं गेहं अनुप्रपातं=गेहानुप्रपातं आस्ते
गेहं अनुप्रपातं अनुप्रपातं=
गेहानुप्रपातं
आस्ते ।

गेहं गेहं अनुप्रपादं=
गेहानुप्रपादं
आस्ते,
गेहं अनुप्रपादं अनुप्रपादं=
गेहानुप्रपादं

आस्ते ।

गेहं गेहं अवस्कन्दं=
गेहावस्कन्दं
आस्ते,

गेहं अवस्कन्दं अवस्कन्दं-
गेहावस्कन्दं आस्ते ।

पक्षे

गेहं गेहं अनुप्रविश्य आस्ते,
गेहं अनुप्रविश्य अनुप्रविश्य
आस्ते इत्यादि ॥८१॥

**कालेन तृष्य-स्वः क्रियाऽन्तरे ।५।४।८२।**

क्रिया-व्यवधायकार्थाभ्यां
तृषि-अस्भ्यां
द्वितीयान्तेन
कालार्थेन योगे
धातोः सम्बन्धे
णम् वा स्यात् ।

द्व्यहं तर्षम्-

द्व्यहतर्षं गावः पिबन्ति ।

द्व्यहं अत्यासं-

द्व्यहात्यासं गावः पिबन्ति ।

क्रियान्तर इति किम् ?

अहरत्यस्य इषून् गतः ॥८२॥

**नाम्ना ग्रहाऽऽदिशः । ५ । ४ । ८३ ।**

नामशब्देन

द्वितीयान्तेन योगे

तुल्य-कर्तृकार्थात् ग्रहेः

आदिशेश्च

धातोः सम्बन्धे

णम् वा स्यात् ।

नामानि ग्राहं-नामग्राहं आह्वयति,

नामानि आदेशं-

नामाऽऽदेशं

दत्ते ।

पक्षे-

नाम गृहीत्वा दत्ते ॥ ८३ ॥

## कृगोऽव्ययेनाऽनिष्टोक्तौ क्त्वा-णमौ । ५ । ४ । ८४ ।

अव्ययेन योगे
तुल्य-कर्तृकार्थात्
कृगः
अनिष्टोक्तौ गम्यायां
धातोः सम्बन्धे
क्त्वा-णमौ स्याताम् ।
ब्राह्मण ! पुत्रस्ते जातः किं तर्हि
वृषल
नीचैःकृत्वा-
नीचैःकृत्य-
नीचैःकारं कथयसि ?
उच्चैर्नाम प्रियम् आख्येयम् ।
अनिष्टोक्तौ इति किम् ?
उच्चैःकृत्वा आचष्टे ब्राह्मण !
पुत्रस्ते जात इति ।

अव्ययेन इति किम् ?

ब्राह्मण ! पुत्रस्ते जातः

किं तर्हि

वृषल !

मन्दं कृत्वा कथयसि ? ॥ ८४ ॥

## तिर्यचाऽपवर्गे । ५ । ४ । ८५ ।

क्रियासमाप्तौ गम्यायां

तिर्यचा

अव्ययेन योगे

तुल्यकर्तृकार्थात्

कृगः

धातोः संबन्धे

क्त्वा–णमौ स्याताम् ।

तिर्यक्कृत्वा–तिर्यक्कृत्य–

तिर्यक्कारं आस्ते ।

अपवर्ग इति किम् ?

तिर्यक् कृत्वा काष्ठं गतः ॥ ८५ ॥

**स्वाङ्गतस्-च्व्यर्थे-नाना-विना-धाऽर्थेन भुवश्च । ५ । ४ । ८६ ।**

तसन्तेन स्वाङ्गेन,
च्व्यर्थवृत्तिभिः
नाना-विनाभ्यां
धाऽर्थप्रत्ययान्तैश्च
योगे
तुल्यकर्तृकार्थाद्
भुवः कृगश्च
धातोः
संबन्धे
क्त्वा-णमौ स्याताम् ।
मुखतो भूत्वा-मुखतोभूय,
मुखतोभावं आस्ते ।
नाना भूत्वा-नानाभूय-नाना भावं
गतः,
विनाभूत्वा-विनाभूय-विनाभावं

गतः,

द्विधा भूत्वा-द्विधाभूय-द्विधाभावं

आस्ते,

एवं पार्श्वतः कृत्वा,-

पार्श्वतः कृत्य-पार्श्वतःकारं

शेते इत्यादि ।

च्व्यर्थ इति किम् ?

नाना कृत्वा भक्ष्याणि भुङ्क्ते ॥८६॥

## तूष्णीमा । ५ । ४ । ८७ ।

तूष्णींयोगे

तुल्य-कर्तृकार्थात् भुवः धातोः

सम्बन्धे

क्त्वा-णमौ स्याताम् ।

तूष्णींभूत्वा-तूष्णींभूय-तूष्णींभावं आस्ते ॥८७॥

## आनुलोम्येऽन्वचा । ५ । ४ । ८८ ।

अन्वचा अव्ययेन योगे
तुल्य-कर्तृकार्थाद् भुवः
आनुलोम्ये गम्ये
धातोः सम्बन्धे
क्त्वा-णमौ स्याताम् ।
अन्वग्भूत्वा-अन्वग्भूय अन्वग्भावं आस्ते ।
आनुलोम्ये इति किम् ?
अन्वग् भूत्वा विजयते,
पश्चाद् भूत्वा इत्यर्थः ॥ ८८ ॥

## इच्छाऽर्थे कर्मणः सप्तमी ।५।४।८९।

इच्छाऽर्थे धातौ उपपदे
तुल्य-कर्तृकार्थात्
कर्मभूतात् धातोः
सप्तमी स्यात् ।
भुञ्जीय इति इच्छति ।
इच्छार्थ इति किम् ?

भोजको याति ।

कर्मण इति किम् ?

इच्छन् करोति ॥ ८९ ॥

**शक-धृष-ज्ञा-रभ-लभ-सहाऽर्ह-ग्ला घटाऽस्ति-समर्थाऽर्थे च तुम् ।५।४।९०।**

शक्याद्यर्थेषु

इच्छाऽर्थेषु च धातुषु,

समर्थार्थेषु

नामसु उपपदेषु

कर्मभूतात् धातोः

तुम् स्यात् ।

शक्नोति-पारयति वा

भोक्तुम्,

एवं धृष्णोति-जानाति,

आरभते,

लभते, सहते,

अर्हति, ग्लायति,

घटते, अस्ति,

समर्थः-इच्छति वा-

भोक्तुम् ॥ ९० ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां
सिद्धहेमचन्द्राभिधानस्वोपज्ञ-
शब्दानुशासनलघुवृत्तौ
पञ्चमस्याध्यायस्य
चतुर्थः पादः समाप्तः

## अध्ययनफलं किम् ?

अध्ययनं हि ज्ञानफलं व्यवहारतः प्रगीयते परं वस्तुतः शब्दनयेन अधि=आत्मनि अयनं=गमनमिति व्युत्पत्त्यर्थं लक्ष्यीकृत्य अध्ययनद्वारा आत्मनि वृत्तीनामन्तर्मुखीभवनरुपफलं हि मुमुक्षूपादेयमध्ययनफलं विज्ञेयम् ।

तृतीया-ध्याय-तृतीयपादतः पंचमाध्याय-पर्यन्तरूपे
दशपादरूपे ह्यस्मिन्

## द्वितीये विभागे

सूत्राणां इयत्तावधारणमेवम् :—

| अध्यायः | पादः | सूत्रसंख्या | |
|---|---|---|---|
| ३ | ३ | १०८ | प्रथमविभागगतपादद्वय-सूत्र - संख्यया सह तृतीयाध्यायस्य सूत्र-संख्या ५२१ |
| ३ | ४ | ९४ | |
